अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

द्वादशवर्षे प्रथमोऽङ्कः

१५ जनवरी, १९९०

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली-११० ०५९

अर्वाचीनसंस्कृतम् (१२/१)

(R. N. 34554/79)

(१५ जनवरी १९९० ई०)

विषय-सूचिः

	विषयः	लेखकः	पृष्ठांकः
१.	सम्पादीयकम्		क-ख
२.	उत्तरमङ्गलम	डा० रमाकान्त शुक्लः	१
३.	भारतं नाम विश्रुतम्	श्री श्रीसुन्दरराजः	६
४.	श्रीगान्धिचरितस्य रचनाशिल्पम्	डा० सत्यव्रतः शास्त्री	११
५.	निर्वाचनावसरे	प्रो० बटुकनाथ शास्त्री खिस्ते	१९
६.	निर्वाचनात्प्राक्	डा० भास्कराचार्यः त्रिपाठी	२१
७.	केचन प्रश्नाः	डा० कपिलदेव पाण्डेयः	२२
८.	सन्ध्यामाह विधुः	प्रो० परमानन्द शास्त्री	२३
९.	मदीयं मनो मोदते संस्कृतेन	डा० चन्दनलाल पाराशरः	२५
१०.	तुभ्यं नमः	डा० शम्भुनाथ आचार्यः	२६
११.	मङ्गलया-समीक्षणम्	प्रो० लक्ष्मीचन्द्र कौशिकः	२७
१२.	सागरे समायोजिता आधुनिक-संस्कृतसाहित्य-संगोष्ठी	डा० सूर्यप्रकाश व्यासः	४७
१३.	दूरदर्शने प्रस्तुतं 'भाति मे भारतम्'	डा० रमाकान्त शुक्लः	५१
१४.	देववाणी-परिषद्वार्ता	डा० इच्छाराम द्विवेदी	५९
१५.	संस्कृत-जगद्वार्ता	रमा शुक्ला	६१

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली ।

२. प्रकाशनकालावधिः—त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति ।

—डा० रमाकान्त शुक्लः

१५-१-१९९० प्रकाशकः, सम्पादकः

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य द्वादशवर्षीये प्रथमेऽङ्केऽष्टौ कविताः, समीक्षात्मकं लेखद्वयम, एकं संगोष्ठी-विवरणं, एकः काव्यात्मको दूरदर्शनकार्यक्रमालेखः, देववाणी-परिषद्वार्ता संस्कृत-जगद्वार्ता च प्रकाश्यन्ते ।

'उत्तरमङ्गलम्' इतिशीर्षकयुतायां रचनायामेतत्पंक्तिलेखकेन नववर्षस्य मङ्गलकामनाप्रेषकाय कस्मैचिन्मित्राय पत्रोत्तरे नववर्षमङ्गलकामना दीयन्ते । इयं रचना मया दिल्ली-संस्कृत-अकादम्या १८-१-१९९० ई० तारिकायां फिक्की-सभागारे समायोज्यमानेऽखिलभारतीय-संस्कृतसम्मेलने पठितुमपि तत्सचिवसकाशे प्रहितास्ति, आशासे तत्राप्यस्याः पाठो भवेत् । अस्यां रचनायां मित्रस्य गृहे, वीथ्यां, ग्रामे, नगरे, देशे, राष्ट्रे विश्वे च सर्वथा मङ्गलं भवेदित्याशास्यते । अस्मत्प्रिये स्रग्विणीवृत्ते रचितायामस्यां कवितायां राष्ट्रमङ्गलेन साकं विश्वमङ्गलमपि काम्यते । श्रीश्रीसुन्दरराजमहाभागः 'भारतं नाम विश्रुतम्' इति रचनायां भारतस्य महिमानं गायति । सार्धैकमासपूर्व लोकसभायाः कासाञ्चिद् विधानसभानाञ्च निर्वाचनानि संवृत्तानि । 'निर्वाचनावसरे' इतिशीर्षकरचनायां प्रो० वटुकनाथशास्त्रि'खिस्ते'-महाभागेन अघटनघटनापटीयसां नेतॄणां लीला दिङ्मात्रं दर्शिता; अन्ते च निर्वाचनपेटिका पवित्रान् सुतान् जनयितुमभ्यर्थिता । डा० भास्कराचार्यत्रिपाठिमहाभागेनापि 'निर्वाचनात्प्राक्' इतिशीर्षकरचनायां निर्वाचनात्प्राक् ध्वजानां, ध्वजोत्तोलकानां, दलपरिवर्तनकारिणां, चाटुकाराणाञ्च सव्यङ्ग्यं चर्चा कृता । डा० कपिलदेव पाण्डेयमहाभागः 'केचन प्रश्नाः' इतिरचनायां समाजे वर्तमाना दुर्वृत्तपरम्परा अधिक्षिपति । प्रो० परमानन्दशास्त्रिमहाभागेन 'सन्ध्यामाह विधुः' इत्येतदन्योक्तिपरकगीतात्मकरचनायाम् अविचलितरागिण्याः कस्याश्चिद्वृत्तान्तः समुपन्यस्तः । सन्ध्यां विधुश्चाटूक्तैरनुकूलयितुमिच्छति किन्तु सूर्यस्यानन्यरागिणी सा चन्द्रं धर्षयति । 'मदीयं मनो मोदते संस्कृतेन' इत्येतच्छीर्षकयुतायां भुजंगप्रयातवृत्तेन रचितायां कवितायां डा० चन्दनलालपाराशर-महाभागः संस्कृतं प्रति स्वानुरागं व्यञ्जयन् संस्कृतस्य पुष्टितुष्टिभुक्तिमुक्तिकरत्वं प्रतिपादयति । इयं रचना कविना १८-९-१९८९ ई० तारिकायाम् आगरा विश्वविद्यालये समायोजिते संस्कृत-दिवस-समारोहे पठितासीत् । 'तुभ्यं नमः' इत्येतस्यां रचनायामाचार्येण डा० शम्भुनाथमिश्रमहाभागेन संस्कृतकवीनां कृते स्वनमस्कारा निवेद्यन्ते । कविनेयं रचना २४-१२-१९८९ ई० तारिकायां मैनपुर्यां समायोजिते संस्कृतकविसम्मेलने श्राविता यत्र आचार्यश्रीनिवासरथ-डा० भास्कराचार्यत्रिपाठि-डा० राजेन्द्रमिश्र-डा० रमाकान्त शुक्ल-डा० इच्छाराम द्विवेदादयः समुपस्थिता आसन् ।

'श्रीगान्धिचरितस्य रचनाशिल्पम्' इत्येतस्मिन् शोधनिबन्धे प्रो० सत्यव्रत शास्त्रिमहाभागेन स्वपितृचरणानां स्व० प्रो० चारुदेवशास्त्रिमहाभागानां 'श्रीगान्धिचरित'-नामकृतेः शब्दसम्पदं रचनाकौशलञ्चाधिकृत्य सोदाहरणं विवेचनं कृतम् । आचार्यश्रीलक्ष्मीचन्द्रकौशिकमहाभागेन 'मङ्गलया-समीक्षणम्' इत्येतस्मिन् प्रौढे शोधनिबन्धे डा० उमाकान्तशुक्ल-विरचितायाः किञ्चाद्यत्वे रुहेलखण्डविश्वविद्यालयस्य बी० ए० कक्षायां पाठ्यत्वेन निर्धारितायाः 'मङ्गलया' नाम्न्या मुक्तकरचनायाः विस्तृतं समीक्षणं विहितम् ।

५—८-१२-१९८९ ई० तारिकासु सागरविश्वविद्यालयस्य संस्कृतविभागेन आधुनिकसंस्कृतसाहित्यमवलम्ब्यैका त्रिदिवसीया संगोष्ठी आयोजितासीत् । 'सागरे समायोजिता आधुनिकसंस्कृतसाहित्यसंगोष्ठी' इत्येतस्मिँल्लेखे डा० सूर्यप्रकाशव्यासमहाभागस्तस्या गोष्ठ्या विवरणं प्रस्तौति ।

देववाणी-परिषदा १९८० तमेशवीयेऽब्दे एतत्पंक्तिलेखकस्य 'भाति मे भारतम्' नाम काव्यं प्रकाशितं यस्य रचना १९७९ तमेशवीये ऽब्दे जाता । १६-८-१९८९ तारिकायामेतत्पंक्तिलेखकस्य निर्देशने काव्यमिदमवलम्ब्य दूरदर्शनात्प्रसारणीया दश भागा निष्पाद्य दूरदर्शने प्रस्तूयन्त येषां क्रमशः प्रसारणं २०-१-१९९० ई० तारिकातः प्रतिशनिवासरं प्रातःकाले ८.३६ वादनवेलाया-माशास्यते । "दूरदर्शने प्रस्तुतं 'भाति मे भारतम्'"—इतिशीर्षकान्तर्गतं दूर-दर्शनकार्यक्रमे गृहीतानां पद्यानां यथाक्रमं पाठो दीयते । अत्रालेखे कानिचिन्न-वीनान्यपि पद्यानि संयोजितानि सन्ति ।

देववाणी-परिषद्वार्तायां डा० इच्छारामद्विवेदमहाभागेन संस्कृत-जगद्वार्तायां च श्रीमत्या रमाशुक्लया विगतमासत्रये घटितानां गतिविधीनां यथावकाशं परिचयो दीयते ।

अंकोऽयम् ईशवीयनववर्षारम्भे प्रकाशितः । अग्रिमांकप्रकाशनात्पूर्वमेव २०४७ तमो विक्रमसंवत्सरोऽपि प्रारप्स्यते । उभयनववर्षयोः कृते भवद्भ्यो मङ्गलकामनाः समर्पयामि—'नूतने वत्सरे वो भवेन्मङ्गलम्'

विदुषामाश्रवः

रमाकान्त शुक्लः

१५.१.१९९० ई०
आर ६ वाणी-विहारः, नयी दिल्ली-११००५९

(डा० रमाकान्त शुक्लः)
प्रधानसम्पादकः

उत्तरमङ्गलम्

(डा० रमाकान्त शुक्लः, आर ६ वाणी-विहारः,
नयी दिल्ली-११००५९)

मित्र ! लब्धा मया ते शुभाः कामना-
स्तत्कृतेऽहं कृतज्ञो भवन् भूरिशः ।
स्वास्थ्यदं मोददं कीर्तिदं सौख्यदं
नूतनं वत्सरं ते शुभं कामये ॥१॥

यत्र गेहे वसेर्यत्र वीथ्यां वसे-
र्ग्रामके वा नगर्यां वसेस्त्वं सखे !
वैमनस्याग्निरुग्रो न तत्र ज्वलेत्
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२॥

येन मार्गेण यात्रा भवेत्तावकी
तत्र पुष्पाणि नित्यं हसेयुः सखे !
कण्टकं न स्पृशेत्ते पदं कोमलं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३॥

कुत्र चिन्तात्र लोके न संदृश्यते
कुत्र वा दुःखशोकादिनां न स्थितिः ?
त्वत्कृते किन्तु तिष्ठन्त्वदृश्या इमे
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४॥

यत्र देशेऽस्ति वासः सखे ! तावक-
स्तत्र कर्तव्यशून्यो न कश्चिद्भवेत् ।
स्युः प्रजातन्त्ररक्षापरास्तन्नरा
ननतने वत्सरे ते भवेन्मङ्गलम् ॥५॥

उष्यते यत्र राष्ट्रे त्वयाहर्निशं
तत्र कार्यं चिकीर्षुर्यदि स्याज्जनः ।
प्राप्नुयात् कार्यवृत्तिं तदा स ध्रुवं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥६॥

ज्ञातमस्त्येव मे, त्वं हि सामाजिकं
प्रेक्ष्य वैषम्यमाप्नोषि तापं सखे !
आयतावीदृशी ते दशा नो भवे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥७॥

वृत्तपत्रेषु नित्यं बलात्कारिणां
निन्द्यपैशाचकृत्यानि न त्वं पठेः !
नापि हत्यापहारादि-गाथा नवा
नूतने वत्सरे ते भवेन्मङ्गलम् ॥८॥

प्रोन्नतिर्दुर्जनानां सतां दुर्गति-
र्वृत्तिकष्टार्दितानां च यूनां गतिः ।
नो दुनोतु त्वदीयं द्रवन्मानसं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥९॥

नैव वध्वाः न पत्युर्न वा कस्यचि-
ज्जीवितप्राणिनो दाहमाकर्णयेः !
नैव दारिद्र्य पीडा जनान् बाधये-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥१०॥

लोलुपा नायकास्सन्तु देशे नहि
स्वाधिकारात्प्रमत्ता न चापि प्रजाः ।
स्वैरिणो नो भवेयुस्तथा शासका
नूतने वत्सरे ते भवेन्मङ्गलम् ॥११॥

मुग्धलोकं सखे ! वञ्चनाचुञ्चवो
गृध्रगोमायवो वञ्चयेयुर्नहि ।
क्षेमदे शान्तिदे हर्षदे श्रीप्रदे
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१२॥

देववाणीमुपेक्ष्य प्रभाभासुरां
येऽवनत्या गता अन्धकूपे नराः ।
तेऽपि गृह्णन्तु शिक्षां सखे सत्वरं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१३॥

दैन्यहीनं दयापूर्णमाशान्वितं
जीवनं कर्मठं ते सदा राजताम् ।
त्वं सुखीः स्याः, लभस्व प्रियं कांक्षितं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१४॥

ये जना आसते ते कुटुम्बे सखे !
ते प्रसन्नास्समर्था लसेयुस्सदा ।
विश्वमेकं कुटुम्बं च ते राजताम्
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१५॥

अत्र विश्वे सतो रक्षितुं सर्वदा
दुष्कृतो हर्तुमुत्साहिनस्स्युर्नराः ।
निर्मितिर्नूतना स्यात्सदा शंकरी
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१६॥

नैव याचे धनं, स्वर्गमेवाथवै-
काकिनस्ते न सौख्यं सखे ! कामये ।
सन्तु सर्वत्र सर्वे सदा नन्दिताः
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१७॥

सन्तु बाला युवानोऽथ वृद्धास्समे
निर्भयाः कर्मठा लोकसेवापराः ।
आदरः कस्यचित्खण्डितो नो भवे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥१८॥

सत्यनिष्ठा जयेल्लेखनी निर्भया
निर्भया वाग् जयेल्लोकसंरक्षिणी ।
साधुभावस्तथा ज्ञानपूतो जये-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥१९॥

आर्तरक्षार्थमस्त्राणि शस्त्राणि वै
सन्तु, नैव प्रहर्तुं तथानागसि ।
कण्टकानां च लोकस्य लोपो भवे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥२०॥

येषु चित्तेषु दावानलो भीषणो
द्वेषभावस्य जागर्ति धूधूत्करः ।
जागृयात्तेषु वासन्तिकी श्रीः शुभा
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२१॥

नूतना नूतना ये ऽपराधाः खलै-
र्नित्यमाविष्क्रियन्ते जगद्बाधितुम् ।
ते समुन्मूलिताः स्युः समाजद् द्रुतं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२२॥

वारिवाहः सुकाले समागच्छतात्
सन्तु गावश्च पुष्टाः सवत्साः समाः ।
शं स्वकार्येषु लग्नाः समे प्राप्नुयु-
र्नूतने वत्सरे ते भवेन्मङ्गलम् ॥२३॥

क्षेत्रकेष्वन्नमुत्पादितं स्याद्बहू-
द्योगशालास्वथोत्पाद उच्चो भवेत् ।
सन्तु सत्यश्रमाभ्यां समाः सिद्धयो
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२४॥

नैव पश्येदभद्रं नरश्चक्षुषा
नैव चाकर्णयेद्वाप्यभद्रं क्वचित ।
नैव वाचा भणेद्वाक्यमुद्वेजकं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२५॥

स्वस्थपुष्टं समेषां शरीरं लसे-
न्मानसं शैवसंकल्पपूतं भवेत् ।
सच्चिदानन्द आत्मा स्वरूपं भजे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥२६॥

वाचि विद्या, करे कर्म, दृष्टौ दया
पादयोश्च प्रकृष्टा गती राजताम् ।
सुप्रवृत्तेन्द्रियैस्तोषमीयुर्जना
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२७॥

ये बुभुक्षाहता वस्त्रहीनाश्च ये
सन्ति पादातमार्गे शयानाश्च ये ।
अन्नवस्त्राश्रयान् प्राप्नुयुस्ते द्रुतं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२८॥

धर्मभाषाविवादा लभेरन् शमं
दुष्कृतिर्लुप्यताम् सत्कृतिर्वर्धताम् ।
नित्यमौदार्यभावो जयेत्क्षुद्रताम्
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२९॥

आधयो व्याधयोऽकालमृत्युस्तथा
पीडयेयुर्न लोकं श्रमाराधकम् ।
कर्म कुर्वञ्छताब्दं नरो जीवता-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥३०॥

यत्र साहित्य-सङ्गीत-पूजा भवेत्
सत्कलाशिल्पशास्त्रार्चना वा भवेत् ।
तत्र विघ्नो न कश्चित्समुत्पद्यताम्
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३१॥

सात्त्विका राजसास्तामसाः प्राणिनोऽ
न्योन्यमाश्रित्य कल्याणिनस्स्युस्सदा ।
वाचि चित्ते च कार्ये सदैकं वसे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥३२॥

प्रेमभङ्गो न कस्यापि लोके भवेत्
प्रेमिणो विप्रयुक्ता मिलेयुर्मुदा ।
स्युः स्मितास्याः समे फुल्लपद्मा यथा
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३३॥

पीडिता येऽप्यभावैर्मनःक्लेशिभि-
स्ते जयेयुः समस्तानभावान्नराः ।
निष्फला नैव कस्यापि कांक्षा भवे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥३४॥

शैशवं लालितं वार्धकं पूजितं
यौवनं भोगतृप्तं हसेत्सर्वदा ।
त्याग-भोगौ भवेतां सखायौ सदा
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३५॥

ये ऽपि चिन्तासहस्रैः परीताः जनाः
        सन्ति पीताननना लुप्तहासस्मिताः ।
सन्तु रक्ताननाः पूर्णकामाश्च ते
        नूतने वत्सरे ते भवेन्मङ्गलम् ॥३६॥

जीवनं विश्वसम्पद् बुधैरुच्यते
        तच्च विश्वस्य सेवार्थमेवार्प्यताम् ।
सद्विवेकः क्रियात्तस्य रक्षां सदा
        नूतने वत्सरे ते भवेन्मङ्गलम् ॥३७॥

पर्वतानां वनानां नदीस्रोतसां
        निर्झराणामृतूनां दिशां प्राणिनाम् ।
वारिधीनां च चेतः सदा प्रीयताम्
        नूतने वत्सरे ते भवेन्मङ्गलम् ॥३८॥

खे जले कौ च वायौ तथा तेजसि
        स्रग्विणी शान्तिराप्नोतु नित्यं जयम् ।
क्रान्तिरेयात्परं रक्तपातं विना
        नूतने वत्सरे ते भवेन्मङ्गलम् ॥३९॥

तावको देश आस्तां सदा रक्षित-
        स्तावकं विश्वमास्तां सदा रक्षितम् ।
तावकी कीर्तिरास्तां सदा रक्षिता
        नूतने वत्सरे ते भवेन्मङ्गलम् ॥४०॥

स्वाभिमानोऽस्तु ते सर्वदा रक्षित-
        स्तावको स्यात्प्रतिज्ञा सदा रक्षिता ।
तावकं स्यात्तपो रक्षितं सर्वतो
        नूतने वत्सरे ते भवेन्मङ्गलम् ॥४१॥

त्वं हि विश्वेश्वरं विश्व आलोकये
भूर्भुवः स्वः प्रसन्ना भवेयुश्च ते ।
प्रीयतां ते रमाकान्त आजीवनं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४२॥

कामना मे वशे पूरणं तद्वशे
ईह आशायुतः कामनापूरणम् ।
शारदाया रमाया प्रसादोऽस्तु ते
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४३॥

नूतनं वत्सरं वीक्ष्य सम्प्रेषिता
यैरनेकैः सुहृद्भिः शुभाः कामनाः ।
त्वद्बलेनैव तेषां कृतेऽपि ब्रुवे
'नूतने वत्सरे वो भवेन्मङ्गलम्' ॥४४॥

यन्मया नोदितं यच्च काम्यं त्वया
यच्च पथ्यं भवेन्मङ्गलाधायकम् ।
तत्सुलभ्यं भवेत्त्वत्कृते सत्वरम्
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४५॥

वक्तुमास्ते सखे! भूरि मन्मानसे
किन्तु वीक्ष्य त्वदीयामतिव्यापृतिम् ।
पत्रमत्रैव सम्पूर्णतां प्रापये
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४६॥

☆

भारतं नाम विश्रुतम्

(श्री एस० सुन्दरराजन्, आइ०ए०एस०, भुवनेश्वरम्)

तारतारकविद्यायाः
सारतत्सारवेदिभिः ।
पूरितं पण्डितै राष्ट्रं
भारतं नाम विश्रुतम् ॥१॥

शर्व-श्वशुरोऽखर्वः
सर्वैर्वन्द्यस्स सर्वदा शीतः ।
निर्वाणैषिनिषेव्यः
उर्व्यासुष्णीष-भूतोऽस्य ॥२॥

उत्पत्य पद्मापतिपादपद्मात्
निपत्य मौलावथ चन्द्रमौलेः ।
निष्पत्य जह्नोः श्रवणाद्वहन्ती
संपत्तिरिन्धे सुरसिन्धुरस्य ॥३॥

आर्या यस्या वार्यपार्ये विगाढाः (ऽवगाढाः)
आर्यावर्तो यत्तटप्रान्तदेशः ।
कायऽकार्ये वार्युपस्पृश्य यस्याः
चर्या वर्या कुर्युराचार्यधुर्याः ॥४॥

तथाविधा देवतरङ्गिणी शुभा
हिताय देशस्य सदा प्रवर्तते ।
कृषिश्च धर्मस्सदभीष्टसाधनं
तथापवर्गो यदुपघ्नमत्र नः ॥५॥

यं जाह्नवीव यमुना च महानदी च
कृष्णा कवेरतनया तपती च रेवा ।
गोदावरी च तमसेत्यनघा अनेकाः
प्रक्षालयन्ति सरितः परितः प्रवाहैः ॥६॥

अनुयुगमवतारैरीश्वरो भारतस्य
कलयति कमलेशः कष्टभारावतारम् ।
अथ मुहुरवतीर्णाः मार्गसंदर्शनार्थं
विदधति गुरवो नः धर्ममार्गोपदेशम् ॥७॥

मन्दैरान्दोलनपरवशैर्निन्दनीयैरिदानीं
विन्दद्देशान्तरमिव रुजं दुःसहां भारतं नः ।
सन्देहं यज्जनयति मनस्येकतां प्रत्यमन्दं
क्रन्दत्यन्तस्तदिह चकितस्सज्जनो वेपमानः ॥८॥

विद्वेषस्य परस्परं वितरणं वित्रासनं विग्रहं
विद्रोहं कलहायनं विलुलनं विघ्नं च विद्यार्थिनाम् ।
विक्षोभेन विनाशनं विदधति व्यापादनं विक्षतिं
विश्वाधीश ! विधत्स्व मानवपशौ शार्दूलविक्रीडितम् ॥९॥

युद्धे क्रुद्धप्रवृद्धे वहुजनमरणं सिद्धमद्धेत्यहिंस्रं
बौद्धं मार्गं विशुद्धं श्रयितुमनुचरैः बद्धधीः विद्धगात्रः ।
श्रद्धामुद्दामभूतां निजहृदि निदधे सोऽत्र सम्राडशोकः
रुद्धाः किं वा विरुद्धाः तदुदितसरणेः भारता बुद्धिमन्तः ॥१०॥

व्यतनुत सुन्दरराजः
प्रतनुज्ञानेन भारतं स्तोष्यन् ।
अतनुकवित्वप्रार्थी
बत नुतिमेतां प्रसत्त्यै वः ॥११॥

श्रीगान्धिचरितस्य रचनाशिल्पम्

(लेखकः—डा० सत्यव्रतः शास्त्री, दिल्लीविश्वविद्यालयस्य संस्कृत-विभाग
आचार्यः, पुरीस्थश्रीजगन्नाथ-संस्कृत-विश्वविद्यालयस्य प्राक्तनकुलपतिः,
सम्प्रति थाइदेशस्थबैंकाकनगरे शिल्पाकरविश्वविद्यालये
प्राच्यभाषाविभागेऽभ्यागताचार्यः)

अद्यास्य षष्टिर्वर्षाणि मम पितृचरणैः प्रणीतस्य श्रीगान्धिचरितस्येदम्प्रथमं प्रकाशितस्य। बन्धुवर्याणां देववाणी-परिषत्संस्थापकमहासचिवानां कविवरेण्यानां डा० रमाकान्तशुक्ल-महाभागानां प्रयासेन पुनरस्य प्रकाशनं भवतीति सम्प्रीणितान्तरङ्गोऽस्मि। मम पितृचरणानामनन्येयं गद्यकृतिः। पाणिनीये व्याकरणे कृतभूरिपरिश्रमास्ते तद्विषय एव व्याकरणचन्द्रोदयाभिधानं ग्रन्थराशिन्यबध्नन्नुपसर्गार्थचन्द्रिकाभिधानं वा ग्रन्थसमुदायमग्रथ्नन्ग्रन्थान्तराणि वाऽरचयन्। कथाऽऽख्यायिकारूपाश्चरितनिरूपणरूपाः कृतीस्तु ऋते श्रीगान्धिचरितात्ते न प्राणयन्। यदि तेऽरचयिष्यन्महदुपकृतमभविष्यत्संस्कृतवाङ्मयस्य। यादृशी प्रसन्नमधुरा पदावली ग्रन्थेऽत्र दृग्गोचरीभवति न तादृश्यन्यत्रेति निर्माथं ब्रूमः। अनितरोऽभूत्तेषां वाचि समधिकारः। वर्णनशैल्यप्यनितरैव। भाषास्वारस्ये तेषामभून्महानाग्रहः। अत एव श्रीगान्धिनो भाषणानां लेखानां वा योऽनुवादोऽत्र कृतो पितृचरणैः कृतस्तत्रानुवादत्वप्रतीतिलेशोऽपि नास्ति। सर्वं मौलिकमेव प्रतिभाति। वाच्यमानानि भाषणादीनि मूलरूपेण संस्कृत एवोपनिबद्धानि स्युरित्येतादृश एव कश्चन विलक्षण एवानुभवस्तत्र समुन्मिषति। एतस्मिन्नेवानुवादस्य चरमोत्कर्षः। भाषान्तरेऽपि मूलभाषावदेवार्थप्रतीतिर्भाषान्तरस्वारस्याप्रहाणिश्च।

चरितनायकोऽस्य ग्रन्थस्याधुनिकः। आफ्रीकाभूखण्डे गौराङ्गविरोधः स्वदेशस्वातन्त्र्यप्राप्तये च समुद्योग इत्यादिभिराधुनिकीभिर्घटनाभिस्तस्य सम्बन्धस्तत्र च तस्य महत्त्वपूर्णा भूमिकेति ग्रन्थेऽत्राधुनिकविषयोपन्यासायाधुनिकशब्दप्रयोगोऽनिवार्यकोटिमाटीकत। यान्त्रिकेऽस्मिन् युगे नूतनयन्त्रादिक-

स्याप्युल्लेखो ग्रन्थेऽपेक्षित एवासीत् । तदर्थं नूत्नशब्दप्रयोगोऽपेक्षित इति सोऽपि पितृचरणैः कृतः । तथाहि तार इत्यस्यार्थे 'विद्युद्वार्ता'[१]-शब्दप्रयोगः, समाचार-पत्रार्थ वृत्तपत्र[२] शब्दप्रयोगः, पत्रिकार्थे वार्तापत्र[३] शब्दप्रयोगः, गेस्टहाउस इत्यस्यार्थे पथिकाश्रमशब्दप्रयोगः (विक्टोरियापथिकाश्रमे च वस्तुमारभत[४]), ट्रेन इत्यर्थे च लौहपथसञ्चारिबाष्पयानशब्दप्रयोगः (चलद्भ्यो लौहपथसञ्चारिभ्यो बाष्पयानेभ्यो भ्रंशितः[५], इतरे विशेषतः स्त्रियो बालाश्च लौहपथसञ्चारीणि बाष्पयानान्यारोहन्[६]), 'वालण्टियर' इत्यर्थे स्वेच्छासेवकशब्दप्रयोग (स्वेच्छा-सेवका अनारतमसेवन्त[७]), रेलवेस्टेशन इत्यर्थे च यानविरामस्थानप्रयोगः[८], प्रैस एक्ट इत्यस्य कृते मुद्रण-यन्त्रविधानशब्दप्रयोगः 'महात्मा मुद्रणयन्त्रविधानम-भनक्[९]), बन्दूक इत्यर्थे च यन्त्रगुलिकाप्रक्षेपणीशब्दप्रयोगः (सेनापतिस्तु यन्त्रगुलिकाप्रक्षेपणीरादाय जल्लीद्यानमगमत्[१०]), फ़ार्यरिंग इत्यर्थे आग्नेयचूर्ण-प्रक्षेपशब्दप्रयोगः (प्रबोधमन्तरैव च निरायुधेषु तेष्वाग्नेयचूर्णप्रक्षेपं प्रारभत[११]), व्योमयानार्थे आकाशयानशब्दप्रयोगः (आकाशयानेभ्योऽशस्त्रेषु मनुजेष्वाग्नेया-स्त्राणि प्राक्षिप्यन्त[१२]), वर्किंग कमेटी इत्यस्यार्थे कार्यनिष्पादिकासभाशब्दस्य प्रयोगः, (कार्यनिष्पादिका सभा मुम्बापुर्यां मिलिता, श्रीगान्धिन इदं घोषणापत्रं कार्यनिष्पादिकया कांग्रेससभयाऽन्वमोदि[१३]), कलैक्टर अथवा डिस्ट्रिक्ट मजिस्ट्रेट इत्यर्थे नगरपालशब्दप्रयोगः (यदा त आग्नेयचूर्णं निःशेषतामानयंस्तदाऽऽत्म-रक्षायै नगरपालागारं प्रत्यागच्छन्[१४]), सिगरेट इत्यर्थे तमालपत्रगुटिकाशब्द-प्रयोगः (यद्यहं शासिता स्यामहं तमालपत्रगुटिकासु मद्येषु च करं न्यस्येयम्[१५]) । क्वचित्पुनस्तैर्नगराणां केषाञ्चन नामानि संस्कृतमूलकानीत्यवधार्य ध्वनिसाम्येन

---

१. श्रीगान्धिचरितम् द्वितीयं संस्करणम्, पृष्ठाङ्कः ६, २१, ५६, ६३
२. तदेव, पृष्ठाङ्कः १७ ३. तदेव, पृ० ७६
४. ,, ,, ६ ५. ,, ,, १७
६. ,, ,, ३७ ७. ,, ,, १८
८. ,, ,, ३६ ९. ,, ,, ६०
१०. ,, ,, ६० ११. ,, ,, ६१
१२. ,, ,, ६२ १३. ,, ,, ७५
१४ ,, ,, ७८ १५. ,, ,, १३०

संस्कृत-रूपतामापादितानि । एवंविधेषु शब्देषु जूनागढ़कृते **यवनगृह**[१६]शब्दो मुल्तानकृते **मूलत्राण**[१७]शब्दः, सहारनपुर इत्यस्य कृते **साधारणपुर**[१८]शब्दः, नवसारी इत्यस्य कृते **नवश्री**[१९]शब्दः, कोलम्बो इत्यस्य कृते **कोलाम्बु**[२०]शब्दः, वेलगाँव इत्यस्य कृते **बिलग्राम**[२१]शब्दः सूरत इत्यस्य कृते **सुरत**[२२]शब्दो विशेषोल्लेखमर्हन्ति । जर्मनीदेशस्य कृते **शर्मण्य**[२३]शब्दस्तदभिजनेन सुप्रथितविदुषा मोक्षमूलरेणैव प्रयुक्तः । स एव च पितृचरणैरपि परिगृहीतः । एनि बसेण्ट इत्यस्या वैदेशिक्या विदुष्या नाम तैः संस्कृतीकृत्य **वासन्तीदेवी**त्येवं रूपेण प्रयुक्तम् —श्रीमत्या वासन्तीदेव्या अनर्गलं भाषणं श्रुत्वा ।[२४] एवमेव अन्सारीति नामा वैद्योऽनुसारीत्येवंरूपेण तन्नामप्रतिसंस्कारेण निर्दिष्टः—ततोऽनुसारीत्यभिधो-भिषङ् नारङ्गरसमानयत् ।[२५] क्वचित्पुनः प्रचलितनाम्नां संस्कृतीकरणे परम्परापरित्यागोऽपि तैर्विहितः । तथा हि साबरमतीति नद्या नाम तैः शवरमनी[२६]तिरूपेण संस्कृतरूपतामापादितम् । पुरातनेषु संस्कृताभिलेखेषु नदीयं **साभ्रमती**तिरूपेण निर्दिष्टा । साबरमतीति तद्रूपस्यैवापभ्रंशः । सुखवाक्स्वारस्यानुरोधेनैव तैः ख्रिस्तीयानां धर्मग्रन्थो बाइबिलाख्यः **ख्रिस्तवेद** इत्येवंरूपेणाभिहितो मुहम्मदीयानां च **मुहम्मदीयधर्मसंहिते**ति—ततो मुहम्मदीय-धर्मसंहितायाः पाठादूर्ध्वं ख्रिस्तवेदोपनिषच्छ्रुतयश्च सस्वरमगीयन्त ।[२७] परमहं ख्रिस्तवेदाक्षरानुसारिभिः ख्रिस्तानुगैस्साम्यमधिगन्तुं न प्रभवामि[२८] । ख्रिस्त-धर्मानुसारिणस्तैः क्वचित् **ख्रिस्तानुगा**[२९] इति क्वचित् **ख्रिस्तीया**[३०] इत्येवंरूपेण **क्वचिच्च क्रूश्चीना**[३१] इत्येवं रूपेण निर्दिष्टाः । एवमेव मुसलमाना

---

१६. तदेव, पृ० ३
१७. तदेव, पृ० ९१
१८. ,, ,, ९१
१९. ,, ,, १३४
२०. ,, ,, १११
२१. ,, ,, १०३
२२. ,, ,, १३२
२३. ,, ,, ५७
२४. ,, ,, ५१
२५. ,, ,, १००
२६. ,, ,, ४६, १३५
२७. ,, ,, १००
२८. ,, ,, १०४
२९. ,, ,, १०४
३०. ,, ,, १०१
३१. ,, ,, ४५

मुहम्मदीया[३२], मौहम्मदा[३३] मुसलमीना[३४]श्चेत्येवंरूपेणाभिहिताः। मुसलमान-शब्दस्य मुसलमीनरूपेण परिणतौ तच्छब्दस्य कथञ्चित्संस्कृतरूपतापादनमेव तत्प्रयोजको हेतुः। जलियाँवाला बाग इत्यस्य कृते जल्लोद्यान[३५]शब्दप्रयोगेऽपि तादृश एव हेतुस्तद्धृदयगतः। क्वचित्क्वचित्पितृचरणैस्तेषां तेषामाङ्ग्ल शब्दानां कृते तद्भावबोधिनी शब्दावलिः प्रयुक्ता। तथा हि पेयिंग् गैस्ट इत्यस्याशयस्तैः स्वशब्दैरेवमाविष्कृतः—श्रीगान्धी लन्दननगर्यां क्वचिद् गेहे कुटुम्बाङ्गतया स्थितिमकुरुत[३६]। 'आक्शन' (नीलामी) इत्यस्याशयश्च शब्दैरेभिः—द्वितोलभरं लवणं सपादपञ्चशतेन रूप्यकैः श्रेष्ठिने रणछोडलाल-शोधनाय सत्रोषणं विक्रीतम्[३७]। 'डोमीनियन स्टेटस' इत्यस्याशयश्चैभिः शब्दैः—तत्र हि ब्रिटिशसम्राज्येऽन्तः स्वराज्याधिगमो भरतवर्षोद्देशः[३८]। क्वचिदाधुनिको वाग्व्यवहारस्तैर्यथातथं परिगृह्य संस्कृतेनोपन्यस्तः। 'इतिहास के पन्नों में सोने के अक्षरों में लिखा जायेगा' इति हिन्द्यादिषु भाषासु व्यवह्रियते। एतस्यैवोपन्यासस्तैः सुरभारत्यामित्थं विहितः—तदैतिह्यपत्रेषु कार्तस्वररसेन न्यस्ताक्षरं भविष्यति[३९]। अनेकत्र तैर्विशिष्टास्ते त आङ्ग्लशब्दा-स्तत्तत्संज्ञारूपा अपि संस्कृतेनानूदिताः। सोऽयमनुवादस्तेषां स्वोपज्ञ एव, संस्कृतवाङ्मयेऽन्यत्र तदनुपलम्भात्। 'रिकाल' इत्यस्यानुवादस्तैः प्रत्याह्वान पदेन कृतः—अतः श्रीगान्धी डायरस्य प्रत्याह्वानमैवैच्छत्।[४०] 'ओपन लैटर' इत्यस्यानुवादो निरावेष्टनं पत्रमिति पदेन कृतः—राजप्रतिनिधिमुद्दिश्य लिखिते निरावेष्टने पत्रे।[४१] 'यंग इण्डिया' इतिनामकं श्रीगान्धिना प्रवर्तितं वृत्तपत्रं तरुणभरतवर्षम् इति पदेन निर्दिष्टम्,[४२] 'कैसरे हिन्द' इति च भरतवर्षराज्यमिति पदेन—राज्यमन्त्रिणस्तस्मै भरतवर्ष राज्यमिति नामिकां कीर्तिमुद्रां व्यतरन्।[४३]

---

३२. तदेव, पृ० १००
३३. तदेव, पृ० १००
३४. ,, ,, ६१
३५. ,, ,, ६१
३६. ,, ,, ११
३७. ,, ,, १३७
३८. ,, ,, ११२
३९. ,, ,, १८
४०. ,, ,, ६८
४१. ,, ,, ७८
४२. ,, ,, ७९
४३. ,, ,, ४५

'न्यू कासल्' इति स्थानमभिनवसौधमिति[४४] शब्दैर्निर्दिष्टम्। क्वचिद् हिन्दुस्तानी-भाषायामथवोर्दूभाषायामाङ्ग्लभाषायां वा प्रयुज्यमानाः शब्दास्तैस्तथा संस्कृत-रूपतामापादिता यथा ध्वनिसाम्यमर्थसाम्यं च विच्छित्तिविशेषं कमप्यावहतः। 'पेशाव' इत्यस्य स्थाने प्रस्राव[४५] शब्दः, 'एडवोकेट' इत्यस्य स्थाने चोत्तरवादि[४६] शब्द एवञ्जातीयकावेव। पञ्चायत-स्थाने पञ्चायतन[४७] शब्दोऽपि तादृश एव। क्वचिच्छौचागारस्थाने स्वोपज्ञो विट्शरण[४८] शब्दस्तैः समाश्रितः। अनेकत्र संस्कृतभिन्नाः शब्दास्तैः संस्कृतविभक्तियोगेन व्यवहृताः—पोरबन्दर[४९] मिति ख्यातम्, श्रीजार्ज[५०] साम्राज्यनुरागः, रुस्तमजिः[५१], श्रीमदूमेनो[५२]क्तम्।

संस्कृतवाङ्मयेऽधीतिनां तेषां कृते यत्र तत्र प्राचीनकृतिगतानां वाक्यानां वाक्यांशानां वा छाया यदि दृष्टिपथमवतरेत्तर्हि न तत्र किञ्चिच्चित्रम्। अधोनिर्दिष्टेषु वाक्येषु सा छाया स्पष्टमुन्मिषति—

(१) अयं महाभागः स्वहृदयानुमानेन तमपश्यत्[५३]। अत्र शाकुन्तलीयाया अनार्य! आत्मनो हृदयानुमानेन प्रेक्षसे (पञ्चमोऽङ्कः)—इति पङ्क्तेश्छाया।

(२) आत्मना देहेन्द्रियवशीकारावाप्तये क्रियमाणमनशनं क्रमिके नृणां समुत्कर्षे साधकतमं करणम्[५४]।

(३) परमिदमभ्युपेयाः स्वातन्त्र्यावाप्तेः साधकतमं करणं प्रमाथो नेति[५५]।

अत्र साधकतमं करणमिति पाणिनिसूत्रमेवातिकौशलेन समायोजितम्।

---

४४. तदेव, पृ० ३७
४५. तदेव, पृ० २९
४६. ,, ,, २४
४७. ,, ,, ६९
४८. ,, ,, २९
४९. ,, ,, २
५०. ,, ,, ६३
५१. ,, ,, ३५
५२. ,, ,, ३५
५३. ,, ,, ५६
५४. ,, ,, ८२
५५. ,, ,, ११८

(४) अहमत्रभवतो विज्ञापयेऽस्माभिः सर्वैः परमेश्वरो नो धियं प्रचोदयादिति प्रार्थनीयः[५६]।

अत्र धियो यो नः प्रचोदयादिति गायत्रीमन्त्रांशस्यच्छाया

(५) महात्मा स्वदेशजानां प्रणयं विहन्तुं नाशकत्[५७] अत्र रघुवंशीयस्य सम्बन्धिनो मे प्रणयं विहन्तुमिति (२/५८) पद्यांशस्यच्छाया।
यदि वयमात्मानं पाप्मभ्यो न पुनीमः[५८]

(६) अत्रोत्तररामचरितस्य 'पाप्मभ्यश्च पुनातु वर्धयतु च श्रेयांसि सेयं कथेति (७.२०) पद्यांशस्यच्छाया।

क्वचित्क्वचित्पितृरर्णैविरलप्रयुक्ताः शब्दा अपि प्रयोगपदवीमापादिता यत्तेषां सुरगवीशब्दकोषपाटवमभिव्यनक्ति। श्रद्धावानित्यर्थे श्राद्ध[५९] शब्दः, क्षत्रियार्थे बाहुज[६०] शब्दो याचकार्थे वनीपक[६१] शब्दो वेषार्थ आकल्प[६२]शब्दो ऽल्पार्थे दभ्र[६३]शब्दोऽध्येत्रर्थे पठक[६४]शब्दो ग्रामार्थे संवसथ[६५] शब्दश्चेत्थंविधाः शब्दास्तैः प्रयुक्ताः। कदाचिदतिकठिनाऽपि पदावली तैः समाश्रिता यत्र विद्वांसोऽपि व्यामुह्येयुः। स्थालीपुलाकन्यायेनात्रैकमेवोदाहरणं प्रस्तुमः—
कर्मणाऽसहचरितं प्रार्थनं प्रणिनददारकूटं वा निक्वणद् झल्लकं वा।[६६]

ग्रन्थप्रस्तावनारूपेणादौ दश पद्यानि तैः प्रस्तुतानि। प्रत्येकं पद्यस्यान्ते 'स वाचां विषयोऽस्ति न' इति पङ्क्तिस्तेषु विच्छित्तिविशेषमादधाति। अपूर्वः प्रवाहः पद्येषु तेषु सहृदयमनांसि बलादाकर्षति। सोऽयं प्रवाहो न केवलं

---

५६. तदेव, पृ० ९३
५७. तदेव, पृ० १०१
५८. ,, ,, १३४
५९. ,, ,, १
६०. ,, ,, २
६१. ,, ,, ५
६२. ,, ,, ११
६३. ,, ,, १३
६४. ,, ,, ९५
६५. ,, ,, १३१
६६. ,, ,, ९७

पद्येष्वेव गद्येऽपीति निर्मायं वचः। निदर्शनमत्राधः समुद्ध्रियमाणाः केचन सन्दर्भाः—

(१) एवं पुण्यशीलस्य श्रीकर्मचन्द्रस्य भार्यापि गुणैस्तस्य सदृशी बभूव। ......समृद्धिमत्यपि सा विनीतवेषा। सम्माविताऽप्यनुद्सिक्ता। उच्चैःशिरा अप्यधोदृष्टिः। कृशतनुरपि सा महासत्त्वा। नित्यं धर्मानुष्ठानेन वनीपकमनोरथप्रपूरणेन च सा स्वगृहं तीर्थतां निनाय।[६७]

(२) श्रीगान्धी खल्वनन्यसाधारणः पुण्यजनः। यतः स सन्दर्शनानि न पश्यति, श्रुतिप्रकाशश्चास्य नास्ति।.........अवदातं ह्यस्य निष्कापट्यम्। प्रशान्तमभ्रुकुटिमच्च नित्यमस्य ललाटपट्टम्। उत्सेकविविक्तं चास्य हृदयम्। एषो ह्यात्मनो मानुष्यं प्रतिपद्यते नर्षित्वम्। लोको मामृषिरिति व्यपदिशेदित्यपि स नेच्छति।[६८]

(३) नृणां श्रेष्ठो मुनिवृन्दारकवृन्दवन्द्यः स कारायां निरुद्धः कालं क्षपयति। तेन प्रवर्तितः साम्परायोऽद्याप्यनारतं प्रवर्तते। शतशोऽभिरूपाः सुकुमाराः कुमारा अनवद्यहृद्यरूपा व्युत्पत्तिमत्यः पतिवन्त्यः स्तनन्धयान्धाययन्त्यो जामयः श्रीमन्तोऽभिजनवन्तो ज्ञानवन्तः सहस्रशो युवानः स्थविराश्च सहर्षं कारानिरोधमलप्सतेति प्रतिहार्यमिव संवृत्तम्।[६९]

श्रीगान्धिचरितमिति वैयाकरणानामुत्सवः कोषकृतां रसायनं साहित्यरसरसिकानां रसाप्लावः स्वदेशानुरागिणां च स्फूर्तिसिन्धुः। तदिदं पुनरपि

---

६७. तदेव, पृ० ५

६८. ,, ,, ७३-७४

६९. ,, ,, १४३-४.

सहृदयकराङ्गुलिप्रणयितामासादयतीति परं परितोषमनुभवन् पूज्यानां प्रातः-स्मरणीयानां यावज्जीवं शब्दब्रह्मोपास्यान्ते तत्रैव लीनानां दिगन्तविश्रान्तयशसां पितृचरणानां स्मरन् तेभ्यः सश्रद्धं प्रणामाञ्जलिं चार्पयन् विरमाम्यहम् ।

निर्वाचनावसरे

(प्रो० बटुकनाथशास्त्री खिस्ते, 'श्रीनिकेतनम्' एन १६/४३
पत्रकारनगरम्, विनायका, वाराणसी-२२१०१०)

आचूडमग्ना अपि कल्मषौघे
हंसच्छदाभं वसनं दधानाः ।
निर्वाचनायोत्पतिता धरायां
गृहीतसेवा इव पूर्वदेवाः ॥१॥

स्वपक्षसंरक्षणजागरूका
विपक्षसन्तक्षणचञ्चवश्च ।
नियुद्धलग्नान् पथि ताम्रचूडान्
विडम्बयन्तः परितो भ्रमन्ति ॥२॥

दशादिविंशत्यधिकैः स्वसूत्रै-
र्विधास्यमानाभ्युदयाऽवदानैः
व्यामोहमुत्पाद्य जनस्य चित्ते
वित्तैकताना मतमाहरन्ति ॥३॥

दरिद्रता-दुःखदशाविशेषान्
निःशेषयामः शुभशासनेन ।
लब्धे पदे वः कृपयेति लोकान्
दुःशासनाः सम्प्रति वञ्चयन्ति ॥४॥

निष्पीड्य निष्पीड्य रसं धरायाः
पिचण्डिलैः खण्डितनीतिमार्गैः ।
बकव्रतैः कार्यविधौ विनम्रैः
सज्जीक्रियन्ते वचमच्छलानि ॥५॥

कपर्दिका नैव कदाऽपि दत्ता
दीनाय हीनाय जनाय येन ।
स कर्णभामप्यतिलङ्घ्य दानी
निर्वाचने कश्चन लम्बकर्णः ॥६॥

उच्चावचैः पक्षबलप्रचारै-
र्निनादिताऽशेषदिगन्तराला ।
निर्वाचनाख्यं तिमिरं किरन्ती
कालस्य कन्या विहरत्यवन्याम् ॥७॥

हे देवि ! निर्वाचनपेटिके त्वा-
मभ्यर्थयामः शृणु सावधाना ।
सुतान् पवित्रान् जनयेः स्वगर्भात्
नैशाचरी माऽस्तु तव प्रसूतिः ॥८॥

*

निर्वाचनात् प्राक्

(डा० भास्कराचार्यः त्रिपाठी, म०प्र० संस्कृत अकादेमी-सचिवः, भोपालः)

समस्तमन्दिरेषु राजते पृथक् पृथग् ध्वजः,
सखे विलोक्यताम्

ध्वजं समाश्रयन् विराजते पुरोहितव्रजः,
सखे प्रणम्यताम्

नितान्तनम्रविग्रहं समुद्वहन्नुपानहम्
नवीनचाटुचर्यया स्तवं तनुष्व प्रत्यहम्
विना परिक्रमां न सिध्यतीह मृत्तिकारजः,
सखे प्रतीयताम्

कुरुष्व वर्त्तिवेल्लनं पुनश्च तैलमेलनम्
दिशासु दीपिकाधरो विधेहि नृत्यखेलनम्
प्रकाशरेखया शशोऽपि जायतेतरां गजः
सखे परीक्ष्यताम्

स्वकीयदृष्टिरुज्ज्वला परस्य भेदविह्वला
विभातु रङ्गमञ्चके तवैव मित्रमेखला
इति प्रचीयते छविश्चिरं समुन्नतिस्रजः,
सखे निषेव्यताम्

इयं कला सनातनी समस्तदैन्यगातनी
विभीषणव्यथाकृते महौषधिः पुरातनी
वृथा छिनत्सि मस्तकं स्वकं विरोधित-प्रजः,
सखे प्रबुध्यताम्।

केचन प्रश्नाः

(डा० कपिलदेव पाण्डेयः, सी २७/१११, जगतगंज, वाराणसी-२२१००२)

विश्वं तमोनिलीनं दृष्ट्वा वसुधा पृच्छति-
ब्रूहि विवस्वन्, किं कुरुषे, किं रविधर्मोऽयम् ?
यदा कविः कश्चित् पदधनलवलोभात् कवयति
वाष्पाकुलनयना सन्तप्ता वाणी विलपति ।
कविता पृच्छति कवे, कथय किं कविधर्मोऽयम् ॥
त्यक्त्वा जनहितमहर्निशं स्वार्थं साधयते
विहरति गगने, देशविदेशेष्वटनं कुरुते ।
यदि नेता, जनता पृच्छति किं जनधर्मोऽयम् ॥
रक्षिगणं समवेक्ष्य प्रजा भीता वेपन्ते
कार्यसिद्धयो धनप्रभावात् सम्पद्यन्ते ।
नैव बुध्यते तन्त्रेऽस्मिन् किं युगधर्मोऽयम् ॥
पित्रोर्हृत्कलिका कन्या पत्युर्गृहमृच्छति
मधुरैः स्वप्नैः समं वधूर्हुतभुजमुपगच्छति ।
गार्हस्थ्यं पृच्छति निर्दय, किं पतिधर्मोऽयम् ।
चौर्ये शौर्यमसंकोचादुत्कोचग्रहणम् ॥
स्वाच्छन्द्यात् कामाचारः परदाराहरणम् ।
क्रियते यो वध्वा दाहः किं पुंधर्मोऽयम्
राष्ट्रगौरवं ज्ञानवैभवं सकलं हित्वा ।
मधुरैः स्वप्नैः समं वधूर्हुतभुजभुपगच्छति ॥
अपमानं पुरतः सम्मानं पृष्ठे कृत्वा ।
जीवति जगदगुरुः कथमपि किं गुरुधर्मोऽयम् ॥
स्वार्थान्धो मनुजोऽद्य न कञ्चित् नियमं मनुते
यथा रोचते यस्मै निर्मर्यादं कुरुते ।
मानवता पृच्छति सर्वान् किं मनुधर्मोऽयम् ॥

००

संध्यामाह विधुः

(प्रो० परमानन्दशास्त्री, सिद्धार्थ-सदनम्,
मन्दिरमार्गः, अलीगढम्)

संध्यामाह विधुः "क्षणमुपविश,
मय्यायात एव किं चलिता ?
मलिनानना सुवदने ! कस्मात्
किं छायापतिनासि च्छलिता ?

त्वं छायापतिपृष्ठे लग्ना,
चित्रं किं यदि तमसि निमग्ना,
केन तिग्मकरमनुसरता भुवि
लब्धा गतिः शान्तिसंवलिता ?
संध्यामाह विधुः क्षणमुपविश,
मय्यायात एव किं चलिता ?

सुधास्त्रुतिमुखे श्रीसहोदरे
क्षीराब्धिज - नवनीतमृदुकरे,
उदयोन्मुखे विप्रराजे मयि
किं ते दृङ् नापाङ्गैः पतिता ?
संध्यामाह विधुः क्षणमुपविश,
मय्यायात एव किं चलिता ?

अयमीदृशो भवत्या रागः
पुनरपि तथा नृशंसस्त्यागः,
वाचो मिथो मिथ्यावस्त्यज
मौनं, कथं कृपणता कलिता ?
संध्यामाह विधुः क्षणमुपविश
मय्यायात एव किं चलिता ?"

संध्या प्राह "पश्य निज कायम्
ओषधिपते ! राजरुक्छायम्,
क्षयति वर्धते नैकरूप ! ते
मूर्तिर्गुरुकलङ्कसंकलिता ।
संध्यामाह विधुः क्षणमुपविश,
मय्यायत एव किं चलिता ॥

छायापतिभासैव भाससे,
प्रायोऽपूर्णो नभसि राजसे,
उद्वेलयसि पितरमपि सिन्धुज !
ते मासिकी पूर्णता स्खलिता"
संध्यामाह विधुः क्षणमुपविश
मय्यायाय एव किं चलिता ॥

मुखेऽमृतं, हृदि कालकलङ्कः,
उष्णभावरहितोऽस्ति तवाङ्कः,
दोषापते ! प्रदोषस्थे त्वयि
कस्याः पतेद् दृष्टिरुत्कलिता ?
संध्यामाह विधुः क्षणमुपविश
मय्यायात एव किं चलिता ?

विश्वं यद्भासया चकास्ते,
येन जीवनं सर्वत आस्ते,
गायत्री सवितुर्देवस्य
रागिण्यहं सदाऽस्म्यविचलिता ।
संध्यामाह विधुः क्षणमुपविश
मय्यायात एव किं चलिता ?

मदीयं मनो मोदते संस्कृतेन

(प्रणेता—डा० चन्दनलाल पाराशरः, 'अमृतायनम्',
६२ बी, आलोकनगरम् (जयपुर हाउस) आगरा-१०)

(१)

मदीयं मनो मोदते संस्कृतेन,
मदीयो जनो वर्द्धते संस्कृतेन ।
मदीयो भवो धार्यते संस्कृतेन,
मदीयं यशो निर्मलं संस्कृतेन ॥

(२)

मदीया कथा संस्कृते भाति नित्यं,
मदीया व्यथा संस्कृते दूरमेति ।
मदीया कृतिः संस्कृते शोभमाना,
मदीया मतिः संस्कृते जीवमानाः ॥

(३)

विना संस्कृतं नैव पुष्टिर्नराणाम्
विना संस्कृतं नैव तुष्टिर्नराणाम् ।
विना संस्कृतं नैव भुक्तिर्नराणाम्,
विना संस्कृतं नैव मुक्तिर्नराणाम् ॥

»»««

तुभ्यं नमः !

(डा० शम्भुनाथ आचार्यः, हिन्दीविभागाध्यक्षः, बद्री विशाल कालेजः, फर्रुखाबादः)

पण्डिताग्र्याय तुभ्यं नमः
कालिदासाय तुभ्यं नमः ॥

तत्त्ववादाय तुभ्यं नमः
श्रीनिवासाय तुभ्यं नमः ॥

ज्योतिषे ज्योतिषे श्रेयसे
भास्कराचार्य ! तुभ्यं नमः ॥

त्वं न राजेन्द्र ! कस्य प्रियः
काव्य-शृङ्गार ! तुभ्यं नमः ॥

त्वं रमाकान्त ! कान्तोऽसि मे
स्रग्विणीराज तुभ्यं नमः ॥

काव्य - संयोजनं कुर्वते
इच्छरामाय तुभ्यं नमः ॥

गीतवृष्टिं मुदा कुर्वते
शम्भुमेघाय तुभ्यं नमः ॥

मङ्गल्या–समीक्षणम्

(आचार्यं लक्ष्मीचन्द्रकौशिकः, एम० ए० साहित्याचार्यः, बरेली-
कालेजसंस्कृतविभागस्य प्राक्तनाध्यक्षः)

अथ गीर्वाणवाण्या मुक्तककाव्यमयेऽपूर्वे चास्मिन् वाङ्मये कविवरैः साहित्याचार्यादि-विविध-विरुदावलि-विभूषितैः श्रीमदुमाकान्तशुक्लमहोदयैः सङ्गम्फिता, शतादपि पञ्चत्रिंशदधिकैर्मधुरैरार्याच्छन्दोभिर्निबद्धैर्ललितैः सरसैरपरिसीम-व्यङ्ग्यार्थाभिव्यञ्जनान्नितरां मनोहरैर्मौक्तिकैरिव प्रोज्ज्वलैश्च, प्रायशो निरवद्यैः पद्यैः संवलिता, स्वकीयां कामप्यभिनवां विशिष्टाञ्चाभिख्यां, लोकात् समुद्भूतमप्यात्मनः किमपि लोकोत्तरं विलक्षणञ्च लावण्यं विकिरन्ती, जीवनं जगच्च परितः प्रतिक्षणं विचक्षणं माङ्गल्यमादधाना, कवेरस्य प्रतिपदमनन्यसाधारणं कमपि प्रतिभाविशेषं परिस्फोरयन्ती, 'प्रियंवदा'ख्यटिप्पणी-समन्विता, 'मङ्गल्या'ऽभिधाना, मौक्तिकानां मालेव प्रकाशमाना, मुक्तकानामावलिरियं, साहित्यपाथोनिधिमन्थनोत्थं भावामृतं, परां निर्वृतिञ्चाधिजग्मुषां विदुषां, सहृदयानाञ्चाधिकण्ठमधिहृदयञ्च सम्प्रति सुतरां वाभासत इति कस्य सचेतसो न मोमुद्यतेतरां चेतः ?

मुक्तककाव्यस्य परम्परेयं संवत्सराणां सहस्रद्वयीमासीदतीति तु साहित्यस्यैतिह्य-तत्त्वविदां विमर्शः। वाङ्मयेऽस्मिन् 'गाथासप्तशती' 'अमरुकशतकम्' 'आर्यासप्तशती' 'भामिनीविलास.' इत्यादीनि विविधानि ग्रन्थरत्नानि विलसन्ति। ध्वन्यालोकस्य तृतीय उद्द्योते विषयाश्रयौचित्यस्य प्रतिपादन-प्रसङ्गे ध्वनिप्रस्थापकाः श्रीमदानन्दवर्धनाचार्याः काव्यप्रभेदेषु सर्वतः प्राक् संस्कृतप्राकृतापभ्रंशनिबद्धं मुक्तकं निर्दिशन्तस्त्रापि च संघटनाया रसानुकूलतां प्रदर्शयन्तः, कथयन्ति—"मुक्तकेषु हि प्रबन्धेष्विव रसबन्धाभिनिवेशिनः कवयो दृश्यन्ते। यथा ह्यमरुकस्य कवेर्मुक्तकाः शृङ्गाररसस्यन्दिनः प्रबन्धायमानाः प्रसिद्धा एव" (काव्यमाला संस्क०, पृ० १७५)। "मुक्तमन्येन नालिङ्गितम्। तस्य संज्ञायां कन्। तेन स्वतन्त्रतया परिसमाप्तनिराकाङ्क्षार्थमपि प्रबन्ध-मध्यवर्ति मुक्तकमित्युच्यते।' इति, "पूर्वापरनिरपेक्षेणापि हि येन रसचर्वणा क्रियते तदेव मुक्तकमिति" चात्र लोचनकाराणां निष्कर्षः।

मार्मिकाणामालोचकानां मुक्तक-स्वरूपस्यानेन तात्त्विकेन पर्यालोचनेन महाकाव्यादिषु विद्यमानस्य कथानकादेः पौर्वापर्यनिरपेक्षित्वं खल्वेवंविधस्य काव्यस्य प्रधानं वैशिष्ट्यमिति सिध्यति। अत्र प्रत्येकं पद्यं स्वभावतः स्वस्मिन्नेव परिपूर्णतामावहतीत्यन्वर्थेयं किल पूर्वापर-प्रसङ्गनिरपेक्षित्वान्मुक्तकमिति संज्ञा।

मुक्तकानामपूर्वस्य चमत्कारस्य रहस्यं विश्लेषयन् 'गाथासप्तशती'—भूमिकायां भट्टः श्रीमथुरानाथशास्त्री साहित्याचार्यः प्राह—'मुक्तके ह्येकस्मिन्नेवापरपद्यनैरपेक्ष्येण विभावानुभावादिभिः परिपुष्टस्तावान् रसोऽभिव्यज्यते यदास्वादेन सन्तर्पितचेतसः सहृदयाः सशिरःकम्पमनुमोदन्ते। मुक्तकनिर्माणमन्यकाव्यनिबन्धनापेक्षयापि सुतरां कठिनं भवतीति तद्विदामनुभवः। यतः किल महाकाव्यखण्डकाव्याख्यायिकादिषु कथानकस्य नैपुण्येन निर्वाहे पठितुर्मानसं कथारस-निलीनतया गुणदोषादिविचारे मन्थरमेव भवति। तत्र हि कथैव चेतसस्तावत् किल वशीकारिणी भवति, यावता उत्तरोत्तरघटनास्वादायोत्कण्ठितं चेतः संमुखमापतितेषु गुणदोषादिषु गजनिमीलिकया, त्वरितकारितया वा, अनिच्छया यथाकथञ्चित् प्रवृत्त्यापि शीघ्रमेव कथापरिज्ञानार्थमग्रेसरं भवति। एवंविधेषु काव्येषु मध्यवर्तिनः कियन्तोऽपि श्लोकाश्चेत् सर्वात्मनोपश्लोकनीयाः सम्पद्यन्ते, तावतैव स प्रबन्धो लोकानामभिनन्दनीयो भवति। मुक्तकानि तु प्रत्येकपद्यान्येव स्वतन्त्राणि भवन्तीति, तत्रैव रसान्वेषणलोलुपं पठितुर्मानसं व्यासज्यते; न कथा तत्रोपष्टम्भिनी भवति।…पूर्वापरनिरपेक्षे एकस्मिन्नेव पद्ये पठितुश्चेतश्चमत्काराय वाच्यार्थापेक्षया व्यङ्ग्यस्यैव प्राधान्यमास्थापनीयं भवति। अतएव एवंविध-ध्वनि-पूर्णस्य काव्यस्य निर्माता 'महाकविः' इति व्यपदेशं लभते। उक्तं हि लोचन-कारेण—"प्रतीयमानानुप्राणित-काव्य-निर्माण-निपुणप्रतिभाभाजनत्वेनैव महाकविव्यपदेशो भवती'ति।" (काव्यमाला-संस्क०, तृतीयावृत्तिः, पृ० १५-१६)।

सर्वप्रथममृग्वेदस्य संहितायाः प्रत्येकम्मण्डलस्य बहूनां सूक्तानामनेकासु ऋक्षु 'कवि'—पदं, 'काव्य'—पदञ्च, पृथक्तया वा, परस्परं संपृक्तया वा, प्रायः सर्वासामेव देवतानामृषीणां वा सम्बोधनत्वेन, विशेषणतया वा द्वैविध्यमादधानं बहुशः प्रयुज्यते। तत्र कविपदेन सह प्रयुक्तानि विविधानि विशेषणानि, कविं तस्य काव्यञ्चाधिकृत्य, वैदिकीं धारणां सुस्पष्टमभिदधति। तथाहि—

'आदित्यासः कवयः पप्रथाना' (३/५४—१०), 'अवोचाम कवये मेध्याय' (/१५-१२), '……ऋतज्ञाः। सत्यश्रुत कवयो युवान (५/५७-८), 'कवेर्दिव्यस्य' (६/३९-१), 'ऋतावान कवयः पव्र्यासः' (७/७६-४), 'कवयो मनीषिणः' (९/७३-७), कविः काव्येनासि विश्ववित्' (१०/९१-३), 'जरिता मेधिरः कविः' (१०/१००—६), 'कविरसि प्रचेताः' (१०/११०-१),

एभिर्विशेषणैरुपरिनिर्दिष्टा ऋचः कवेरदितेरपत्यत्वं, मेध्यतां, ऋतज्ञत्वं सत्यश्रुतत्वं, दिव्यत्वं, मनीषितां, विश्ववित्तां, मेधिरत्वं प्रचेतसत्वञ्च स्फुटतया निर्दिशन्ति। अतएव महर्षिणा यास्केन, "विश्वा रूपाणि प्रतिमुञ्चते कविः" (५/८१—२) इत्यादि-ऋचोभाष्ये कवेः क्रान्तदर्शनत्वं समाम्नातम्[१]। यस्य "अतीतानागतविप्रकृष्टविषयकं युगपज्ज्ञानं स क्रान्तदर्शन[२]" इत्युवटः। तादृशं ज्ञानं परमार्थतत्त्व-दर्शनात् केवलं देवानामृषीणामेव वा सम्भवति, तस्माद् ऋषित्वं, तत्त्वदर्शित्वं, कवित्वञ्च परस्परं सम्बद्धमिति वेदार्थतत्त्वविदामभिप्रायः। तथैव चोक्तमालोचकप्रवरेण भट्ट-तौतेन—

"नानृषिः कविरित्युक्तमृषिश्च किल दर्शनात्।
विचित्रभाव-धर्मांश-तत्त्वप्रख्या च दर्शनम्॥

१. स्वकीये 'Vedic Selections' इति पुस्तके श्रीक्षितीशचन्द्रचटर्जीमहोदयः 'अग्निर्होता कविक्रतुः' (१|१-५) इत्यादिमन्त्रे निम्नलिखितस्य सायणभाष्यस्य 'कविक्रतुः कविशब्दोऽत्र क्रान्तवचनः, न तु मेधाविनाम। क्रतुः प्रज्ञानस्य कर्मणो वा नाम। ततः क्रान्तप्रज्ञः क्रान्तकर्मा वा'— उपरि स्वकीये टिप्पणे (३३ पृ०) प्राह—"कविः, मनीषी, विपश्चित्, etc., are read in the Nighantu in the list of मेधाविनाम'S (Nir. iii. 15) or words denoting wise man. In Nir. xii. 13. while explaining विश्वा रूपाणि प्रतिमुञ्चते कविः R.V.v. 81-2 Yaska says : मेधावी कविः क्रान्तदर्शनो भवति, कवतेर्वा, i.e., कविः means wise, because he sees what is past and distant, what is beyond the range of vision, or it may have been derived from the root 'कु' to praise. It would appear, therefore, that acc. to Yaska मेधाविन् is explained by the words क्रान्तदर्शनो भवति and there is no contradiction between the two. Sayana, however, sometimes regards मेधाविन् and क्रान्त as two distinct senses of कवि. cf. S. under V. 11.3 and i. 117.23.

२. 'राजतरङ्गिणी' कवेरिदं क्रान्तदर्शित्वं निम्नलिखिते मनोहरे पद्ये निर्दिशति—

कोऽन्यः कालमतिक्रान्तं नेतुं प्रत्यक्षतां क्षमः।
कविप्रजापतींस्त्यक्त्वा रम्यनिर्माणशालिनः॥ इति॥

स तत्त्वदर्शनादेव शास्त्रेषु प्रथितः कविः ।
दर्शनाद् वर्णनाच्चाथ रूढा लोके कविश्रुतिः ।।'' इति ।

विश्वस्मिन् जगति निरन्तरं प्रवर्तमानाया: सततं परिवर्तन-शीलाया विविधायाश्च जीवनधाराया:, प्रतिक्षणं भिद्यमानस्य, क्षणे क्षणे च नवतामुपेतस्य, प्राकृतिकपरिवेशस्यातीव विनश्वरे, भौतिके चास्मिन् बाह्ये रूपे, यदान्तरं, शाश्वतं, सुन्दरञ्च, स्वरूपमन्तर्निहितं निगूढं च वर्तते, प्राचीनां रूढिमनुसृत्य, तदेव 'धर्म' इति पदेनाभिधीयते स्म । वैदिकपरिभाषया 'ऋत'[२], 'सत्य'ञ्चेति पदद्वयमप्येतयो: क्रमश एकतो नियमेन गतिशीलं बाह्यं रूपम्, अपरतश्च तयोरेवान्तरिकं. मनोरमं शाश्वतञ्च स्वरूपमभिधत्ते ।

'ऋषयो मन्त्रद्रष्टार' इति प्रसिद्धि: । ''साक्षात्कृतधर्माण ऋषयो बभूवु:[२]'', ''ऋषिर्दर्शना[३]दि''ति च निरुक्ते भगवान् यास्क: । अत्र 'मन्त्र-धर्म-दर्शनादि-पदानामुपरिष्टान्निर्दिष्टमेव तात्पर्यं साधीय: । कवय: 'ऋतुज्ञाः' (५/५७-८), 'ऋतावान:' (७/७६-४), 'सत्यश्रुत'श्च (५/५७-८) इति तु भगवती श्रुतिरेव प्रतिपादयति । तस्माज्जीवनस्य जगतश्च यत् पारमार्थिकं तत्त्वदर्शनं नाम ऋषिषु कविषु च, तत्तु सामान्यमेव । तादृशं परमं तत्त्वं प्रत्यक्षीकृत्य, तस्य,

---

२. 'ऋ' गतावि (भ्वा० प०)—त्यस्माद् ''गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च'' (पा०, ३—४—७२) इति कर्तरि क्तप्रत्यये, ऋतमितिपदं निष्पद्यते, प्रधानतया गतिशीलताञ्चाभिव्यनक्ति । अतएव, 'ऋतमित्युदकनाम, प्रत्यृतं भवति' (पृ० १०२), 'सत्यं वा यज्ञं वा' (पृ० १९३) 'ज्योतिषो वोदकस्य वा' (पृ० ४६०, निरुक्तम् नि० सा० संस्क०) इति निरुक्ते यास्क: । तत्रैव 'ज्योतिषो वेत्यादिवाक्यस्य व्याख्यायां पण्डित: श्रीमुकुन्दशर्मा —'ऋतमुदकं ज्योतिश्च इयर्तीतिसत: ।' ''ऋत (rta) means the regular order of nature, such as the unvarying couse of the sun and the moon, and the seasons; then on one hand the regular course of sacrifice (rite); on the other, moral order (right), a sense replaced in Skt. by dharma. Agni is specially the guardian of rta in the ritual sense, because the sacrificial fire is regularly kindled everyday; Varuna is specially the guardian of rta in the moral sense.'' MACDONELL, Vedic Reader, p. 9.

२. द्र०, पण्डितश्रीमुकुन्दशर्मणा सम्पादितं निरुक्तम् नि० सा० संस्क०, १९३०, पृ० ५२।

३. तदेव, पृ० ८३ ।

मनोरमायां लोकोत्तरायाञ्च वर्णनायां यत् सम्यङ् मार्मिकञ्चाभिव्यञ्जनं तत् कवीनामेवासामान्यं प्रातिस्विकञ्च वैशिष्ट्यम् । अतएव भट्टतौतः प्राह—

"तथा हि दर्शने स्वच्छे नित्येऽप्यादिकवेर्मुनेः ।
नोदिता कविता लोके यावज्जाता न वर्णना ॥" इति ।

एवमेव मम्मटाचार्यैरपि काव्यप्रकाशस्य प्रथम उल्लासेऽभ्यधायि—'विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद् वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोग कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ।" इति (का० प्र०, वामनाचार्यझलकीकरस्य, षष्ठ संस्क०, पृ० १०) ।

भट्टनायकस्तु पर्यालोचयति यन्निरन्तरं कठोरानवरतस्वसाधनावलाल्लब्धो योगिनः स समाधिरसस्तस्य काव्यरसस्य तुलां कथमपि नाध्यारोढुमर्हति, यं दिव्यमानन्दरसं स्वकीयस्य प्रियवत्सस्य कवेस्तृष्णया स्वयमेव प्रस्नुवाना वाग्धेनुरनायासमेव वात्सल्यवशात् तस्मै प्रददाति—

"वाग्धेनुर्दुग्ध एतं हि रसं यद् बालतृष्णया ।
तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि यः ॥" इति ।

"सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्" (ध्वन्या० १/६), इत्यत्र, "...वस्तु सुकवेः । सरस्वत्यैवैषा घटयति यथेष्टं भगवती" (ध्वन्या०, ४/१७) इत्यत्र च कवेर्निर्मलायां झटिति तत्त्वार्थदर्शनशीलायामपूर्ववस्तुनिर्माणक्षमायां नवनवोन्मेषशालिन्यां विशदायाञ्च प्रतिभायां जीवनस्य जगतश्च पूर्वोक्तं वस्तुतत्त्वं विद्युदुन्मिषितमिव, सहसैव परिस्फुरति, विद्योतते च बहुश इति प्रदर्शयतां ध्वनिकाराणामप्येवंविधैव वाचोयुक्तिरिदमेव चाकूतम् ।

तदिदं काव्यं केनापि विशिष्टेतिवृत्तेन सह निबद्धमनिबद्धं वेति कृत्वा महाकाव्यत्व-खण्डकाव्यत्वादिना रूपेण, मुक्तकरूपेण च द्वैविध्यमापद्यत इति प्रागेवावेदितम् । तत्र काव्यस्य प्रथमे रूपे कस्यचिद् दिव्यस्य, दिव्यादिव्यकुलीन-कुलोद्भवानां धीरोदात्तादीनां नायकानां नायिकानां वा प्रख्यातं वृत्तं महता समारोहेण व्यावर्ण्यत इति तु विदन्त्येव विद्वांसः ।

एवंविधानां जनानामादर्शोन्मुखस्य, दिव्यस्य, भव्यस्योदात्तस्य च कथावस्तुनः कठोरात्, कवेः प्रतिभाया निगडभूताच्च, बन्धनाद् विनिर्मुक्ता, मुक्तकानां काचित् पुरातनी परम्परेयं ख्रिस्तीयसंवत्सरस्य प्रथमे शतके, 'गाथासप्तशते'राविर्भावकालादारभ्य, साधारणजनतायाः सहजं, लौकिकं प्राकृतञ्च जीवनं स्वप्रतिपाद्यविषयत्वेन स्वीकृत्य, तज्जीवनस्य वास्तविकं याथार्थ्यमभिव्यनक्ति स्मेति महतः सौभाग्यस्य प्रमोदस्य च विषयः ।

एवंविधेन संविधानकेन, जनताया जीवनस्य लौकिकं प्रेम, नानाविधाः सूक्ष्मा विचित्राश्च भावाः, मुक्तकेऽस्मिन् काव्ये प्रतिबिम्बिताः सन्तः, किमपि मधुरं वैदग्ध्य-भङ्गी-भणितिप्रयुक्तं वक्रत्वं, कमपि मनोरमं भङ्गिमानं, कामपि विचक्षणामभिव्यक्तेः प्रौढिं सुषमाञ्चाभजन्तेति निश्चप्रचम्। वस्तुतः सर्वप्रथममेषु मुक्तकेषु पद्येष्वेव प्रबन्धकाव्यानां तं कृत्रिममौपचारिकं, परिमितं, प्रायेण काल्पनिकञ्च भावसीमानमपहाय, लौकिकं काव्यमिदं तामपरिमितामतिविस्तृताञ्च सर्वसामान्यां, मानवीयां भावभूमिमध्याचक्राम, यत्र वाङ्मयव्योम्नि सत्यमशेषशेमुषीसम्पन्नानां, सिद्धवाग्विभवानां बहूनां कवीनामप्रतिमं प्रातिभं ज्योतिर्विविधाभिर्भङ्गीभिर्विलक्षणाभिश्च च्छटाभिः सुतरां समुद्भासते स्म।

"देवस्य पश्य काव्यं न ममार न जीर्यति" (अथर्ववेदः, का०-१०, अ०-४, सू० ८-३२) इति श्रुतेरादेशः। अत्र 'देवस्य काव्य'मिति पदद्वयेन काव्ये देवसम्बन्धित्वं दिव्यत्वं वा, 'न ममार', 'न जीर्यति' इति वाक्याभ्यां तस्य दिव्यताया हेतुद्वयं लक्षणं वा निर्दिश्यते। यद्धि 'न जीर्यति', तत् सदैवाभिनवाभिर्यौवनच्छविभिः सौन्दर्यच्छटाभिश्च समृद्धं भवति; यच्च 'न म्रियते' तच्छाश्वतममृतत्वमधिगच्छति। तदेव च तत्त्व-द्वयं कस्मिन्नपि काव्ये दिव्यत्वममृतत्वञ्चादधातीत्यस्याः श्रुतेरभिप्रायः प्रतीयते। अथैवंविधं काव्यं कुत्र दृष्टम्? इति जिज्ञासायां, स्वयं श्रुतिरेव खल्वेवंलक्षणस्य काव्यस्य निदर्शनमिति केषाञ्चिद् विपश्चितामभिमतम्।[1] किन्तु ऋक्संहिता तु प्रसङ्गेऽस्मिन् किञ्चिदन्यदेव रहस्यं समुद्घाटयति। तत्र दशमे मण्डले बृहदुक्थो वामदेव्य ऋषिः कथयति—"देवस्य पश्य काव्यं महित्वाद्या ममार, सः ह्यः समान" (५५-५) इति। अर्थात्, यो ह्यस्तावदतीव सजीवः सप्राणश्चासीत्, स एवाद्य पञ्चत्वमुपगत, इत्यहो! महान् महिमा देवस्य महेन्द्रस्य!! एतदेव च तस्य देवस्य महत्काव्यमिति! महाकवेः कालिदासस्य—"मरणं प्रकृतिः शरीरिणां विकृतिर्जीवनमुच्यते बुधैः" इत्यादिपद्येऽस्या ऋचः प्रतिध्वनिरिव श्रूयते। अत्र वामदेव्य ऋषिर्मरणमपि देवस्य महत्काव्यमिति मन्यते!

---

१. "परमेश्वरीय-ज्ञानलक्षणं वेदञ्चापि काव्यत्वेनैवानुगृह्णाति श्रुतिः—'पश्य देवस्य काव्यं न ममार न जीर्यति' (वेदः)। 'देवस्य काव्य' मित्यत्र काव्यपदं वेदमभिधत्ते। इत्यनेनैतदभ्युपपन्नं भवति यत् कविभिः काव्यकलाप्रेरणा किल वेदेभ्य एव समासादिता। वेदेभ्य एव च च्छन्दसां परिज्ञानम्, अलङ्काराणां परिचयः समाकलितः।" इति 'संस्कृत-साहित्य-विमर्शे' (पृ०, २४१) कविराजश्रीमदाचार्यपण्डितद्विजेन्द्रनाथशास्त्रिणः।

तस्मादुपरिनिर्दिष्टयोर्मन्त्रयोः सामञ्जस्येनैतत् सिध्यति यज्जगतो मानवीय-जीवनस्य च यदप्यखिलं पारमार्थिकं तत्त्वं, यच्च तयोः परमं सौन्दर्यं, तस्य मर्मस्पृशा मनोरमेण च प्रतिपादनेनैव कस्मिंश्चित् काव्ये दिव्यत्वममृतत्वञ्चाधीयते ।

जीवनं जगच्च निरन्तरं परिवर्तमानाभिर्देश-काल-व्यक्ति-परिस्थित्यादीनामत्यन्तं विशिष्टाभिरपरिमिताभिश्च सीमाभिः सर्वतः परिच्छिन्नं भवति । जीवनस्य महोदधावस्मिन् क्वचिन्मधुर-मसृण-मुग्ध-स्निग्ध-ललित-प्रशान्त-मनोहराणां रागानुराग-विरागादि-भावानां लहर्यः समुल्लसन्ति; अन्यत्र दारुण-दुर्घटनावशाद्, दुर्दान्त-दुर्दैव दौरात्म्याद् वा निरवध्यसीमासह्यागाध-कारुण्य-परिपूर्णानां घनीभूतानां मानवीय-संवेदनानामुद्दामाः कल्लोला अनिशं भृशञ्च परिखेलन्ति; अपरत्र दैन्य-दारिद्र्यादि-दुर्दशा-ग्रस्तानां विवशनिरीहासहाय-शोषित-दुर्बलानां मनुजनुषामदम्य-दुरन्त-कुण्ठा-सन्त्रासाक्रोशयातनादि-महोर्मीणां बीभत्सो भीषणश्च विस्फूर्जथुरजस्रं जरीजृम्भते । एवं मानवजीवनस्य परिवेशोऽयं दिक्कालपरिस्थित्यादीनामानन्त्याद वैविध्याच्च कदाचित् कमनीयो मनोरमः कदाचिद् भयानको बीभत्सश्च प्रतीयते । तथैव, तस्मादेव कारणाच्च प्रकृतेः परिवेशोऽपि वैविध्यमानन्त्यञ्च परिदधाति । तयोरतिविशिष्टेऽस्मिन् सविधानके सहृदय-हृदयैकसंवेद्यं कवीनां प्रतिभाविशेष-प्रसादादुपलभ्यमुपर्युक्त-योर्मन्त्रयोरुपरिनिर्दिष्टन्तत् पारमार्थिकं तत्त्वमनुपम सौन्दर्यञ्चान्तर्निविष्टं, सर्वथा निगूढञ्च वरीवर्तते । कवेः कापि तत्त्वार्थदर्शिनी विचक्षणा शेमुषी स्वकीयया प्रौढयाऽनल्पया च कल्पनया, जीवनस्य जगतश्च तेषां नानाविधानां तत्राधिष्ठितं पूर्वोक्तं तदप्रतिमं सौन्दर्यं, तान् विचित्रान् भावान्, तां सूक्ष्मां गभीराञ्च विचार-परम्परां, निजेन विलक्षणेन प्रातिभेन चक्षुषा[1] प्रत्यक्षीकृत्य, यथासामर्थ्यं स्वकीयायां विशिष्टायामपूर्वायाञ्च शब्दार्थ-संयोजनायां, 'विन्यास-विशेषभव्यतया'[2] तथा निबध्नाति, यथा तत्र पूर्वोक्तं तन्निगूढं रहस्यजातं, काव्यस्य तदात्मतत्त्वं शतकृत्वः सहस्रकृत्वश्च बहुधा विद्योतते ।

---

१. आचार्यमहिमभटः कवेः प्रतिभां 'भगवतस्तृतीयं चक्षु'रिति कथयति—

सा हि चक्षुर्भगवतस्तृतीयमिति गीयते ।
येन साक्षात्करोत्येष भावाँस्त्रैकाल्यवर्तिनः ॥"

२. "यानेव शब्दान् वयमालपामो यानेव चार्थान् वयमुल्लिखामः ।
तैरेव 'विन्यास-विशेष-भव्यैः' सम्मोहयन्ते कवयो जगन्ति ॥"
इति 'शिवलीलार्णवे' (१/१३) महाकाव्ये श्रीनीलकण्ठदीक्षितः ।

एवंविधा कवेः क्वापि लोकोत्तरा संविदियं निजां कामपि प्रौढिं, स्वोपज्ञं किमप्यगाधं गाम्भीर्यम् अतीव सम्मोहकं किमपि सान्द्रं माधुर्यं, सर्वातिशायि किमप्यद्भुतं सौन्दर्यञ्च संबिभर्ति । अत्र जीवनस्य जगतश्च याथार्थ्येन संरूपितं महाकवेरस्य यद् दिव्यं प्रातिभं ज्योतिर्विश्वात्मन आन्तरेण ज्योतिषा सार्धं तादात्म्यमश्नुते । येन स्वभावत एव तादृशं संविद्विशेषमभिव्यञ्जयत्यम-दानन्दतरङ्गितान्तरङ्गोल्लास-विलास-समुच्छ्वसिते, तथाविधे तस्य पद्यबन्धेऽनु-रणनस्वरूपाणामनन्तानां प्रतीयमानार्थानां सार्थाः, गुणानामलङ्काराणाञ्च समुदाया अहमहमिकया परापतन्ति । कविप्रतिभायाश्चापृथग्यत्न[1]—निर्वर्त्यत्वात् कामप्यद्वितीयामेव सुषमाञ्चाविष्कुर्वन्ति ।

तत्काव्यस्य तां तादृशीमसंख्यैः संख्यानैः समन्वितामभिख्यां दर्शं दर्शं, पायं पायं च तदधिष्ठितां मधुरिम-सुधां, हृदयसंवादवलात् तन्मयीभवनेन, सहृदयाः, स्वसंवित्सतत्त्वां कवेस्तां संविदं सस्पृहं, सादरञ्च समास्वादयन्ति; विगलित-वेद्यान्तरं परमानन्दञ्चाधिगम्य कृतकृत्या धन्यधन्याश्च भवन्ति । इदमेव कविसहृदयाख्यं तत् सरस्वत्यास्तत्त्वं यस्य विजयाशंसा 'ध्वन्यालोक-लोचनस्य' मङ्गलचारणात्मके 'अपूर्वं यद्वस्तु' इत्यादि पद्ये, 'सरस्वत्यास्तत्त्वं कविसहृद-याख्यं विजयतादिति' वाक्येन श्रीमदभिनवगुप्ताचार्यपादैरपि विहिता ।

समासतो दिक्कालाद्यनवच्छिन्नायाः सर्वविधसीमारहितायाः सामान्य-मानवीयभावभूमेरानन्दमयी 'मानसी साक्षात्कारात्मिका' प्रतीतिरेव कस्यापि काव्यस्य विलक्षणायाश्चमत्कृतेः परमं रहस्यम् । मुक्तकेन काव्येनेतिवृत्तादि-सीम्ना यदतिक्रमणं नाम तत्तु प्रागेव निर्दिष्टम् । निजायामभिव्यक्तावपि मुक्त-काख्यं काव्यमिदं शब्दसंयोजनायामभिधेयलक्ष्याद्यर्थानां सीमानमतिक्राम्यति । तस्मादतिक्रमणात्तथाविधे काव्ये शब्दार्थावुपसर्जनीकृत-स्वार्थौ स्वातिरिक्तं, तदनलङ्कृतमलङ्कृतं वाऽर्थान्तरमभिव्यङ्क्तस्तमेवार्थं ध्वनेराद्धान्तस्य धौरेयाः क्रमशो वस्तुध्वनिरलङ्कारध्वनिरिति पदाभ्यां निर्दिशन्ति । अतीव सूक्ष्मस्य चीनांशुकस्यावगुण्ठनेन किञ्चित्संवृतं, किञ्चिच्च विवृतं, सौन्दर्य-सार-श्रियाः कस्याश्चिद् रमण्या मुखचन्द्रस्यानुपमं रामणीयकमिव, वाक्यार्थस्य व्यङ्ग्यार्था-भिव्यञ्जन-तत्परं, सूक्ष्मं व्यवधानमधरीकृत्य, काव्येऽस्मिन् सहसा समुद्द्योतितं, वस्त्वलङ्कारध्वनीनामिदमलौकिकं सौन्दर्यं झटिति सहृदयानां चेतश्चमत्करोतीति निश्चप्रचम् ।

---

१. 'ध्वन्यालोकस्य' द्वितीय उद्द्योतेऽलङ्काराणामपृथग्यत्ननिर्वर्त्यत्वं निम्नलिखितायां कारिकायां प्रतिपादितम्—

"रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः ।। (२-१७)

अनुभूति-पक्षेऽपि, मुक्तकेऽस्मिन् काव्ये, स्वभावतो देश-काल-व्यक्त्यादि-सापेक्षाणामनन्तानां लौकिकानां भावानां साधारणीकरणप्रक्रियया, कृत्स्नं पूर्वोक्तं सीमानमतिक्रम्य, सामान्य-मानवीय-भाव-भूमेः, स्वरूपञ्चाङ्गीकृय, सहृदयानामञ्जसा यदाह्लादमय्या अनुभूतेर्विषयत्वं सम्पद्यते, तदप्युपरिष्टाद् विशदीकृतमेव । तस्मात् पुरातनैराचार्यैः काव्यस्य लोकसमुद्भवापि या 'लोकातिक्रान्तगोचरता' समाम्नाता मृत्युत्वेऽपि कवीनां यच्च 'क्रान्तदर्शित्वं प्रदर्शितं, तत्सर्वमध्ययनेन मुक्तककाव्यानां सूक्ष्मतया, परमार्थतया चानुशीलनेन, पर्यालोचनेन च प्रमाणितं भवति । मुक्तकमिदं काव्यस्योत्तमोत्तमां कोटिमाटीकत इत्यपि 'ध्वन्यालोके' तल्लोचने च, रुद्रट-मम्मट-भोजराज-विश्वनाथादिभिरलङ्कार-शास्त्रस्य धुरन्धरैराचार्यैः स्व-स्व-लक्षण-ग्रन्थेषु, गुणमुग्धतया, प्राकृतभाषायां निबद्धाभ्योऽपि, 'गाथासप्तशतीतो' ध्वनिकाव्यस्योदाहरणत्वेन, सादरं समुद्धृताभ्यो गाथाभ्य एव सिध्यति ।

मुक्तककाव्यस्योपरि पर्यालोचितैः सम्पूर्णैरेव वैशिष्ट्यैः प्रतिपदं प्रतिपद्यञ्च शोभमाना, तद्व्यतिरिक्तमप्यात्मनः किञ्चिद् वैलक्षण्यमभिव्यक्तेः प्रतिपाद्यविषयस्य च कामप्यभिनवां दिशं निर्दिशन्ती, श्रीमदुमाकान्तशुक्लमहोदयस्य 'मङ्गल्या'भिधाना कृतिरियं, पञ्चत्रिंशदधिकैकशतमिताभिर्मधुराभिर्गम्भीराभिश्चार्याभिः समुद्भासिता, क्वचित् कलेवरेण कलितलाघवाऽपि, प्रियतमविरहविधुर-मधुराननश्रीः क्षामक्षामा, प्रेयसी तन्वीव, स्वकीयां कामपि विलक्षणमेवाभिख्यामादधाति; अन्यत्र सम्मिलन-रस तरङ्गितान्तरङ्गा प्रोत्तुङ्गा भावभूमिकामध्यारूढा, मान्मथोद्भेदविजृम्भमाण-विविधानिर्वचनचीयसुकुमारभावनासु सलीनतया भ्रूविलासगात्रविकारपुरस्सराभिरनन्ताभिः प्रतिक्षणं भिद्यमानाभिर्यौवनच्छविभिः सौन्दर्यप्रभाभङ्गीभिश्च सर्वतः सन्दीप्तेव प्रतिभाति; अपरत्रापरिमितागाध-कारुण्यमहोदधौ निमग्नोन्मग्नाऽरुन्तुदव्यथाकथास्वतीव विह्वला दरीदृश्यते । कुत्रचित् प्रकृतेरपि संश्लिष्टं मानवीयभावनाभिश्च सम्पृक्तं, सजीवं चित्रणं प्रस्तौति । क्वापि च मार्मिकाभिरान्योक्तिभिस्समासोक्तिभिश्च बाभासते । कविना स्वकीयां कवितामधिकृत्य काचिदभिनवा विचारसरणिरप्यत्र प्रकाशिता वर्तते तस्मात् 'देवस्य पश्य काव्य' मित्यादिश्रुतेर्व्याख्यायां प्रतिपादितेन नयेन, जीवनस्य जगतश्च पूर्वनिर्दिष्टं तन्निगूढं परमार्थं सौन्दर्यञ्च साक्षात्कुर्वती, निजेन मनोहरेण केनापि संख्यानेन सम्यक्तया विवृण्वती 'मङ्ल्ये'यं नूनं किमपि दिव्यत्वममृतत्वञ्चावहतीत्यस्मदीयं मतम् ।

इयं मङ्गल्या हि 'ध्वन्यालोकस्य' मङ्लाचरण'श्लोके निर्दिष्टं किमप्य-

---

१. द्र०, 'ध्वन्यालोकः' (का० मा०, संस्क०, पृ० १) :—

'अपूर्वं यद् वस्तु प्रथयति विना कारणकलां,
जगद्ग्रावप्रख्यं निजरसभरान् सारयति च ।

पूर्वमेव वस्तु प्रथयति, क्रमात् प्रख्योपाख्या-प्रसरसुभगञ्चेदं ग्रावप्रख्यं जगन्निजरसभरात् वस्तु सारयति भासयति च; अत एवात्र कविसहृदयाख्यस्य सरस्वत्याः परमतत्त्वस्य सम्पूर्णो विजयः सुचारुतया निष्पन्न इति विदाङ्कुर्वन्तु विद्वांसः। अस्य विजयस्य मूलभूतं तत्त्वन्तु कवेः प्रतिभया सह सहृदयस्य भावयित्र्याः प्रतिभायाः सम्पर्क एव। तस्मात् 'कल्याया' मङ्गलाचरणेऽधोऽङ्कितार्थ्याऽपि चरितार्था भवति—

"यत्सम्पर्काद्वाणी कवितारूपं करोति भङ्गीभिः।
तत्सहृदयाङ्घ्रिधूलिं सश्रद्धं मस्तके कुर्वे॥"[1] इति

अस्यां मङ्गल्यायां खलु शुक्लमहोदयस्य प्रतिभा-सुपर्णी, सर्वविधबन्धनेभ्यः सीमाभ्यश्चोन्मुक्ततयाऽपारे, मुक्तक-काव्याकाशस्य विस्तरे, स्वकीयानि प्रबलानि स्फूर्तिमयानि कल्पना-पतत्त्राणि धुन्वाना, परोक्षाण्यदृश्यानि क्षेत्राण्यवगाह्य, सहृदयेभ्यः कस्मादपि दिव्यलोकात्तं दिव्यमानन्दरसामृतमानयति, यदुपलभ्य, ते युगपदाप्यायिताः कृतार्थाश्च भवन्ति।

ऋक्संहिताया एकस्यामृचि वसिष्ठ ऋषिः सूक्तरचना-विधिं सविस्तरं निर्दिशति—"यो वो गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद्धारयच्च" (७/६४-५) अर्थाद् वाग्देवताप्रसादावेशानुप्राणितः कश्चिद् विपश्चिदृषिः स्वमनीषया विश्वस्य परमं रहस्यमधिगम्य, सर्वप्रथमं, किमपि सूक्तं ('मनसा तक्षत्') मनसा संतक्ष्णोति, ततश्चोर्ध्वीभूतं तद् गुणालङ्काररसादि-सम्पद्-विशिष्टेष्वभिनवेषु शब्देष्वनुनिबध्नाति (ऊर्ध्वां धीतिं कृणवत्') अन्ते च ऋक्षु तदनुपमं परमञ्च रहस्यं सुरक्षितं कुरुते (धारयच्च')। अस्याः सूक्त-संरचनाया यः परिणामः सञ्जायते, तमप्यन्यस्यां कस्याञ्चिदृचि दीर्घतमा ऋषिरुल्लिलेख। तथाहि-"नव्यन्नव्यं तन्तुमा तन्वते दिवि समुद्रे अन्तः कवयः सुदीतयः।" इति (ऋग्वेदः, १/१५९-४)। फलतश्च—"सुपर्णं[2] विप्राः कवयो वचोभिरेकं सन्तं

क्रमात्प्रख्योपाख्या प्रसरसुभगं भासयति तत्,
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयतात्॥"

१. कल्या, ६॥

२. ऋग्वदे, 'द्वा सुपर्णा' यत्रा सुपर्णा अमृतस्य भागम्' दिव्यः स सुपर्णो गरुत्मान्' 'वयः सुपर्णा' 'एकः सुपर्णः स समुद्रमाविवेश' इत्यादिषु ऋक्षु 'सुपर्ण' इति पदं जीवात्मानं, परमात्मानमादित्यरश्मिं' गरुत्मन्तं वायुञ्चाभिधत्ते

बहुधा कल्पयन्ति ।" (ऋग्वेदः, १०/११४-५) इति श्रुतिः कविभिर्निजाभिरनेकाभिर्वचोभङ्गीभिरेकस्यैवान्तर्यामितया जगत्यनुप्रविष्टस्य 'सुपर्ण"-तत्त्वस्य अर्थात्, परब्रह्मणो, वृहतः शाश्वतस्य च सौन्दर्यतत्त्वस्य वा बहुधा कल्पनं समाम्नाति । 'मङ्गल्याया' आर्यास्वपि ऋक्ष्विव, सैव वैदिकी प्रक्रियाऽनुसृतेति प्रतिभाति । अत्रापि कवेरस्यैकैव सा सौन्दर्य-भावना, कारुण्यभावना वा निमित्त¹भेदाद् बहुषु विविध-रूप-निर्माणेषु बहुशो विवर्तते । एवंविधस्य सुललितस्य रूप-निर्माणस्य निर्देशोऽपि निम्नलिखिताभ्यामार्याभ्यां सुचारुतया कविना स्वयमेव कृतः—

"कविता शाब्दी मूर्तिः पूज्यत एव प्रतिष्ठिता यदि सा ।
कुरु यत्नं तद्वपुषि रूपे ललिते च निर्माणे ॥²"
"सौन्दर्यं परितो मां कृतसौन्दर्यावगाहनश्चाहम् ।
यदि वाञ्छसि तत्पातुमुपविश मे चेतसि क्षणकम् ॥³

लौकिकीयं कविता क्रौञ्चवधस्यारुन्तुदादतिक्रूराच्च व्यतिकरादादिकवेर्महर्षिवाल्मीकेरप्रतिमापरिमित-गम्भीर-कारुण्यभावनामध्याक्रान्ताया दिव्यप्रतिभायाः सहसोन्मेषात् प्रादुर्भूतेत्यैतिह्यन्तु किलातिरोहितमेव मतिमताम् । 'मङ्ल्या'यामपि 'कल्ये'ति शीर्षकालङ्कृते मङ्गलाचरणे "वन्दे प्रसन्नमधुरामाद्यकवेस्तां वियोगजां करुणा" मित्यादिपदैरेतदेवैतिह्य सङ्केतितम् । एतमेवार्थं कवितााया आत्मपरिचयेऽपि कविर्निम्नाङ्कितैः शब्दैः प्राह—

"करुणाऽऽख्या मे माता विरहो जनकः सहोदरः शोकः ।
उत्कलिका च वयस्या कविताऽहं चञ्चला बाला ॥"⁴

अत्र कवेर्मुग्धमुग्धाऽधो निर्दिष्टा याचनापि प्रासङ्गिक्येव—

"अश्रुकणं त्वां याचे करुणावरुणालयं च याचे त्वाम् ।
उत्कलिकां त्वां येन काव्यलता स्यात् सुपल्लविता ॥"⁵

"अत्र बहून् याचते कविः । एकमश्रुकणमपरं करुणावरुणालयमितरञ्चोत्कलिकां याचते । काव्यलता-पल्लवनेऽश्रुकणादीनां कारणत्वमिति तद्विश्वासः"

व्युत्पत्तिनिमित्ताद् दिव्यं सौन्दर्यतत्त्वमप्यनेन 'सुपर्ण' इति पदेनाभिधातुं शक्यते अतएव 'सुपर्णं विप्रा' इत्यादि श्रुतिः काव्यस्वरूपेऽपि संगच्छते ।

१. द्र०, "एको रसः करुण एव निमित्तभेदात्" इत्युत्तररामचरिते भवभूतिः ।

२. काकली—५ ।।   ३. उदन्या—२ ॥
४. काकली—३ ॥   ५. उदन्या—१ ॥

('प्रियंवदा')। तस्मात् संस्कृतकविताया अक्षय्यमाद्यं स्रोतः कारुण्यभावनाऽप्येतासु 'मङ्गल्याया' आर्यासु मौलिकी प्रेरणाभूमिरिति निर्विवादमभिधातुं शक्यते। स्वकीयां पीडामधिकृत्य, 'शोकः श्लोकत्वमागतः' इति रामायणस्य (बाल० ३/४०) सूक्तिञ्चोद्धृत्य 'ललामके' कविर्ब्रवीति—

"कारुण्यं गृहमस्या बाष्पो रमणस्तथा स्मृतिः सुषमा ।
नन्दत्वनन्तकालं पीडा मे प्राप्तसम्बन्धा ।।
पीडाङ्कुरमुद्भूतं रक्षत रक्षत कवित्वतत्त्वज्ञाः ।
यत्संस्पृष्टा वाचः स्फुरन्त्यसंख्येयसंख्यानैः ।।"[1]

एतदप्यार्याद्वियं पूर्वोक्तमेवार्थं समर्थयतीति तु सुस्पष्टमेव।

पूर्वं निर्दिष्टैः कुण्ठासंत्रासयातनादिभिर्विविधैर्हेतुभिः प्रादुर्भूता, विश्वस्य जगतो विश्वेषां प्राणिनां नानारूपा, सीमारहिताऽनन्ता च पीडेयं यदाऽपूर्वप्रतिभा-समन्वितस्य कवेरस्य विशिष्टां संविद्भूमिमध्यारोहति, तदा सा तस्यै स्वकीयैव पीडा प्रतीयते, तटस्थभावेन ममत्वादिसीमाराहित्येन च समवलोकिता पीडेयं जगत्यनिशमनुभूयमानस्यानन्तदुःखस्य सान्निध्यात् कारुण्यभावनायाः स्वरूपं धत्ते, आनन्दरूपायाश्चानुभूतेर्विषयत्वमापद्यते। ममत्वादिसीमाजन्यं हि सर्वमपि दुःखमिति सम्भवदुक्तिकं प्रतिभाति। यदा च तत् साधारणीकरणान्ममत्वरहितायां परिमित-प्रमातृभाव-विरहितायाञ्च भावभूमौ साधारण्येनानुभूयते तदा तस्यानन्दरूपतया परिणतिः सहजा स्वाभाविकी चेति पीडायामप्यानन्दमयताया रहस्यम्, तदेव च शोकः श्लोकत्वमागतः इति वचोऽपि सारवद् भवति। अतएव "नन्दत्वनन्तकालं पीडा मे प्राप्तसम्बन्धे"ति कवेर्वाचोयुक्तिरपि सङ्गच्छते। पूर्वमुद्धृताया अस्या आर्यायाः पूर्वार्धे 'कारुण्यं गृहमस्याः' इत्यादिभिः पदैरस्या पीडायाः सम्बन्धप्राप्तेर्विवरणमपि प्रस्तूयते। ततश्च पीडाङ्कुरप्रादुर्भावस्य कथा काव्यतत्त्वज्ञैश्च तत्संरक्षणस्य प्रार्थना, तस्याः पीडायाः संस्पर्शाच्च वाचामसंख्येयसंख्यानैः परिस्फुरणमिति सर्वमपि युक्तियुक्तमेव प्रतिभाति। भावावेशवशाद् वाचामेवंविधस्य परिस्फुरणस्य कानिचिन्मर्मस्पृङ्मनोरमाणि निदर्शनान्यत्र स्थालीपुलाकन्यायेनाधस्तात् समुद्ध्रियन्ते—

"निर्वेदस्तु सतीर्थ्यः पीडा भार्या सखी च मे करुणा ।
बन्धुः स्फीतो बाष्पश्छन्नं च मनोमयं राज्यम् ।।"[2]
"सोऽस्मि ततो हतभाग्यः सकृदेवापः समागता यत्र ।
स्मृतिसिकताशतरेखाः सन्ति न सरसाः पुनर्धाराः ।।"[3]

---

१. ललामकम्—१, २ ।। २. कोलम्बकः—३ ।।
३. कोलम्बकः—२ ।।

"अधरे स्मितजह्नुसुतां करुणा-यमुनां सरस्वतीं स्निग्धाम् ।
विभ्राणा कासि शुभे तीर्थतटी, गीतिका पीडा ?"[१]
"त्वं पीडाहं विरहः करुणा त्वं शोकसागरश्चाहम् ।
त्वं कवितासि रसोऽहं रेखा त्वं चित्रपट्टोऽहम् ।।[२]
निर्वापिताः प्रदीपाः विरसा नद्यस्तटाश्च निपतन्तः ।
हन्त ! कथामतिगूढां ब्रुवते चित्तस्य विवशस्य ।।[३]

प्रकृतिं मानवजीवनञ्चाधिकृत्य सौन्दर्यभावनाया वैविध्यमप्यस्यां मङ्गल्यायां दर्शनीयं मनोहरञ्च संवृत्तम् । तथाहि—

"नूतनपल्लवरागं पाटलगन्धं वसन्तलावण्यम् ।
आसवसक्तं कृत्वा रचिता सौन्दर्यसीमाऽसौ ।।"[४]
"मन्दो मन्दः पवनो रम्या रजनी सुगन्धसञ्चाराः ।
नेत्रैः पेया ज्योत्स्ना त्वत्स्मरणं मरणमेवाद्य ।।[५]
"कूजति कोकिलसार्थो गुञ्जति भृङ्गावली च मधुमत्ता ।
मन्ये पल्लविता स्याद् वल्ली काऽप्यद्य सम्भ्रान्ता ।।"[६]

अत्र सर्वेष्वपि पद्येषु पूर्वार्धे सम्मोहकः प्राकृतिकः परिवेशस्ततश्चोत्तरार्धे तं दर्शं दर्शं सहृदयानां यादृशी मनोदशा सम्पद्यते, सापि, विशदार्थाभिव्यञ्जन-प्रवणेन शब्दलाघवेन, निपुणतया निर्दिश्यते । प्रथमे पद्ये 'आसवसक्तं कृत्वे'ति पदाभ्यां प्रकृतेः पूर्वनिर्दिष्टस्य परिवेशस्य च 'असौ' इति पदेन केवलमनुभवैक-गोचरत्वं भाषायामव्यपदेशविषयत्वञ्च ध्वन्यते । द्वितीये पद्ये 'नेत्रैः पेया' इति लाक्षणिकाभ्यां पदाभ्यां ज्योत्स्नाया अप्रतिमाऽपरिता च शोभा संलक्ष्यते, तदवस्थायाञ्च प्रियतमाविरहस्यासह्यतातिशयः प्रतीयते । तृतीयेऽपि पद्ये 'कापि सम्भ्रान्ता वल्ली पल्लविता स्या'दिति पदैस्तस्या वल्ल्या असौ यौवनातिशयः सुषमातिशयश्च समुद्भासते, येनोन्मत्तः कोकिलसार्थोऽनवरतं कूजति, 'मधुमत्ता' भृङ्गावली च निरन्तरं गुञ्जति । 'काऽपि वल्ली' इत्यादिपदैश्चात्रालौकिक-सौन्दर्यशालिनी काऽपि प्रेयसीति सुतरां ध्वनितं भवति तस्याश्चेतश्चमत्कृति-विधायिनीं मधुरां सर्वातिशायिनीञ्च सौन्दर्यच्छटां दृष्ट्वा रसिकस्य यादृशी सम्मुग्धा निस्तब्धा च दशा सम्भाव्यते, सा तु सर्वथैवानुमानस्य विषयतामति-क्रामति । अमुमेवार्थं भङ्ग्यन्तरेण निम्नलिखिताऽऽर्याऽपि निर्दिशति—

---

१. पत्त्राङ्गुलिः—१ ।।   २. आवाम्—२ ।।
३. प्रतिसीरा—२ ।।   ४. उत्कलिका—३ ।।
५. पत्त्राङ्गुलिः—४ ।।   ६. कुरबकः—१० ।।

"पल्लविता का वल्ली लीलां यस्या निभाल्य भृङ्गाली ।।
मत्तालीव समन्ताद् भ्रान्तोद्भ्रान्तेव कान्तारे ।।"[१]

अत्र समुचितेनानुप्रासेनालङ्कृता पदशय्याऽपि किमपि मनोरमं सौष्ठवमवगाहते ।

रूपकादीनामर्थालङ्काराणां संयोजनेन संश्लिष्टं सजीवञ्च प्रकृतिचित्रणमेतत् काामप्यपरामेव चारुतां धारयति । तथाहि—

"अह्न्युष्णं निशि शीतं माधवमित्रं न मत्कृते योग्यम् ।
इति तद्बद्धा प्रकृतिर्हन्तोच्छ्वासान् समुत्सृजति ।।"[२]

अत्र रूपकानुप्राणिता समासोक्तिः सद्य एव सचेतसां चेतांसि चमत्करोति। वसन्तस्य दिवसेषु काचिदुष्णता निशासु च काचिच्छीतताऽनुभूयते । 'माधवो वसन्त एव मित्र'मिति माधवे मित्रत्वस्य समारोपादत्र रूपकम् । मित्रे नपुंसकलिङ्गतायाः प्रकृतौ च स्त्रीलिङ्गताया अनुसन्धानाद्, 'अह्न्युष्णं निशि शीत'मित्यादि विशेषणसाम्याच्च, माधव-प्रकृत्योरुपरि नायकनायिकयोर्व्यवहार-समारोपोऽप्यत्र स्वाभाविक एव । अतएव प्रियंवदा'—"मित्रं हि नपुंसकलिङ्गम् । नपुंसकश्च जनो दिवसे कामादिविषये सोत्साहोऽपि रात्रौ सहवासे शैथिल्यं भजते" अर्थादिवंविधं 'मित्रमह्न्युष्णं निशि च शीतं भवति' तत्सम्बद्धा चात्र कामिनीव प्रकृतिः । 'तद्बद्धे'ति पदेन तादृशं मित्रं प्रति तस्या अनुरागाभावो विवशत्वञ्चाभिव्यज्यते । अतएव नैराश्यातिशयात्तस्या अन्तर्निगूढा व्यथाऽसहाया चावस्थाऽप्यनुमातुं शक्यते । फलतो हन्तोच्छ्वासान् समुत्सृजती'त्यनुभावोऽप्यत्र सार्थकतां मार्मिकताञ्चाधिगच्छति । सर्वोऽप्ययं चमत्कारोः चेतने माधवेऽचेतनायाञ्च प्रकृतौ चेतनवृत्तान्तयोजनया सम्पन्न, इति तु विदितमेव मतिमताम् ।

"तन्वीं प्रकाशशाखामध्याक्रान्तोऽन्धकारगृध्रोऽसौ ।
धुन्वन् कृष्णान् पक्षान् तिमिरे लोकान् निपातयति ।।"[३]

निरवद्येऽस्मिन् पद्ये प्रकृतिवर्णनस्य काप्यभिनवैव पद्धतिराविष्कृता शुक्लमहोदयेन । अत्र प्रकाशे शाखाया, अन्धकारे गृध्रस्य, कृष्णपक्षेषु च कृष्णानां पक्षाणां समारोपणात्साङ्गं परम्परितं रूपकं विलसति । गृध्रस्य च स्वाभावोऽयं यत् स कस्मिंश्चिद् वृक्षे कामपि तन्वीं शाखामध्याक्राम्यति, स्वकीयान् कृष्णान् पक्षांश्चाजस्रं धुनोति । किन्तु तस्य पक्षिणः स्वभाववर्णनमत्राप्रस्तुतं, प्रकृतिवर्णनमेव प्रस्तुतम् । अत्राचेतनेऽन्धकारे चेतनस्य गृध्रस्य व्यवहारः समारोप्यते

---

१. कुरबकः—६ ।। २. कुरबकः—२ ।।

३. गेप्रवेशः—२ ।।

"भावानचेतनानपि चेतनवत्⋯व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया (ध्वन्या०, काव्यमाला संस्क० ३ उद्द्योतः पृ० २७८)" इत्यानन्दवर्धनाचार्यस्य सूक्तिरत्र सम्यक्तया सञ्जाघटीति ।

"कृतसागरावगाहो मेघ-विहङ्गः समुत्पतन् गगने ।
अहह मनोरमबिन्दून् विधूय पक्षान् किरत्यवनौ ।।"[1]
"यौवनमाप्ता ज्योत्स्ना भ्रमयति रसिकानहो विटाँश्चतुरान् ।
आलिङ्गन्ती सर्वान् कञ्चुलिकां तामसीं क्षिप्त्वा ।।"[2]
"मन्ये प्रकृतिसुगृहिणी तमांसि बद्ध्वा प्रकाशवस्त्रेषु ।
क्षेप्तुं पूर्वाशातः पश्चिमकाष्ठां द्रुतं याता ।।[3]

इत्यादिषु पद्येष्वपि तथाविधमेव पर्यालोचनमनुसन्धेयम् । इयाँस्तु विशेषो यदन्तिमे पद्यद्वये मानवीकरणस्य प्रक्रियोररीकृता ।

क्रैस्ते १९७५ सवत्सरे विरचितासु 'वाशितम्' इति शीर्षकेण समलङ्कृता-स्वार्यासु प्रकृतिवर्णनस्य काचिदन्यैव विधा संदृश्यते । अत्र सर्वविधात् सामयिक-परिवेशादुपमानानि गृहीत्वा प्रकृतिवर्णनं प्रस्तुतम् । तथाहि—

"येयं कुमुद्वती सा प्रातर्म्लाना विलोक्यते दीना ।
तिलतण्डुलचिन्तायां विभवविहीना यथा गृहिणी ।।"[4]
"पूर्वस्यां दिशि विरलास्तारा: काश्चन विलोकिता दीनाः ।
संसदि बहुमत-पक्षे यथा भवन्त्यल्पसंख्याकाः ।।"[5]

अत्रोपमायां लिङ्गवैषम्यमप्यापतितम् ।

"उत्पतितानि वयांसि व्योम्न्युद्यत्किरण-राग-रक्तानि ।
निर्वाचन-प्रचारे यथा समुद्घोषपत्राणि ।।"[6]

इत्यादिषु पद्येषु 'वाशितम्' अर्थात् पक्षिणां कलरवोऽयं जगतः परिस्थिति-विशेषमपि प्रतिध्वनयन् वस्तुतः सुन्दर एव संवृत्तः ।

ज्योत्स्नाऽपि बहुशोऽत्र कवेः प्रतिभासंरम्भगोचरतामध्यास्ते । फलतो 'बन्धूकः' इति शीर्षकं दत्त्वा, तस्या बहूनि मनोहराणि लोहितानि रूप-पुष्पाण्य-त्रावचितानि । प्रथमे पद्ये सा तामसशुक्तितः समुद्गता रम्या मुक्तेवाभाति । अन्यत्र सा समुड्डीना दिव्या हंसीव दिगन्तं व्याप्नोति, तस्या ज्योतिश्च

---

१. कादम्बिनी—१ ।।   २. बन्धूकः—२ ।।
३. वाशितम्—८ ।।   ४. वाशितम्—१ ।।
५. वाशितम्—६ ।।   ६. वाशितम्—४ ।।

गड्डलिकेव रोदसीरन्ध्रं प्रपूरयति ततश्च प्रतिपत्नमूर्ध्वे पटले सा रुचिरा राधेव विराजते, तस्याञ्चाधस्तादवगुण्ठितोऽन्धकारस्तु विपरीतरतौ कृष्णत्वमधिकरोति। अस्यामार्यायां मुक्तककाव्यानां घोरश्रृङ्गारपरम्पराऽनुसृतेति प्रतिभाति। 'पर्णे पर्णे तस्याः स्फुरितं प्रकाशराशिमवलोक्य केचन प्रहृष्टा अपि भवन्ति, किन्तु किन्ते तत्र विलीनां गम्भीरां पीडारूपां तमोलीलामपि द्रष्टुं प्रभवन्ति ?" "सन्त्येवंविधा अपि धीरा ये स्वकीयामुत्कटामपि हृद्वेदनां प्रसन्नता-प्रकाशैस्तिरोहितां कुर्वन्ति। न चेतरे तदाकलने क्षमा भवन्तीति" प्रियंवदातोऽत्र वस्तुध्वनिरूपः कश्चिद् विलक्षण एवार्थोऽप्यनुसन्धेयः। सप्तमे पद्ये 'कान्तिकणान् विकिरन्ती ज्योत्स्नेयं शिखरेभ्य उत्पतिता, तत्रैव च सहसा सम्भ्रमं प्राप्ता' पारावतानां पंक्तिरिव प्रतीयते। ज्योत्स्नाकलिते देशे वृक्षानधोऽधोऽवस्थिता छायाऽपि नैव समुपेक्षिता कविना। सा पयसां पल्वले सानन्दं पतितानां कृतफेनानां महिषीणां, विशुद्धं ग्रामीणं, संश्लिष्टं बिम्बग्राहि च दृश्यं सहृदयानां पुरस्तात् समुपस्थापयति।

"धवल-किरण-गुणनद्धैः क्रीडनकैर्मेघतूलकृततनुभिः।
क्रीडति शशाङ्कबालः कृतकलहासोऽम्बरे भवने॥"[1]

अस्यामप्यार्यायां शशाङ्के कृतकलहासस्य बालस्य, अम्बरे च भवनस्य, समारोपणं विधाय, धवल-किरणगुणनद्धैर्मेघतूलकृततनुभिः क्रीडनकैस्तस्य या बालक्रीडा, कवेरस्य विशिष्टया संविदा सन्दृब्धा, सा तु जीवने, पथि पथि वीथ्यां वीथ्याञ्च परिदृश्यमाना कान् सहृदयानानन्दतुन्दिलान् न विदधाति ?

अनेन पर्यालोचनेन प्रकृतिवर्णने श्रीशुक्लमहोदयस्य महती सूक्ष्मेक्षिका तदभिव्यक्तौ च नवनवोन्मेषशालिनी विविधायामवती प्रौढता, अनुभूतेश्च महद्गाम्भीर्यं परिस्फुटीभवति।

प्राचीनेषु मुक्तकेषु श्रृङ्गारोऽङ्गी। स च तत्र निर्मर्यादो निरावरणश्चोच्छृङ्खलं परिखेलतीति विदुषां विमर्शः। 'मङ्गल्या'यां श्रृङ्गारस्य प्रपक्त्रिमः शालीनः समर्यादश्च परिपाकः साक्षाद् विग्रहवानिव सम्पन्नः। श्रृङ्गाररसतरङ्गिणीतः काश्चन लहर्योऽत्र समुद्ध्रियन्ते—

'ते कथयन्ति यदस्या अलकाधरनयनजघनवक्षोजैः।
षोडशशरद्भिराप्तो गतदिवसे परिचयः सकलैः॥
रूप-सुवर्णैषणिका तदङ्गयष्टिर्विलोकिताऽस्माभिः।
यत्र सुबद्धा दृष्टिर्नान्यासक्ता भवत्यद्धा॥'[2]

---

१. बन्धूकः—१॥ २. उत्कलिका ४—५॥

सौन्दर्यं ते भावान् दिव्यां वा ते विनोद-वैदग्धीम् ।
वाञ्छामि शतं जनुषां पातुं ते माधुरीधारा: ।।[1]
"अङ्कुरितं कण्टकितं पल्लवितं कुसुमितं फलितमङ्ग ।
सौन्दर्यं तेऽस्माकं चेतसि गन्धं तनोत्यधुना ।।[2]
"हस कुमुदानि हसेयुर्जृम्भस्व शुभे लसतुतरां वल्ली ।
आलप मामतिशनकैरुच्छ्वसितं गीतकं भूयात् ।।[3]
"हस्ते चषकश्चषके मदिरा तस्याञ्च वीक्षितं मदिरम् ।
रचयसि भाग्यमहो मे रसिके मदिरास्रज: सर्वा: ।।[4]

एषु पद्येषु पूर्वोक्तानां मान्मथोद्भेदविजृम्भमाणानां विविधानां सकुमारभावनानां यौवनच्छवीनां सौन्दर्यप्रभाणाञ्च सुन्दर: सुमुन्मेष: संयोगशृङ्गारं चारुतयाऽभिव्यनक्ति । एवंविधे वर्णने मानवीयान्त:प्रकृतेर्बाह्यप्रकृतेश्च तादृशं मनोरमं तादात्म्यं सामञ्जस्यञ्च संघटते येन मर्मस्पृक्संवेदनामादधाना, मानवीयभावैरनुभावैश्च सक्रियमनुरञ्जिता प्रकृतिरपि विविधाभिर्भङ्गीभिर्निजां सहानुभूतिमावेदयन्ती सजीवेव सप्राणेव च प्रतीयते । अनुपमसौन्दर्यशालिनी सा नायिका यदि व्यस्तान् निजकेशान् संहर्तुं व्यवसिता स्यात्तदा तस्या एवंविधायाश्चेष्टाया: प्रकृतौ का प्रतिक्रिया भवेदिति निम्नलिखितायामार्यायां चारुतया निर्दिष्टम्—

"मेघा: कृतप्रयाणा ज्योत्स्ना ह्रीणा मदोऽपि मन्द: स्यात् ।
व्यस्तान् यदि निजकेशान् संहर्तुं व्यवसिता सा स्यात् ।।"[5]

उपर्युद्धृतायां—"हस कुमुदानि हसेयुर्जृम्भस्व शुभे लसतुतरां वल्ली" इत्याद्यार्यायामपि तादृश्येव प्रकृते: प्रतिक्रियोल्लिखितेति तु स्फुटमेव ।

अस्मिन्नेव सम्मिलनप्रसङ्गे 'आवाम्' इति शीर्षकमधिकृत्य, महाकवे: कालिदासस्य 'वागर्थाविव सम्पृक्तौ' इति दिव्यां सूक्तिञ्चोद्धृत्य, द्वयोरपि कयोश्चित् खलु सर्वथैवैकीभावमभिव्यञ्जयन् 'अर्धनारीनटेश्वर'-न्यायेन किञ्चिद् विलक्षणमेवाचिन्त्यं भेदाभेदवादं विरचितवान् कविरयम् । तन्निदर्शनभूतमार्याद्वयमधस्तान्निर्दिश्यते—

"त्वं कविताहं भावस्त्वं वीणा चेदहं ध्वनिर्मधुरे ।
त्वं यात्राहं मार्गस्त्वं धाराहं तटस्तरले ।।"[6]
"प्रस्तावनासि रम्या दिव्योऽहं नाट्यवस्तुविन्यास: ।
त्वं चेत् कार्यावस्था तद्ग्रथित: सन्धिबन्धोऽहम् ।।"[7]

---

१. पत्राङ्गुलि:—२ ।। २. पद्याङ्गुलि:—१० ।। ३. पत्राङ्गुलि:—३ ।।
४. चषक:—६ ।। ५. मणितम्—२ ।। ६. आवाम्—१ ।।
७. आवाम्—६ ।।

विप्रलम्भशृङ्गारमप्यधिकृत्य काचिदभिनवैव वर्णनपद्धतिः प्रादुर्भाविता कविना । तथाहि—

"अनुकूला मधुरा त्वं प्रतिकूला यदि मधुरतरा हन्त ।
क्षणकं चेन्नु तटस्था मधुरतमा नात्र सन्देहः ।।
"हृदयेन समुच्छ्वसितं रुदितं नेत्रेण कम्पितं वपुषा ।
हसितमहो अधरेण सखि जाते त्वत्कथासङ्गे ।।"[1]
"स्मृत्वा ममापि मधुरे कच्चिन्नेत्रे न वारि ते जातम् ।
नो स्मर्यते स कालो यस्मिंस्त्वं नो स्मृताऽस्माभिः ।।"[2]

आत्मानं निर्दिश्यार्याद्वयमिदं दरमुकुलितलोचनमास्वाद्यतां सहृदयैः—

"नहि ते मधुरा दिवसा न हि सा रजनी न चापि ता वार्ताः ।
अद्य न कस्यचिदस्मि भ्रान्तो मेघोऽहमाकाशे ।।"[3]
"वारिणि तुषारखण्डो यथा गलाम्यनवलोकितः कैश्चित् ।
विगतक्षण इव शनकैः कदापि गन्तास्मि निःशब्दम् ।।"[4]

भावाभिव्यञ्जनस्याधुनिकीं प्रतीकपद्धतिमाश्रित्य, मर्मस्पृशः काश्चनार्या अत्र संगृहीताः—

"परितो झंझावाता उल्का भूमिर्नवाङ्कुरोत्फुल्ला ।
क्व नु विकिरति निजबिन्दूनुदितः सौन्दर्यमेघोऽयम् ।।"[5]
"सविषाः सभोगकुटिला अथो अकर्णाश्च कञ्चुकाकलिताः ।
सर्पेतः सर्पेतः सर्पा देशेऽत्र सर्पन्ति ।।"[6]
"केचन तरङ्गरङ्गं बुद्बुदमन्ये जलानि वै चान्ये ।
विरलास्तद्गाम्भीर्यं पश्यन्त्यम्भोनिधिं याताः ।।"[7]

काश्चन मर्मस्पृशोऽन्योक्तयोऽप्यत्र मङ्गल्यायां, बाभासन्ते । ताश्च मूल एव निभालयन्तु सहृदयाः विस्तरभयान्नात्र ता विविच्यन्ते ।

। । ।

"अपाम सोममममृता अभूम" (ऋ० ८/४८/३) इति भगवती श्रुतिः । तस्माद् यज्ञेषु काचित् सोमपानपरम्परा तावदार्येषु प्रचुरप्रचाराऽऽसीदिति निश्चितम् । ऋग्वेदसंहितायास्तु सम्पूर्णमेव मण्डलमेकं पवमानसोमविषयकं विद्यते । सा वैदिकी परम्परा पारसीकभाषाया उमरखय्यामादिकवीनां कवितायां 'मधुशालां' 'मदिरां'

---

१. पत्त्राङ्गलिः—६-७ ।। २. कोलम्बकः—६ ।। ३. कोलम्बकः—४ ।।
४. कोलम्बकः—६ ।। ५. उत्कलिका—२ ।। ६. प्रमीला—४ ।।
७. प्रमीला—६ ।।

'मदिराक्षीञ्चाधिकृत्य, चारुतया प्रतिबिम्बिताऽभूदिति मे प्रतिभाति। किन्तु, न जाने, कस्माद्धेतोः संस्कृतकवितायां सा सर्वथैव समुपेक्षिताऽभवत्। सम्भवतः, सर्वप्रथममस्यां 'मङ्गल्या'यामेव, 'चषकः' इति शीर्षकं दत्वा, "सग्धिश्च मे, सपीतिश्च मे" इति यजुर्वेदस्य सूक्तिञ्चोद्धृत्य, विषयेऽस्मिन् मनोरमा काश्चिदार्याः समाकलिताः। मङ्गलाचरण एव कविः प्रस्तौति—

"ये पूरयन्ति शाब्दे चषके सततं मदोत्कटां मदिराम्।
वाणी नृत्यति येषां रङ्गे तेऽस्मत्समाराध्याः॥"[1]

'प्रियंवदाया'मत्र 'मदिरादि'प्रतीकानामर्थ एवं स्पष्टीकृतः, "मदोत्कटां मदिराम् = रमणीयमर्थमित्यर्थः। रङ्गे रङ्गभूमौ तात्स्थ्यात् सभ्यसमूहे।" इति 'चषके'ऽस्मिन् प्रथमाभिः षड्भिरार्याभिर्जीवनस्य सुखानां क्षणभङ्गुरतां प्रति किञ्चिदतीव कटु, तीक्ष्णमुत्कटञ्च 'व्यङ्ग्यं' सहृदयानां प्रतीतिपथमवतरति। अस्य प्रथमे पद्य एव 'प्रियंवदायां' 'चषकः' निर्विण्ण-जीवनस्य प्रतिनिधिरिति कविः स्वयमेव कथयति। तृतीये चतुर्थे च पद्ये 'रिक्ताः सर्वे चषकाः', पञ्चमे 'हन्त विदीर्णः कथं चषकः', षष्ठे च 'सर्वे चषका भवन्ति सच्छिद्राः' इत्यादिभिः पदैर्जीवने सर्वसुखराहित्यं' कस्यचिन्महान् निर्वेदश्च प्रतिपाद्यते। मानवीयेऽस्मिन् जीवनेऽकस्मादेव कस्मादपि कारणात्, प्रक्रान्ते रागे रसे चाशनिसम्पात इव भङ्गः समापततीति सुमहत् तथ्यमप्यत्र बलवत्तया प्रतीयते।

अवशिष्टास्वार्यासु मधुशालायाः परिवेशः साक्षादेव प्रत्यक्षीभवति। मदिराया महती मादकता, मदिराक्षीणां मनोज्ञा भङ्गयः, तासाञ्च मदिरं वीक्षितं सर्वमपि हृदयङ्गलमतीव सम्मोहकञ्च सञ्जायते। 'चषको'ऽयं संस्कृतकवितायाः किमप्यभिनवं, समृद्धञ्च क्षेत्रं प्रकटीकरिष्यतीति सुनिश्चितमेव।

अन्ते च 'मङ्गल्यायां' प्रतिपाद्यविषयस्य 'कल्योदन्या-काकली-चषक-प्रतिसीरोत्कलिका-मणित-ललाम-कोलम्कादिशीर्षकैर्विभाजनमपि कवेरनुपमां मनीषां प्रकाशयति। प्रत्येकं शीर्षकस्य चाधस्तादुद्धृता प्राचीनसंस्कृतवाङ्मयस्य कापि मनोरमा ऋतम्भरा च सूक्तिः कामपि केन्द्रीयां सामान्यां भावभूमिमभिदधती सर्वथा सर्वबन्धनेभ्यो विनिर्मुक्तान्यपीमानि पद्यानि स्थूलतया परस्परं निबध्नाति 'आर्यासप्तशत्या'माचार्यगोवर्धनेन स्वीकृतः 'अकारादिव्रज्याक्रमः' सर्वथा कृत्रिमो बाह्यश्चासीत् तमपहायोपयुक्तेन क्रमेण विषयस्य विभाजनं कवेर्विशिष्टायाः संविदोऽभिव्यञ्जकं साभिप्रायञ्च संवृत्तमित्यत्र नास्ति कापि संगीतिभीतिः।

---

१. कल्या—७॥

अस्यां भूमिकायां दिग्दर्शनमात्रमभिलक्ष्य, 'मङ्गल्यायाः' कानिचित् पद्यानि समीक्षानिकषे परीक्षितानि, तानि चापूर्वाणि रत्नान्येव सिद्धानि। तस्मादस्या भूमिकाया उपक्रमे यत् किलावोचाम यदियं 'मङ्गल्या' मुक्तक-मौक्तिकानां कापि भास्वरा मालेव सम्पन्नेति तद्वचसो याथार्थ्यमनवद्यता च सिध्यति। वस्तुतस्तु 'मङ्गल्याया' अपूर्वं सौन्दर्यमियत्तया परिच्छेत्तुं न शक्यते।

समासतो 'मङ्गल्ये'यं प्राकृतिक-दृश्यानां सजीवेन मनोहरेण च चित्रणेन, मानवीयान्तः-प्रकृतेरपि सालङ्कारेण स्वाभाविकेन च विश्लेषणेन, भाषाया रमणीयतया, भावानां विचाराणाञ्च गाम्भीर्येण, शृङ्गारकरुणरसयोश्च केनापि पवित्रेण परिपाकेन, मनोरमया कयाप्यभिव्यञ्जनया च कामपि सर्वाङ्गीणां सौन्दर्य-सम्पदं किमपि दिव्यं वैशिष्ट्यञ्चाधिकरोति। मुक्तक-काव्यानां कृते च बहुषु क्षेत्रेषु कामप्यभिनवां दिशमुद्घाटयति। अतः संकलनमिदं सुरभारत्याः काव्यमयं वाङ्मयं भृशं समृद्धं विधास्यतीति सुदृढोऽस्माकं विश्वासः।

स्वकीयस्याभिधानस्यान्वर्थतां बिभ्रतीयं 'मङ्गल्या'[1] संस्कृतसाहित्यस्य विस्तृतं प्राङ्गणं स्वकीयेनालौकिकेन सौरभेण परितः सुवासितं विदध्यादिति करुणावरुणालयं याचामहे। आशास्महे च यद्विलक्षणशेमुषीकस्तरुणः कविरयं प्राय एकशतीमिमां 'मङ्गल्यां' शौक्ल्यं सप्तशतीत्वमाधातुं प्रयतिष्यते। यदि च 'प्रियंवदा' प्यागामिनि, संस्करणे टिप्पणीत्वमपहाय, आर्यास्विमासु निगूढानां भावानां विचाराणां, रसादीनाञ्च रहस्य परिस्फोरयन्ती, प्रौढटीकात्वमाटीकमाना विद्योतेत, तदा कवेरस्येयमतीव साधीयसी सन्धा सफला सम्पद्येत, साहित्यिकञ्च जगद्भृशमुपकृतं भवेत्। भविष्यत्यपि कविरयं निरन्तरं निजाभिरभिनवाभिमनोरमाभिश्च रचनाभिः कुलक्रमागतां वाग्देवतामाराधयिष्यतीति कामयमाना विरमामः।

---

१. मङ्गल्या (संस्कृतमुक्तकरचना)

रचयिता—डा० उमाकान्त शुक्लः

प्रकाशकः—शारदासदनम्, मुजफ्फरनगरम्

प्राप्तिस्थानम्—साहित्य-भण्डार, सुभाष बाजार, मेरठ।

प्रथमं संस्करणम् १९७५ ई०, द्वितीयं सं० १९८९ ई०।

मूल्यम्—रु० १५.००

सागरे समायोजिता आधुनिकसंस्कृत-साहित्यसंगोष्ठी

(डा० सूर्यप्रकाशः व्यासः, संस्कृतविद्यासंकायः, काशीहिन्दू-विश्वविद्यालयः, वाराणसी)

आधुनिकसंस्कृतसाहित्यानुशीलनमधिकृत्य सागरनगरस्थेन डा० हरिसिंहगौरविश्वविद्यालयस्य संस्कृतविभागेन नवाशीत्युत्तरैकोन-विंशतिशततमेशवीयेऽब्दे दिसम्बरमासस्य पञ्चमतारिकामारभ्य त्रिदिवसीया संगोष्ठ्येका समायोजिता। प्रोफेसरराधावल्लभत्रिपाठिनः निर्देशने दिल्लीस्थविश्वविद्यालयानुदानायोगेन प्रायोजितायामस्या-मखिलभारतीयायां संगोष्ठ्यां विविधेभ्यः प्रदेशेभ्यः समागतैः संस्कृत-साहित्यकारैः संस्कृतकाव्यग्रन्थानां सम्पादकैः समीक्षकैश्च चत्वारिंशत् शोधपत्राणि प्रस्तुतानि। संगोष्ठ्याः प्रयोजनद्वयमासीत्—नवसंस्कृतसाहित्यस्य समीक्षात्मकमाकलनं तन्मूल्यांकनञ्च।

भौमवासरे पञ्चमतारिकायां प्रातः दशवादने सरस्वतीवन्दना-नन्तरं सागरविश्वविद्यालयस्य कुलपतिना श्री एम.एल. जैन महोदयेन संगोष्ठीयं समुद्घाटिता। "सांस्कृतिकैक्यसंपादनप्रवणया अनया संस्कृतभाषया न केवलं भारतीयभाषासाहित्यमेवापितु विश्वभाषा-साहित्यमपि प्रभावितम्। नेयं भाषा केवलं भारतस्य चैतन्यमेव बिभर्ति किन्तु सकलस्येशियाद्वीपस्यापि चैतन्यमावहति"—इति संस्कृतभाषाया महत्त्वं प्रतिपादयता कार्यक्रमस्य मुख्यातिथिना श्री शिवकुमारश्रीवास्तव्येन चोक्तम्।

संगोष्ठ्यामस्यां चतुर्विधविषयकाः शोधनिबन्धाः प्रस्तुताः १. प्रतिक्षेत्रं प्रणीतस्य नवसंस्कृतसाहित्यस्य सर्वेक्षणात्मकाः, २. महाकाव्य-गीतिकाव्य-कथा-लघुकथैकांकिरूपकादिविधानां प्रकार-प्रवृत्तिविषयकाः, ३. काव्यशैल्यात्मकाः, ४. काव्ययात्राविषयकाश्च।

प्रथमायाः संगोष्ठ्या अध्यक्षपदम् आन्ध्रविश्वविद्यालयस्य प्रो० पी० श्रीराममूर्तिना, द्वितीयायाः केरलविश्वविद्यालयस्य प्रो० एन० पी० उन्नी-महाभागेन, तृतीयायाः बड़ौदानगरतः समागतेन

डा० राजेन्द्रानानावटीमहोदयेन चतुर्थ्यश्च काशीहिन्दूविश्वविद्यालयस्य प्रो० रेवाप्रसादद्विवेदिनालङ्कृतम् ।

प्रो० पी० रामचन्द्रमूर्तिना आन्ध्रप्रदेशस्य, प्रो० एन०पी० उन्नीमहाभागेन केरलप्रदेशस्य, डा० राजेन्द्रनानावटीमहोदयेन गुजरातराज्यस्य, डा० भागचन्द्रजैनमहोदयेन सागरमण्डलस्य, डा० रामलखनपाण्डेयमहोदयेन काश्मीरस्य, डा० लक्ष्मणनारायणशुक्लेन इन्दौरक्षेत्रस्य, डा० सूर्यप्रकाशव्यासेन च काश्याः नवसंस्कृतसाहित्ये योगदानविषयका अष्टौ निबन्धाः समुद्भाविताः ।

अन्यैः विद्वद्भिः समुपस्थापितानां शोधपत्राणां विषयाः नामानि च—

१. दिल्लीविश्वविद्यालयस्य डा० रमाकान्तशुक्लेन "अर्वाचीनसंस्कृते" प्रकाशितं रचनात्मकं साहित्यम्
२. जबलपुरस्थेन डा० रहसविहारीद्विवेदिना स्वातंत्र्योत्तरं महाकाव्यम्
३. इलाहाबादतः समागतेन डा० हरिदत्तशर्मणा आधुनिके संस्कृते गीतिकाव्यप्रवृत्तिः
४. पुरीतः समागतेन डा० सदानन्ददीक्षितेन संस्कृतसाहित्ये आधुनिकाः युगप्रवृत्तयः
५. सागरविश्वविद्यालयस्य डा० बालशास्त्रिणा कविवर ईशदत्तः तस्य खण्डकाव्यं प्रतापविजयञ्च
६. इन्दौरनगरस्य डा० सीतारामदांतरेमहोदयेन संस्कृतलेखने विविधविधाः
७. बोधगयातः समागतेन डा० मारुतिनन्दनपाठकेन आचार्यजानकीवल्लभशास्त्रिणः संस्कृत-कविता
८. अम्बाहस्थेन डा० ओमप्रकाशराजपालीमहोदयेन नवकविश्रीनिवासरथस्य कवितायां कारुणिकाः प्रसंगाः
९. भोपालनगरस्य डा० क्षेत्रवासिपण्डामहोदयेन अभिराजराजेन्द्रस्य नाट्यसाहित्यम्
१०. खैरागढतः समागतेन डा० कामताप्रसादत्रिपाठिना नवसंस्कृतसाहित्ये भङ्गिमा हास्यव्यङ्ग्ययोः

११. सागरविश्वविद्यालयस्य डा० कुसुमभूरिया-महाभागया आधुनिके संस्कृतसाहित्ये नारीणां योगदानम्

१२. सागरस्थेन श्रीसीतारामद्विवेदिना आधुनिकसंस्कृतसाहित्य कथाया: लघुकथायाश्च विकास:

१३. सागरस्थेन पण्डितप्रेमनारायणद्विवेदिना पण्डितरेवाप्रसाद-द्विवेदिन: काव्यम्

१४. सागरस्थेन डा० धूमनसिंहेन आधुनिकसंस्क्रसाहित्ये एकांकिरूपकानामुपादेयता

१५. सागरस्थेन डा० वीरेन्द्रमोहनेन नागार्जुनस्य संस्कृत कविता

१६. सागरस्थेन श्रीअनिलत्रिपाठिना आधुनिकसंस्कृतसाहित्ये डा० जगन्नाथपाठकस्यावदानम्

१७. सागरस्य अर्चना द्विवेदि-महाभागया अभिराजराजेन्द्र: तस्य काव्यञ्च

१८. पुरीत: समागतेन श्रीसूर्यमणिरथेन डा० केशवचन्द्रदाशस्य साहित्यम्

१९. उज्जयिन्या: विक्रमविश्वविद्यालयस्य डा० विन्ध्येश्वरी-प्रसादमिश्रेण ज्ञानोपाह्वस्यावस्थिबच्चूलालस्य काव्य-सौष्ठवम्

२०. सागरविश्वविद्यालयस्य डा० आनन्दप्रकाशत्रिपाठिना पण्डितजानकीवल्लभशास्त्रिकृता 'काकली' च

नवसंस्कृतसाहित्यविषयिण्यामस्यां संगोष्ठ्यामाधुनिकसाहित्यकारै: स्वकाव्ययात्रामधिकृत्यापि ललितनिबन्धा: पठिता: भाषणानि च कृतानि। एतेषु पण्डितरेवाप्रसादद्विवेदिन: पण्डितवच्चूलालावस्थिन:, पण्डितराजेन्द्रमिश्रा:, पण्डितभास्कराचार्यत्रिपाठिन:, पण्डितकेशवचन्द्रदाशा: पण्डिदहर्षदेवमाधवाश्चान्यतमा आसन्।

इत्थं संगोष्ठ्यामस्यां चत्वारिंशत् निबन्धानां वाचनं विवेचनञ्चाभूत्। साहित्यकाराणां तत्साहित्यस्य संपादकानां तेषां समीक्षाणां शोधार्थिनाञ्च संवादसमुद्भासकोऽयं समवाय: नूनमैतिहासिको विचारोत्तेजकोऽविस्मरणीय: सफलश्चासीत्। सागरनगरे नवसंस्कृत-साहित्यस्य त्रिदिवसात्मकेनानेन मंथनेन संस्कृतभाषाया: साहित्यस्य

च वस्तुस्थितिसमस्यासंभावनादिप्रसङ्गे विशिष्टाः विचाराः निष्कर्षमहार्घमणिरूपेण समुपलब्धाः—

प्रथमः—संस्कृतभाषा मृतेति प्रवादः सर्वथाऽसत्यः। अस्यां देववाण्यामद्यापि प्राचीनायां नवीनायाञ्च शैल्यां, सर्वासु विधासु, देशस्य सर्वेष्वपि भागेषु च परम्परागताधुनिकविषयानधिकृत्य प्रभूतं साहित्यं विरच्यते। नवीनसाहित्यकाराणां साहित्ये शोधकार्यमपि विभिन्नेषु विश्वविद्यालयेषु सोत्साहं प्रचलति।

द्वितीयः—अर्वाचीनसंस्कृतसाहित्यकाराणां समक्षं नवसाहित्यस्य प्रकाशनस्य प्रकाशितसाहित्यस्य विक्रयस्य प्रचारस्य च गंभीरा समस्या वर्तते। काव्यानि लिख्यन्ते श्रूयन्ते च। कवयः पुरस्क्रियन्ते प्रशंस्यन्ते च किन्तु तेषां काव्यग्रन्थानां प्रकाशनार्थं प्रतिष्ठिताः प्रकाशकाः नोत्सहन्ते।

संस्कृतपत्रिकाणां संख्या त्ववश्यं वृद्धिं गता, तासां नवकाव्यप्रकाशनविषयकं योगदानमप्यभिनन्दनीयञ्चापि विद्यते किन्तु ग्राहकाणां न्यूनतया तासामपि प्रकाशनादिकं दुष्करतामेव याति।

तृतीयः—विश्वविद्यालयस्य पाठ्यक्रमे नवसंस्कृतसाहित्यस्य सम्यग्समावेशः तत्प्रोत्साहनार्थमावश्यकः।

चतुर्थः—निष्पक्षाणां निर्भीकानां पूर्वाग्रहरहितानामाधुनिकदृष्ट्या च सम्पन्नानां समीक्षकाणामभावादर्वाचीनसंस्कृतसाहित्यस्य मूल्यांकनं न भवति।

पञ्चमः—नवसंस्कृतसाहित्यस्य प्रवृत्तिषु परस्परं संवादस्य सामञ्जस्य चाभावो दृश्यते। अतो विषयेऽस्मिन् सर्वैः सम्भूय प्रयतनीयम्।

षष्ठः—देशस्य विविधेषु भागेषु विरचितं विरच्यमानञ्च नवसाहित्यमधिकृत्यैतादृशीनां संगोष्ठीनां तेषु तेषु प्रदेशेष्वेवायोजनमावश्यकम्।

सप्तमः—प्राचीनसंस्कृतसाहित्योपरि अभिनवदृष्ट्या टीकाग्रन्थाः, साहित्यशास्त्रीयग्रन्था अनुवादाः शोधप्रबन्धाश्चाप्याधुनिके समये लिख्यन्ते। तानधिकृत्यापि स्वतंत्रसंगोष्ठीनामायोजनमावश्यकम्।

दूरदर्शने प्रस्तुतं 'भाति मे भारतम्'

(प्रणेता, निर्देष्टा—डा० रमाकान्त शुक्ल:)

भाति मे भारतम्, भाति मे भारतम् ।
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुवपदम्

प्रथमो भाग:

विश्वबंधुत्वमुद्घोषयत्पावनं
विश्ववन्द्यैश्चरित्रैर्जगत्पावयत् ।
विश्वमेकं कुटुम्बं समालोकयद्
भूतले भाति मेऽनारतं भारतम् ॥

क्रुद्धहिंसाबले क्वास्त्यहिंसाजय: ?
कुत्र मुच्येत बद्धश्च मामन्तरा ?
प्रश्नमित्थं जगत्सम्मुखे स्थापयद्
भूतले भाति मेऽनारतं भारतम् ॥

वेशभूषाशपोसनापद्धति-
क्रीडनामोद-संस्कार-वृत्त्यादिषु ।
यदि भिन्नं सदप्यस्त्यभिन्नं सदा
भूतले भाति तन्मामकं भारतम् ॥ ध्रुव० ॥

दु:खपूर्णं जगत्सौख्यपूर्णं भवेद्
यस्य रम्योपदेशै: सुधापूरितै: ।
जङ्गले मङ्गलं यच्च कर्तुं क्षमं
भूतले भाति तन्मामकं भारतम् ॥

यत्र पुण्याय मान्यं परेषा हितं
यत्र पापाय पीडा परेषां मता ।
यत्र सत्यं जयं याति नैवानृतं
भूतले भाति तन्मामकं भारतम् ॥ ध्रुव० ॥

द्वितीयो भाग:

जाह्नवी-चन्द्रभागा-जलै:-पावितं
भानुजा-नर्मदा-वीचिभिर्लालितम् ।
तुङ्गभद्रा-विपाशादिभिर्भावितं
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुव० ॥

विन्ध्य-सह्याद्रि-नीलाद्रिमालान्वितं
शुभ्रहैमाद्रि-हासप्रभापूरितम् ।
अदर्बुारावलीश्रेणि-सम्पूजितम्
भूतले भाति मेऽनारतं भारतम् ॥
यत्र मंदाकिनी पापसंहारिणी
यत्र गोदावरी चारुसंचारिणी ।
देववाणी च यत्रास्ति मोदाकुला
भूतले भाति तन्मामकं भारतम् ॥ ध्रुव० ॥
यत्प्रकृत्याः सुलीलास्थलं राजते
पक्षिणां यद्विहारस्थलं विद्यते ।
षड्ऋतूणां विलासैः समुद्भासितं
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुव० ॥

तृतीयो भागः

गोस्तनी-सेवपूर्णं मधुप्लावितम्
देवदारूद्वहं नौगृहैः रञ्जितम् ।
सुन्दरं यस्य काश्मीरकं राजते
भूतले भाति तन्मामकं भारतम् ॥
क्षारमम्भोधिमापीय यस्मिन् स्थितै-
र्नारिकेलैः सुधोद्गारिभिः श्यामलः ।
शंकराचार्यदः केरलो राजते
भूतले भाति तन्मामकं भारतम् ॥ ध्रुव० ॥
गाण्डकी-शोण-गङ्गा-युता पाटली
लिच्छिवी-सेविता चापि वैशालिका ।
भूषयामासतुर्यस्य पूर्वाञ्चलं
भूतले भाति तन्मामकं भारतम् ॥ ध्रुव० ॥

श्रीदयानन्द-गान्ध्युज्ज्वलं गुर्जरं
स्वर्णबंगं विवेकारविन्दोज्ज्वलम् ।
नानकाद्युज्ज्वलं पञ्चतोयं दधद्
भूतले भाति मेऽनारतं भारतम् ।। ध्रुव० ।।

चतुर्थो भागः

रामकृष्णावतारस्थले विश्रुते
नेहरू-मालवीयादि-रत्नोज्ज्वले ।
उत्तरे यस्य देशेऽस्ति तीर्थाधिपो
भूतले भाति तन्मामकं भारतम् ।।
गोखले - बालगंगाधराराधितं
श्रीशिवाजी-तुकाराम-सम्बोधितम् ।
यन्महाराष्ट्रकं सह्यशृंगोच्छ्रितं
भूतले भाति तन्मामकं भारतम् ।।
आलवारस्वरैर्मोहितं तामिलं
मध्यदेशं तथा चम्बलाद्युज्ज्वलम् ।
यच्च सोल्लासमासाममंके दधद्
भूतले भाति तन्मामकं भारतम् ।। ध्रुव० ।।
गोम्मटेशानुभावप्रभापूरितम्
यस्य कर्णाटकं चन्दनामोदितम् ।
यस्य राजस्थलं वीरगाथांकितं
भूतले भाति तन्मामकं भारतम् ।।
आन्ध्रनागारुणादिप्रदेशेषु यत्
स्वीयभूतिं तनोति प्रभूतां सदा ।
यस्य सर्वस्थलेष्वस्ति प्रत्यग्रता
भूतले भाति तन्मामकं भारतम् ।। ध्रुव० ।।

पञ्चमो भागः

भाखडाबन्ध-दामोदरीयोजना
बाणगंगा-फरक्कादि-सिक्तोर्जितम् ।
ब्रह्मपुत्रादिसन्दर्शिताम्बुच्छटं
भूतले भाति मेऽनारतं भारतम् ।। ध्रुव० ।।

विद्युदुत्पादने तैलसंशोधने
इन्धनान्वेषणे लौहनिष्पादने ।
यन्त्रनिर्माणकार्ये समर्थं च सद्
भूतले भाति मेऽनारतं भारतम् ॥
यद्बरौनी-भिलाई-बुकारो-स्वनैः
स्वोन्नतिस्यन्दनोत्थं शुभं घर्घरम् ।
दिक्षु विस्तारयद् वीक्ष्यते सर्वदा
भूतले भाति तन्मामकं भारतम् ॥ ध्रुव० ॥
आर्यभट्टं वियन्मण्डले स्थापयत्
पोखरण्-भूमिगर्भेऽणुशक्ति किरत् ।
शान्तिकार्येष्वणुं प्रेरयत्सन्ततं
भूतले भाति मेऽनारतं भारतम् ॥
यद्दरिद्रव्यथां हर्तुमाकांक्षति
यच्च वैज्ञानिकीमुन्नतिं वाञ्छति ।
यन्निजाध्यात्मरत्नप्रभालोकितं
भूतले भाति तन्मामकं भारतम् ॥ ध्रुव० ॥

षष्ठो भागः

एशियाडं सुभव्यं समायोजयद्
अन्तरिक्षे नरान् निर्भयान् प्रेषयत् ।
निर्गुटं राष्ट्रसम्मेलनं योजयत्
भूतले भाति मेऽनारतं भारतम् ॥
रोगजालं चिकित्सालयस्यस्थापनै-
रोषधोत्पादनैः शल्यशोधैस्तथा ।
नूतनाभिश्चिकित्साभिरुन्मूलयद्
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुव० ॥

अग्निमूर्जस्वलं स्वत्वरक्षाकृते
साधनैरात्मनीनैः सुसंसाधयत् ।
युद्धपोतांश्च सिन्धूरसि स्थापयद्
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुव० ॥
रेल-नौका-विमानैस्तथा गन्त्रिभि-
र्यानकैस्तैश्च तैश्च प्रवेगान्वितैः ।
य"च्चरैवे"ति नित्यं समुद्घोषयद्
भूतले भाति तन्नामकं भारतम् ॥ ध्रुव० ॥

सप्तमो भागः

मेघमालाकुलं विद्युदुद्योतकं
काशहासान्वितं सर्षपश्रीयुतम् ।
पक्वगोधूमसस्यैश्च सम्पूरितं
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुव० ॥
कोकिलैः कूजितं षट्पदैर्गुञ्जितं
केकिभिर्नृत्यपारंगतैर्नादितम् ।
सारिका-कीर-वादप्रवादैर्युतं
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुव० ॥
हंस-कारण्डवैस्सारसैर्वर्तकैः
कौञ्चकाकैः पिकैः खञ्जरीटैः शुकैः ।
तित्तिरैष्टिट्टिभैः श्येनगृध्रैश्चितं
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुव० ॥
श्यामलानोकहश्रीसमृद्धान्तरं
पद्मनेत्रैस्सरोभिस्समालोकितम् ।
निर्झरैः श्वेतफेनैस्समृद्धाञ्चलं
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुव० ॥

अष्टमो भागः

द्वारकां सेतुबन्धं पुरीं बदरिकां
तिरुपतिं मधुपुरीं चाजमेरं दधत् ।
पुष्करामृतसरस्तीर्थराजैर्युतं
भूतले भाति मेऽनारतं भारतम् ॥
हस्तिगुंफामजन्तामलौरां दधत्
खजुराहो - गया - सारनाथैर्लसत् ।
ताज-कोणार्क-विष्णुध्वजैर्मण्डितं
भूतले भाति मेऽनारतं भारतम् ॥
होलिका-दशहरा-पर्वकोजागरी-
पोंगल-श्रावणी-दीपमालामयम् ।
लोहडीदौणमाद्युत्सवैः पूरितं
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुव० ॥
ओडिसीं मणिपुरीं कथक-गर्बादिकम्
कूचिपूडि च गिद्दां छऊं भंगडाम् ।
कथकलीं डाण्डियां भरतनाट्यं दधद्
भूतले भाति मेऽनारतं भारतम् ॥
मन्दिरैर्मस्जिदैश्चैत्य - गिर्जागृहै-
रार्यगेहैर्गुरुद्वारकैर्भ्राजितम् ।
कर्मभूः शर्मभूर्धर्मभूर्मर्मभूः
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुव० ॥

नवमो भागः

वेदभाभासितं सत्कलालासितं
रम्यसङ्गीत-साहित्य-सौहित्य-भूः ।
भारती-वल्लकी-झंकृतैर्झंकृतं
भूतले भाति मेऽनारतं भारतम् ॥ ध्रुव० ॥

संस्कृतं प्राकृतं तामिलं तेलुगुं
कन्नडं कैरलीं बांगलामांगलाम् ।
वाचमन्यां च तां तां ब्रुवद् वर्धते
राष्ट्रभाषायुतं मामकं भारतम् ।।

यत्र पुण्या सरित्संगमा राजिता
यत्र पाषाणतश्चामृतं स्यन्दते ।
भावना यत्र बोधेन संगच्छते
भूतले भाति तन्मामकं भारतम् ।। ध्रुव० ।।

आर्षवृन्देषु शान्तिप्रधानेषु वै
यत्र गूढं हि तेजः प्रदाहात्मकम् ।
साध्यते यत्र योगो मुदा साधकैः
भूतले भाति तन्मामकं भारतम् ।।

यस्य वात्सल्यभावेन पूर्णं शुभं
दिव्यमुत्संगमाश्रित्य वैदेशिकैः ।
शान्तिराध्यात्मिकी निर्भयैः पीयते
भूतले भाति तन्मामकं भारतम् ।। ध्रुव० ।।

दशमो भागः

भूधराकाशतोयेषु रक्षापरो
यत्र शत्रून् भटो हेलया नाशयेत् ।
यत्र वीराङ्गना युद्धभूमिं गताः
भूतले भाति तन्ममाकं भारतम् ।।

यत्प्रजातन्त्ररक्षापरैर्मानवै-
र्नास्ति हीनं कदापि प्रभाभासुरम् ।
आत्मतेजोमयं तद्ध्यहिंसामयं
भूतले भाति मेऽनारतं भारतम् ।। ध्रुव० ।।

साधकैस्सद्भिरध्यात्मचिन्तापरै-
देंशभक्तैर्विपश्चिद्भिरापूरितम् ।
कर्षकैः कार्मिकैः स्विन्नगात्रैर्युतं
भूतले भाति मेऽनारतं भारतम् ।। ध्रुव० ।।
प्रेरणादायकं सत्कथागायकं
ज्ञानविज्ञानतेजोबलाधायकम् ।
दुःखदारिद्र्य - दग्धान् सदा पालय-
न्मोदते मे सदा पावनं भारतम् ।। ध्रुव० ।।
यत्र नास्त्यंकुशो वाचि कस्यापि वै
यत्र नास्त्यंकुशो मानसे कस्यचित् ।
यत्र नास्त्यंकुशः कर्मणि क्वापि वै
भूतले भाति तन्ममाकं भारतम् ।।ध्रुव० ।।
जीवदास्ते न जानामि कस्माद्युगात्
साम्प्रतं निर्धनत्वेऽपि सञ्जीवति ।
मृत्युहीनं जराहीनमाशान्वितं
भूतले भाति मेऽनारतं भारतम् ।। ध्रुव० ।।

[प्रत्येकं भागस्यादौ मध्येऽन्ते च समूहध्वनौ ध्रुवपदं गीयते । यथावसरं संगीतं प्रस्तूयते । मुख्यगायकः डा० रमाकान्त शुक्लः । सहगायकाः श्रीमती मृदुला गर्ग, श्री सुदीप सरकारः, कु० सुमिता मुखर्जी । संगीतकाराः श्री पंचानन सरदारः (सितारवादकः) श्रीदेवाशीषचक्रवर्ती (तबलावादकः), श्रीराकेशमेहता (सिन्थसाइजरवादकः) श्री सचिन मुखर्जी (वंशीवादकः) । द्वितीयखण्डस्य समापनसङ्गीतस्य निर्देष्टा—श्रीमहमूद मिर्ज़ा । संगीतकाराः—तत्सहयोगिनः ।]

★

भाति मे भारतं काव्यं राष्ट्रप्रगतिहेतवे
श्रीरमाकान्तशुक्लस्य नवला जपमालिका ।
दूरदर्शनसश्रीका सूरिसंसद्बहुश्रुता
सेयं कवयितुर्जीयात् कविताकल्पवल्लरी ।

—त्रिपाठी डा० भास्कराचार्यः
'दूर्वा' सम्पादकः म० प्र० संस्कृत अकादेमी, भोपालः

देववाणी-परिषद्वार्ता

देववाणी-परिषद एकादशं द्वादशं च संयुक्तमधिवेशनम्

देववाणी-परिषद एकादशं द्वादशं च संयुक्तमधिवेशनं मैनपुर्यां तत्रस्थ-सुरभारतीसेवासंस्थानस्यामान्त्रणे श्रीएकरसानन्दसंस्कृतमहाविद्यालयपरिसरे २४-१२-१९८९ ई० तारिकायां सम्पन्नम् ।

समारोहस्य प्रारम्भः आचार्यश्रीकेवशदेवतिवारिमहाभागकृतवैदिक-मङ्गलाचरणेन जातः । तदनु सुरभारतीसेवासंस्थानस्य महासचिवेन किञ्च देववाणी-परिषदोऽधिवेशनस्य स्थानीयसचिवेन डा० इच्छारामद्विवेदिना सुरभारती-वन्दना कृता । परिषदोऽध्यक्षेण आचार्यश्रीश्रीनिवासरथ-महाभागेन सरस्वत्याः प्रतिमायां माल्यार्पणं कृतम् । मुख्यातिथिना डा० मण्डनमिश्र-महाभागेन दीपप्रज्वालनेनाधिवेशनस्योद्‌घाटनं कृतम् । स्थानीयसचिवेन डा० इच्छारामद्विवेदिना स्वागतभाषणं कृतम् । परिषन्महासचिवेन डा० रमाकान्त शुक्लेन द्विवार्षिकं विवरणं प्रस्तुतम् ।

अवसरेऽस्मिन् परिषत्प्रकाशितानां त्रयाणां ग्रन्थानां समुन्मीलनमपि संवृत्तम् । उत्तरप्रदेशसंस्कृताकादम्यध्यक्षेण आचार्यश्रीकरुणापतित्रिपाठि-महाभागेन आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं 'श्रीनेहरूवृत्तम्' इति नाम काव्यं समुन्मील्य राष्ट्रियसंस्कृतसंस्थानस्य उपनिदेशकाय श्रीत्रिलोकीनाथधर-महाभागाय समर्पितम्; देववाणी-परिषदध्यक्षेण किञ्च उज्जयिन्याः कालिदास-अकादम्याः सञ्चालकेन तथा विक्रमविश्वविद्यालयस्य संस्कृविभागाध्यक्षेण आचार्यश्रीश्रीनिवासरथ-महाभागेन आचार्यश्रीधर्मानन्दजमलोकीकृतः 'कालिदास की जन्मभूमि हिमालय गढ़वाल' इति शीर्षको ग्रन्थः समुन्मील्य श्रीएकरसानन्द-संस्कृतमहाविद्यालय-प्राचार्याय आचार्यश्रीरवीन्द्रनाथपन्तमहाभागायार्पितः; मुख्यातिथिना किञ्च दिल्लीस्थश्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठस्य कुलपतिना डा० मण्डनमिश्रमहाभागेन डा० इच्छारामद्विवेदप्रणीतं 'दूतप्रतिवचनम्' नाम काव्यं समुन्मील्य आचार्यश्रीलालबिहारीद्विवेदमहा-भागायोपायनीकृतम् ।

अस्मिन्नवसरे परिषदध्यक्षेण प्रख्यातसंस्कृतकवये किञ्च प्रयागविश्व-विद्यालयस्य संस्कृतविभागे प्रवाचकाय डा०राजेन्द्रमिश्रमहाभागाय तथा च सुरभारती सेवासंस्थानस्याध्यक्षाय किञ्च पुराणेतिहासयोर्विशिष्टविदुषे आचार्य-श्रीलालबिहारीद्विवेदमहाभागाय देववाणी-परिषदो मान्यसदस्यता समर्पिता ।

तदनु विद्वदभिनन्दनानुष्ठाने परिषध्यक्षेणाचार्यश्रीरथमहाभागेन श्रीलालबिहारीद्विवेदमहाभागाय अभिनन्दनपत्रं सप्रावारकश्रीफलं समर्पितम् ।

अधिवेशनस्य मुख्यातिथिना डा० मण्डनमिश्रमहाभागेन संस्कृतस्य महत्त्वं, संस्कृतप्रचाराय देववाणी-परिषदो भूमिका, तदुन्नतये चापेक्षितानामपरेषामपि प्रयासानां प्रासङ्गिकतामवलम्ब्याभिभाषितम् ।

अधिवेशनस्याध्यक्षीयं भाषणं कुर्वता आचार्यश्रीश्रीनिवासरथमहाभागेन संस्कृतस्य त्रिकालाबाधित्वं प्रतिपादयता संस्कृतस्याध्ययनेनात्मानं पावयितुं जना आहूताः ।

अधिवेशनावसरे पारितेनैकेन प्रस्तावेन संसदि संस्कृतमाध्यमेन गृहीतशपथाः सांसदा वर्धापिताः किञ्च ते संस्कृतस्य समुचितस्थानसुरक्षणार्थं प्रयासान् विधातुं प्रचोदिता अभूवन् ।

अधिवेशनावसरे 'भाति मे भारतम्' इत्येतत्कार्यक्रमस्य वीडियोफिल्म-प्रदर्शनं, परिषत्प्रकाशितानां ग्रन्थानां प्रदर्शनी चाप्यनुष्ठिते बभूवतुः ।

निर्वाचनम्

२४-१२-१९८९ तारिकायामेव 'देववाणी-परिषद्, दिल्ली'-निर्वाचनमण्डलस्य सभायां परिषदः कार्यसमित्याः सर्वसम्मत्या निर्वाचनमपि संवृत्तं यस्य पुष्टिः तस्मिन्नेव दिने साधारणसभया कृता । तदनुसारं ३१-१२-१९९० ई० यावत् आगाम्यधिवेशनं यावद्वा निम्नलिखिताः पदाधिकारिणः निर्वाचिताः सञ्जाताः—अध्यक्षः—डा० राजेन्द्रमिश्रः, उपाध्यक्षः—डा०विष्णुकान्तशुक्लः, महासचिवः—डा०रमाकान्तशुक्लः, सहसचिवः – डा० इच्छारामद्विवेदी कोषाध्यक्षः—प्रो० वेदप्रकाशगौतमः । सदस्याः—डा० रमेशचन्द्र शुक्लः, डा० कृष्णकान्तशुक्लः, प्रो०श्रीनिवास रथः, डा०उमाकान्त शुक्लः, डा०रवीन्द्रनागरः एवञ्च डा० दुर्गाचरण शर्मा ।

नवनिर्वाचिताध्यक्षाय डा० राजेन्द्रमिश्रमहाभागाय अन्येभ्यश्च कार्य-समितिसदस्येभ्यः परिषदो निवर्तमानाध्यक्षेणाचार्यश्रीनिवासरथमहाभागेन स्वागतं व्याहृतम् ।

साधारणसभया विगतकार्यसमितिसदस्याः सम्यक्कार्यसम्पादनार्थं धन्यवादैः सभाजिताः ।

परिषन्महासचिवकृतधन्यवादज्ञापनेन अधिवेशनं सम्पूर्णतामगमत् ।

दूरदर्शने 'भाति मे भारतम्'

दिल्ली-दूरदर्शनं प्रातःकालीनराष्ट्रीयप्रसारणे 'भाति मे भारतम्' नाम संस्कृतधारावाहिकं २०-१-१९९० ई० दिनाङ्कात् प्रसारयिष्यति । अयं हि कार्य-क्रमः प्रतिशनिवासरं प्रातः ८.३६ वादनवेलायां प्रसारयिष्यते, चेत्तत्र किञ्चि-दाकस्मिकं परिवर्तनं नो भवेत् । धारावाहिकस्य पञ्च-पञ्च मिनटात्मका दश

भागाः सन्ति येषु भारतस्य भौगोलिकं, प्राकृतिकं, वैज्ञानिकप्रगतिपरकं च वैशिष्ट्यं संस्कृतपद्यैः समुन्मीलितम् ।

कार्यक्रमस्य प्रणेता निर्देष्टा मुख्यगायकश्च डा० रमाकान्तशुक्लोऽस्ति । निष्पादयित्री संस्था 'देववाणी-परिषद्, दिल्ली' अस्ति । 'ध्वन्यालोका आडियो विज़ुअल प्रा० लि०'-प्रतिष्ठानेन प्रस्तुतिसाहाय्यमाचरितम् । प्रसिद्धसितार-वादकः श्रीमहमूदमिर्ज़ामहाभागः सङ्गीतविधानस्य प्रमुखः परामर्शदातास्ति । संगीतनिर्देशनं श्रीपञ्चाननसरदारमहाभागेन कृतम् । सहगायकाः श्रीमतीमृदुला गर्ग-सुमिता मुखर्जी-श्री सुदीपसरकाराः सन्ति । संगीतकाराः सर्वश्रीदेवाशीष चक्रवर्ती - राकेशमेहता - सचिनमुखर्जी - अलाउद्दीन-सईदखान - गफूर कुरैशी-मुसर्रतखान-अकरमखान-जी० वेंकटेश-शरीफ़अहमदाः सन्ति ।

आशास्यते यत्संस्कृतानुरागिणो दर्शकाः कार्यक्रममिमं वीक्ष्य स्वविचारैः दूरदर्शनाधिकारिणः कार्यक्रमप्रणेतारं च परिचाययिष्यन्ति ।

(डा० इच्छाराम द्विवेदी)

संस्कृत-जगद्वार्ता

नृत्यनाटकसंगीत-परिचर्चा

मुम्बय्यां भारतीयविद्याभवने देववाणी-मन्दिरस्य ऋषीकेशस्थहिन्दूहेरिटेज-रिसर्चफाउण्डेशनस्य च संयुक्ततत्त्वावधाने श्री श्री० भि० वेलणकरमहाभागेन नृत्य-नाटक-संगीत-विषयिणी परिचर्चा समायोजिता । कार्यक्रमोऽयं ११—१२-१-१९९० तारिकयोः समायोज्यत । अस्मिन्नवसरे नृत्याङ्गना-शकुन्तला-नृत्यनाट्यकार्यक्रमयोः प्रयोगोऽप्यक्रियत ।

मैनपुर्यां संस्कृतसम्मेलनम्

मैनपुर्यां सुरभारतीसेवासंस्थानेन २२—२४-१२-१९८९ ई० तारिकासु त्रिदिवसीयमखिलभारतीयं संस्कृतसम्मेलनमायोजितम् । (अस्य विस्तृतं विवरण-मर्वाचीनसंस्कृतस्य अग्रिमें ऽके प्रकाशितं भविष्यति—सम्पादकः) ।

अष्टमं विश्वसंस्कृतसम्मेलनम्

अष्टमं विश्वसंस्कृतसम्मेलनंम् आस्ट्रियादेशस्य 'वियना' नगरे २७-८-१९९० तः २-९-१९९० यावदायोजयिष्यते । अस्मिन् सम्मेलने अर्वाचीनसंस्कृत-साहित्यविषयकोऽप्येको विभाग आयोजयिष्यते । पत्रव्यवहारार्थं संकेतः—
The Secretary, VIII World Sanskrit Conference, Universitat Wien, Department of Indology, Universitat Strasse, WIEN-1010-AUSTRIA. Europe.

सर्वभाषाकविसम्मेलने डा० राजदेवमिश्रस्य कविता

२१.१ ९० तारिकायां नागपुरे समायोज्यमाने आकाशवाण्याः सर्वभाषाकविसम्मेलने संस्कृतस्य प्रतिनिधित्वं कविवरेण किञ्च सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिना डा० राजदेवमिश्रमहाभागेन करिष्यते । तस्य काव्यस्य हिन्द्यनुवादः प्रसिद्धहिन्दी-गीतकारेण श्रीमधुरशास्त्रिमहाभागेन प्रस्तोष्यते ।

डा० रामकरण शर्मा साहित्य-अकादम्या पुरस्कृतः

१९८९ तमवर्षस्य संस्कृतभाषाविषयकं साहित्य-अकादमी-पुरस्कार 'सन्ध्या'-रचनार्थं लभमानो डा० रामकरणशर्ममहाभागो वर्धाप्यते । ग्रन्थप्रणेता डा० शर्ममहाभागो नैकसंस्कृतविश्वविद्यालयकुलपतित्वेन, शासकीयाधिकारित्वेन, लेखकत्वेन च संस्कृतजगतः सुपरिचित एव ।

पण्डितराज-जगन्नाथ-जयन्ती

दिल्ली-संस्कृत-अकादम्या १६-१०-१९८० ई० तारिकायां पण्डितराज-जगन्नाथ-जयन्त्युपलक्ष्ये 'पण्डितराजजगन्नाथस्य व्यक्तित्वं कर्तृत्वं राष्ट्रैक्यं चे'ति विषयमवलम्ब्य पुराणसचिवालय-सभागारे एका संगोष्ठी आयोजिता यस्या आध्यक्ष्यं डा० रमेशचन्द्रचतुर्वेदमहाभागेन कृतम् । मुख्यवक्ता सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य साहित्यविभागाध्यक्षो डा० कैलासपतित्रिपाठिमहाभाग आसीत् । अन्ये वक्तार आसन् —श्रीमित्रनाथयोगी, श्रीराजेन्द्रप्रसादशर्मा, श्रीप्रकाशचन्द्र जैनश्च ।

आद्यकुलपतेः डा० मण्डनमिश्रस्याभिनन्दनम्

नवदिल्ल्यां राष्ट्रीयसंग्रहालये १७-१०-१९८९ ई० तारिकायां नवदिल्लीस्थाभिरनेकाभिः संस्कृतसस्थाभिः श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठस्य आद्यकुलपतिपदे नियुक्तस्य डा०मण्डनमिश्रमहाभागस्याभिनन्दनं कृतम् ।

अस्मिन्नवसरे देशस्य प्रमुखाः साहित्यसेविनो नेतारश्छात्राश्च स्वविचारान् प्रकटीचक्रुः । दिल्लीस्थसंस्कृतसेविसंस्थापरिवारसहितैः श्रीलालबहादुरशास्त्रिसंस्कृतविद्यापीठीयाध्यापकपरिषदः सदस्यैः डा० मिश्रमहाभागायैकमभिनन्दनपत्रमपि समर्पितम् ।

डा० राजेन्द्रप्रसाद-जयन्ती

नवदिल्लीस्थ 'गुडविल चिल्ड्रन पब्लिक स्कूलेन' ३-१२-१९८९ ई० तारिकायां डा० राजेन्द्रप्रसादजयन्त्युपलक्ष्ये चित्रकलाप्रतियोगितायाः संस्कृतगीतप्रतियोगितायाश्चायोजनं कृतम् । मुख्यातिथिना डा० रमाकान्तशुक्लेन पुरस्कारवितरण कृतम् ।

नवोदितप्रतिभासमागमः

'मध्यप्रदेश संस्कृत अकादमी' ८-१२-१९८९ ई० तारिकायां सागरनगरे

डा० हरिसिंहगौर-विश्वविद्यालयस्य सहयोगेन 'नवोदितप्रतिभा-समागम'-मायोजितवती ।

अस्मिन्नवसरे प्रख्यातः संस्कृतकविः पण्डितश्च डा० रेवाप्रसादद्विवेद-महाभागः 'कालिदास-ग्रन्थावल्याः' प्रामाणिक-संस्करण-सम्पादनार्थं 'व्यास-पुरस्कारेण' सम्मानितोऽभूत् ।

'रसो वै सः' इति विषयमवलम्ब्य साहित्यशास्त्र-परिचर्चायां पुरीतः समागतेन श्रीव्रजकिशोरनायकमहाभागेन प्रथमः श्री सत्यनारायण आचार्येण च द्वितीयः पुरस्कारः प्राप्तः । शलाकापुरुषत्वं डा० रेवाप्रसादद्विवेद-डा० बच्चूलालावस्थि-डा० रमाकान्तशुक्लैर्निर्व्यूढम् ।

एकलनाट्यप्रतियोगितायां डा० शर्मिला चटर्जी प्रथमं श्रीसत्यनारायण आचार्यश्च द्वितीयं पुरस्कारमलभताम् । अस्मिन्नवसरे समकालीनसंस्कृतकवि-समवायोऽप्यायोज्यत यस्य सञ्चालनं म० प्र० संस्कृतअकादमीसचिवः किञ्च संस्कृतकविसम्मेलनसञ्चालनचुञ्चुः डा० भास्कराचार्यत्रिपाठिमहाभागः कृतवान् । अस्मिन् कविसमवाये डा० राजेन्द्रमिश्र-डा० विन्ध्येश्वरीप्रसाद मिश्र डा० प्रेमनारायणद्विवेद डा० पुष्पा दीक्षित डा० रेवाप्रसाद द्विवेद-डा० केशवचन्द्रदाश-डा० रहसबिहारी द्विवेद-डा० राधावल्लभत्रिपाठि-डा० बच्चूलालावस्थि - डा०कामताप्रसादत्रिपाठि - डा० भास्कराचार्यत्रिपाठि-डा० रमाकान्तशुक्लादिभिः स्वरचनाः पठिताः ।

संस्कृतगीतप्रतियोगिता

गुरुकुलकांगडीविश्वविद्यालयेन २१-१२-१९८९ ई० तारिकायां स्वामिश्रद्धानन्दबलिदान - सप्ताहावसरेऽखिलभारतीय-संस्कृत-गीत-प्रतियोगिता-योजिता यत्र चत्वारिंशत्प्रायैश्छात्रैः संस्कृतगीतानि सस्वरं प्रस्तुतानि । कुलपतेः प्रो०रामप्रसादवेदालंकारस्य सान्निध्ये समायोजिताया अस्या संयोजनं सञ्चालनं च संस्कृतविभागप्रवाचकेन डा० महावीरशास्त्रिमहाभागेन कृतम् । संस्कृत-विभागाध्यक्षेण प्रो० वेदप्रकाशशास्त्रिमहाभागेन विदुषां स्वागतं कृतम् । प्रतियोगितायाः आध्यक्ष्यं डा० रमाकान्तशुक्लेन कृतम् । तेन काश्चन स्वकीया रचना अपि श्राविताः । कुलपति प्रो० रामप्रसादवेदालंकार-महाभागेन स्वपाण्डित्यपूर्णे सरसे च व्याख्याने वेदस्य देवकाव्यत्वं प्रतिपादितं स्वकाव्यं च श्रावितम् । समारोहेऽस्मिन्नैके विद्वांसः समुपातिष्ठन् ।

दूरदर्शने मृच्छकटिकम्

१९९० तम वर्षस्य फरवरीमासे दूरदर्शने प्रतिशुक्रवासरं प्रदर्श्यमाणं 'मृच्छकटिकं' नाम नाटकं सम्पूर्णतां यास्यति । हृद्यतया प्रस्तुतमिदं नाटकं पुनरपि

प्रसारणमर्हति। अस्य समयो यदि रात्रौ निर्धारितः स्यात्तर्हि बहवस्तेऽपि जना अस्य रसास्वादनं कर्तुं पारयन्ते ये कार्यव्यापृतिवशात्प्रातःकाले बहिर्गृहं तिष्ठन्ति।

डा० वासुदेवकृष्णचतुर्वेदमहाभागाय शुभाशंसनपत्रम्

सूरतनगरे ६.११.१९८९ ई० तारिकायां श्रीमद्वल्लभाचार्यशुद्धाद्वैतसम्प्रदायसष्ठपीठाधीश्वरैः गोस्वामिश्रीव्रजरत्नलालजी-श्रीबालकृष्णलालजी-श्रीकल्याणरायजी-अग्निचिच्छ्रीवल्लभरायदीक्षितैश्च श्रीमद्भागवतस्य श्रीमद्वल्लभाचार्यस्याशेषग्रन्थानां च पारायणावसरे मथुरानिवासिने श्रीभागवतरसरसिकविद्वद्वर्याय किञ्च 'व्रजगन्धा'-सम्पादकाय आचार्यडा०वासुदेवकृष्णचतुर्वेदमहाभागाय शुभाशंसनपत्रं सम्प्रदत्तम् यत्र अष्टपद्येषु डा० चतुर्वेदमहाभागस्य गुणावली वर्णिता।

किष्किन्धाक्षेत्रे संस्कृतसम्मेलनम्

२६–२७.१२.१९८९ ई० तारिकयोः संस्कृतसमन्वयसमितेस्तत्त्वावधाने तुङ्गभद्रानदीतटे हॉस्पेट् हैम्पी विज नगरे किष्किन्धा-कर्णाटकक्षेत्रेऽखिलभारतीयसंस्कृतसम्मेलनमायोज्यत। सम्मेलनस्योद्घाटनं सम्मेलनाध्यक्षेण श्रीमता शङ्करानन्दतीर्थमहाभागेन कृतम्। सम्मेलनसंयोजकेन डा० कृष्णनारायण पाण्डेयमहाभागेन सम्मेलनस्य पूर्वपीठिकागामियोजनादिविषयकं विवरणं प्रस्तुतम्।

सम्मेलनेऽस्मिन् संस्कृतप्रचारप्रसारार्थं नैके प्रस्तावाः पारिता अभूवन्, वेदपाठ-संस्कृतान्त्याक्षरी-कविसम्मेलनादिविविधकार्यक्रमाश्चायोज्यन्त।

(रमा शुक्ला)

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 250.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्यय : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते । किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात् । ग्राहकाः ग्राहकशुल्कं **'अर्वाचीनसंस्कृतम्'** (Arvacheenasanskritam/*Arvācīnasaṃskṛtam*) इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M. O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते ।

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्) ।

'देववाणी-परिषद, दिल्ली'-कृते डा रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहारः, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१२/१)-प्रधानसम्पादकः डा० रमाकान्त शुक्लः । प्रकाशनतिथिः १५.१.१९९० ।

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु० ५०.००
२.	श्रीनेहरुवृत्तम् (आचार्य रमेशचन्द्र शुक्लः)	रु० १५.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
९.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ४०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृतसाहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१५.	दयानन्दसूक्तिसप्तशती (श्री शिव कुमार मिश्र)	रु० १५.००
१६.	गान्धिसूक्तिसप्तशती (,, ,,)	रु० १५.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) (,, ,,)	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्रः)	रु० १२.००
२९.	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००
३१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
३२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३३.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
३४.	ऋतम् (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

द्वादशवर्षे द्वितीयोऽङ्कः

१५ अप्रेल, १९९०

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली-११० ०५९

अर्वाचीनसंस्कृतम् (१२/२)

(R. N. 34554/79)

(१५ अप्रेल १९९० ई०)

विषय-सूचिः

	विषयः	लेखकः	पृष्ठांकः
१.	सम्पादीयकम्	सम्पादकः	६५
२.	उड्डीयते विमानम्	डा० हरिदत्त शर्मा, पेरिस (फ़्रांस)	६७
३.	वसन्तगीतम्	डा० कृष्ण मुरारिः शर्मा, होशियारपुरम्	६९
४.	वसन्त-गीतिः	डा० विन्ध्येश्वरी प्रसाद मिश्रः 'विनयः, उज्जयिनी	७१
५.	मातुः स्तवकः	डा० बच्चूलाल अवस्थी 'ज्ञानम्', उज्जयिनी	७२
६.	जाबालिपुर चल	डा० रमाकान्त शुक्लः, दिल्ली	७७
७.	परिहास-प्रहेलिकाः	डा० सुधीकान्त भारद्वाजः, रोहतकः	८०
८.	यतो यतोऽपि गम्यते	डा० भगवतीलाल राजपुरोहितः, उज्जयिनी	८१
९.	धारणा	डा० प्रकाश पाण्डे, नागपुरम्	८५
१०.	आन्दोलनम्	डा० इच्छाराम द्विवेदी, मैनपुरी	९८
११.	जापानदेशीयानि 'तान्का' काव्यानि	डा० हर्षदेव माधवः, अहमदाबादः	१०१
१२.	'सौरि-सरे'ति महावाक्यम्	डा० रामेश्वरदत्त शर्मा, भिवानी	१०५
१३.	मावमंस्थाः सखे	डा० परड्डी मल्लिकार्जुनः, धारवाडः	१०७
१४.	असंख्यातवर्षाणि जीवनम्	डा० परमानन्दः शास्त्री, अलीगढम्	१०९
१५.	क्व गच्छानि क्व यानि ?	डा० कृष्णनारायण पाण्डेयः, गोआ	१११
१६.	नवप्रकाशन-चर्चा	१) श्री अरविन्दनाभः शुक्लः, मुजफ़्फ़रनगरम्	११३
		२) श्री श्री०भि०वेलणकरः, मुम्बई	११६
		३) डा० रमाकान्तशुक्लः	११७
१७.	'भाति मे भारतम्' वीक्ष्य	संक०कु० वन्दना मिश्रा	१२०
१८.	देववाणी-परिषद्वार्ता		१३१
१९.	संस्कृत-जगद्वार्ता	रमा शुक्ला	१३२

सम्पादकीयम्

अथ प्रस्तूयते 'अर्वाचीनसंस्कृतस्य' द्वादशवर्षीयो द्वितीयोऽङ्कः। अत्र एकादश कविताः, द्वे कथे, एको लेखः, तिस्रो ग्रन्थसमीक्षाः, 'भाति मे भारतम्' इति दृश्यश्रव्यकार्यक्रममवलम्ब्य केषाञ्चित्सहृदयदर्शकानां विचाराः, देववाणी-परिषद्वार्ता, संस्कृत-जगद्वार्ता च प्रकाश्यन्ते।

'उड्डीयते विमानम्' इत्येषा कविता १७.१.१९९० तारिकायां डा० हरिदत्तशर्मणा पेरिसयात्रां कुर्वाणेन क्लृप्ता। 'वसन्तगीते' डा० कृष्णमुरारिः शर्मा 'वसन्तगीत्यां' च डा० विन्ध्येश्वरीप्रसादमिश्रः वसन्त-वैभवं समुन्मीलयतः। डा० बच्चूलाल अवस्थी 'मातुः स्तवके' मातुर्महिमानं अकैतवभावेन प्रौढ्या च कवयति।

'जाबालिपुरं चल...' इतीयं रचनैतत्पंक्तिलेखकेन २२.१२.१९८८ ई० तारिकायां प्रणीतासीत्। जाबालिपुरे मध्यप्रदेशसंस्कृताकादम्या रानीदुर्गावती-विश्वविद्यालयसंस्कृतपालिप्राकृतविभागेन च २२-२३.१२.१९८८ ई. तारिकयोः 'राजशेखरशोधसंगोष्ठी' आयोजितासीत्। अस्मिन्नवसरे २३.१२.१९८८ ई. तारिकायां समायोजिते 'संस्कृतकविसमवाये' इयं रचना पठिता। कविसमवायस्याध्यक्ष्यमाचार्यबच्चूलालावस्थिभिः कृतम्। तत्र ये कवय आमन्त्रिता आसन् तेषां संकेतः पञ्चमे पद्ये कृतः किन्तु डा० रेवाप्रसादद्विवेद—डा० कमलेश त्रिपाठिनावपरिहार्यकारणैस्तत्र काव्यपाठाय न सुलभीभूतौ। शेषे सर्वेऽपि कवय उपस्थिता आसन्। डा० भास्कराचार्यत्रिपाठिना कविसमवायस्य सञ्चालनं कृतम्।

अस्यां गेयरचनायां जावालिपुरस्य सांस्कृतिकं, साहित्यिकमैतिहासिकं, च महत्त्वमुपवर्णितमस्ति। नर्मदा 'भेडाघाट'-निकटे स्थितं जाबालिपुरं यथा प्राकृतिकरामणीयकं तथैव नैकेषां साहित्यकाराणां, देशभक्तानां च साधनामपि स्वक्रोडे धत्ते। यद्यपि समाचारपत्रेष्वत्र पुरे तेज़ापः (तेज़ाब) क्षेपणादिघटना अपि नैकवारं मुद्रिता दृश्यन्ते तथापीदं पुरं 'संस्कारधानी'ति नाम्ना प्रसिद्धमस्ति। सर्वथा निर्दोषता तु कस्यापि न सम्भाव्यते। अतोऽस्माभिः दोषवर्जं गुणा एव ग्राह्याः। दोषा न स्युरिति परमेशः प्रार्थनीयः। इत्येव दृष्टिरस्यां रचनायां कवेरस्ति।

परिहास-प्रहेलिकासु डा० सुधीकान्तभारद्वाजः नेतृ-तीर्थपण्डित-कवीनधिक्षिपति। 'यतो यतोऽपि गम्यते' इत्यत्र डा० भगवतीलाल राजपुरोहितः अद्यत्वे प्रायः सर्वत्रैव व्याप्तं भ्रष्टाचारं प्रकाशयति। डा० हर्षदेवमाधवः

'जापानदेशीयानि तान्का-काव्यानी'त्यत्र लघ्वी: कथा: पञ्चपंक्त्यात्मकेषु वृत्तेषु प्रस्तौति। 'सौरि सरेति महावाक्यम्' इत्यत्र डा० रामेश्वरदत्तशर्मा विश्वस्मिन् जगति लब्धप्रसरं 'सौरि सर (Sorry Sir)' इतिवाक्यमवलम्ब्य व्यङ्ग्यं प्रस्तौति। डा० परड्डी मल्लिकार्जुनः 'मावमंस्थाः सखे' इत्यत्र सुख तिरस्करिण्या अपवारितं दुःखमपि अवलोकयितुं मानवान् परामृशति। 'असंख्यातवर्षाणि जीवनम्' इत्यत्र प्रो० परमानन्द शास्त्री जीवनस्य नैरन्तर्यं लोकोपकारकत्वेन चास्यान्वर्थत्वं प्रतिपादयति। मृत्युञ्जयस्य कवेर्मृत्योभीतिर्न भवति।

'धारणा' तत्कर्तृमते एका दिव्यकाव्यकथा (Epic Story) अस्ति। ध्वनेरध्वनि परापतितानां कृते विषमेव। वक्रतायै त्वमृतम्। किन्त्विमे समीक्षाप्रान्ताः। अतो न तावत् गम्भीरतया ग्रहीतव्याः। कथालेखको डा० प्रकाश पाण्डे दान्तेवत् प्रेम निमित्तीकृत्य किमपि विश्वे समवकलयति। इयमेव 'धारणा', न रागादिकम्। तथापि रागे सिद्धे सञ्जाते, कापि महन्महनीया 'विश्वधारणा' समुदयमयते एव। अस्याः संसिद्धयेऽयं 'लघुकथा' मार्गेण सम्प्रयासः। 'आन्दोलन'मिति लघुकथा नास्ति जटिला। डा० इच्छाराम द्विवेदिना असमीक्ष्यकृतानामान्दोलनानां विषमपरिपाकोऽत्र प्रदर्शितः। 'क्व गच्छानि क्व यानी' ति लेखे संस्कृत-समन्वय-समिति-सचिवो डा० कृष्णनारायणपाण्डेयः संस्कृतस्य आयोजनानां साफल्यार्थं संस्कृतज्ञानां परामर्शान् कामयते। नवप्रकाशनचर्चायां श्री अरविन्दनाभशुक्ल-श्री श्री० भि० वेलणकर-रमाकान्तशुक्लैः त्रयः संस्कृत-ग्रन्थाः संक्षेपतः समीक्ष्यन्ते। 'भाति मे भारतं वीक्ष्य' इत्यत्र स्तम्भे दूरदर्शनार्थं निष्पादितस्य संस्कृत कार्यक्रमस्य विषये केषाञ्चित् संस्कृत-कर्णधारानां सहृदयानाञ्च प्रतिक्रिया अंशतः प्रकाश्यन्ते। देववाणी-परिषद्वार्तायां सस्कृतजगद्वार्तायां च विगतमासत्रये घटिताः काश्चन घटनाः प्रदीयन्ते।

पाठकाः सावधानतायामपि जातानां मुद्रणत्रुटीनां परिमार्जनार्थं सानुक्रोशा भवितुमर्हन्ति।

विदुषामाश्रवः



(डा० रमाकान्त शुक्लः)
प्रधानसम्पादकः

१७.४.१९९० ई.
आर ६ वाणी-विहारः
नयी दिल्ली ११००५९

उड्डीयते विमानम्

[डा० हरिदत्त शर्मा[1] अतिथिप्राध्यापकः मैज़ों द' लोम, पेरिसनगरम् (फ्रांसः)]

उड्डीयते विमानम् !
गच्छति वियति विमानम् !!
भूमौ सरति सुमन्दं पूर्वं पश्चाच्चलति सवेगम् ।
अवनितलादुत्थाय क्रमशो धावतीदमभिमेघम् ।।
विदधत् तीव्रं ध्वानम्
उड्डीयते.........
पवने करौ प्रसार्य याति किं गगने पवनसुतोऽयम् ।
खेचरराजः खे धावति किं धृतलम्बितपक्षोऽयम् ।।
शिरसि हि धृत्वा मानम्
उड्डीयते.........
उल्लसितं विलसितं जीवनं खेलतीह सम्पूर्णम् ।
भूमेर्दूरं वाताभिमुखं नभसि नु गच्छति तूर्णम् ।।
यन्त्रनिर्मितं यानम्
उड्डीयते.........
धवला धवला हिममाला वा घनमाला गिरिमाला ।
जलनिधिजलमालावलोक्यते प्रकृतिसुलीलामाला ।।
विगतं भेदज्ञानम्
उड्डीयते.........
हिमवर्षोपल-वात्याचक्रं दृढं भेदयत् सर्वम् ।
मेघसमूहान्तरितमपीदं याति निशासु सगर्वम् ।।
विपरीतं सहमानम्
उड्डीयते.........

---

१. स्थायी आवासः, १०० एलनगंज, प्रयागः ।

सुललितदेहाः सुस्मितशीला नववसनानि दधानाः ।
परिचर्यानिरता नवबाला रसवर्षं तन्वानाः ॥
आकर्षन्ति ध्यानम्
उड्डीयते………

स्वादु भोजनं नव्यमोदनं विविधफलरसं पेयम् ।
मिष्टान्नं लावणिकं शाकं परिवेषयते सेयम् ॥
वर्षन्ती प्रेमाणम्
उड्डीयते………

अमरीकी रूसी फ्रांसीयो भारत-जापानीयः ।
लङ्का-चीन-जर्मनीवासी कश्चिदाङ्ग्लदेशीयः ॥
याति निजनिजं स्थानम्
उड्डीयते………

काचिदेकला तरुणी तरुणा वृद्धाः केचिद्बालाः ।
केऽपि समूहनिबद्धयात्रिणो विविधजनानां मालाः ॥
भवति विविधताभानम्
उड्डीयते………

विश्वभ्रमणं स्वजनैः सह मेलनं कर्तुमप्येके ।
शैक्षणिकीं सांस्कृतिकीं यात्रामौद्योगिकीमनेके ॥
कुर्वन्ति प्रस्थानम्
उड्डीयते………

नैकेषां देशानामिह भूखण्डानां सङ्घटनम् ।
समग्रैव वसुधा कुटुम्बकं दृढीभवति वै वचनम् ॥
प्रसरति विश्वे ज्ञानम्
उड्डीयते………

जीवननिधिमादायामूल्यं शतमारोहति गगनम् ।
पुनरवतीर्य ददाति जनन्यै भूम्यै सर्वं स्वजनम् ॥
सततं सेवादानम्
उड्डीयते………

❀

वसन्तगीतम्

(डा० कृष्णमुरारिः शर्मा, विश्वेश्वरानन्द-विश्वबन्धु-संस्कृत-भारतभारती-अनुशीलन-संस्थानम्, होशियारपुरम्)

आयातो नव वसन्त आलि !
नववसन्त आयातः ।
क्वापि ययौ भीतः शिशिरो हसितोऽयं नवप्रभातः ।।
तुहिनकणाः पवने नहि सम्प्रति नैव कम्पनं काये ।
आकाशे दिनमणिर्दीप्यते तेजोमय उच्छ्राये ।
तटिनो वहति सलीलं सुखदा,
पन्था रश्मिस्नातः ।
आयातो नववसन्त आलि० ।।

दिशि दिशि गानं वेणुवनानां पानं छविच्छटायाः ।
विकसितकुसुमसमूहे भूयो भ्रमणं भ्रमरघटायाः ।
स्मितं सुहासः पाटलपाल्याः
कथमिव लासो जातः ।
आयातो नववसन्त आलि० ।।

मनसि मृदङ्ग-वादनं पुनरपि सदनमागते कान्ते ।
चरणयुगे नवनूपुररावो विचरति क्वापि दिनान्ते ।
द्वारे दीपोज्ज्वलनं प्रीत्याः
कलनं मदनकृपातः ।।
आयातो नववसन्त आलि० ।।

नवपलाशपुञ्जे सखि कुञ्जे कालो रञ्जितरागः ।
चन्द्रतारकाणां प्रतिभासे मुदितः सोऽपि तडागः ।
वीणागीतनिनादितवचनं
चक्षुषि मणिर्निखातः ।।
आयातो नववसन्त आलि० ।।

मधुरं गायति पिको हर्षितो दूरे रसिकरसाले ।
रटति चातकः कलितकदम्बे नर्तितपत्रप्रवाले ।
लोको नन्दति वन्दति देवं
सुखदातपसंघातः ।।
आयातो नववसन्त आलि० ।।

वसन्त–गीतिः

(डा० विन्ध्येश्वरीप्रसादो मिश्रः "विनयः" विक्रमविश्वविद्यालय-
संस्कृत-विभागे प्राध्यापकः, उज्जयिनी)

स्वागतं सुवसन्त ! नितरां स्वागतं ते ।
मङ्गलं तनुयात् प्रसरणं साम्प्रतं ते ॥
वर्षमेकमतीत्य पुनरप्यागतस्त्वं
प्राणिनां स्थिरजङ्गमानां सम्मतस्त्वं
कीदृशं नु सखे ! विचित्रमिदं व्रतं ते ।
स्वागतं सुवसन्त ! नितरां स्वागतं ते ॥
दर्शनात्तव पुलकिता दयिता वनाली,
स्यन्दनं स्थगयति नभसि ननु किरणमाली;
नुतिर्तति विदधाति कोकिलकलरुतं ते ।
स्वागतं सुवसन्त ! नितरां स्वागतं ते ॥
तव पदन्यासे विकासे मञ्जुहासे
वसति कल्याणीकला क्रीडाविलासे
कं न सम्प्रेरयति सम्प्रति झङ्कृतं ते ।
स्वागतं सुवसन्त ! नितरां स्वागतं ते ॥
नवनवोन्मेषस्त्वदीयः श्रेयसे नः
सम्भवेन्मधुसम्प्रवेशः प्रेयसे नः
ऋतुपते ! प्रतिभारतं कुरु भारतं, ते ।
स्वागतं सुवसन्त ! नितरां स्वागतं ते ॥

मातुः स्तवकः

(डा० वच्चूलालः अवस्थी "ज्ञानम्" कालिदास अकादेमी, उज्जयिनी)

पतिप्राणे मातः क इव महिमानं तव नुयात्
पतिं स्वान्तःसारैः सह चिदणुनांशेन बिभषे ।[१]
नवीकर्तुं कार्तस्वरमिव शरीरं प्रकुरुषे
परिष्कर्तुं कर्तुं जगति कृतकृत्यं विनयसे ॥

निकायो धातूनां मसृणमसृणः पुत्रपदवीं
दधानो दम्पत्योः प्रणयनिलये कूजनपिकः ।
व्यलीकव्यावृत्तो हृदयविभवः संभृतरसः[२]
कुटुम्बप्रस्तारो नलिननिकुरुम्बो द्युसरितः ॥[३]

स्मितं किंचित् साचि स्फुरदधरयोः कोणकलितं[४]
विधाय भ्रूभङ्गं नयनयुगलीचालनपटुः ।
तव स्तन्यं धातुं कृतकरुदितं यत् स तनुते
स विस्रम्भस्तम्भो भवति जननि त्वय्यकृतकः ॥[५]

---

१. चित्परमाणुरूपेण पत्युः प्रवेशो गर्भे विधीयते । तथा चैतरेयब्राह्मणे—
"पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम् ।
तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ॥
तज्जाया जाया भवति यदस्यां जायते पुनः ।" इति ॥

२. व्यलीकम्=छद्म, मिथ्या ।

३. प्रस्तारः पिङ्गलशास्त्रे निरूढः । तथाहि अष्टाक्षरच्छन्दसः प्रस्तारेण भेदबाहुल्यं गण्यते । पुत्रेणापि तथैव सापिण्डरीत्या कुटुम्बप्रसारः प्रभवति ।

४. साचि=तिर्यक्

५. विस्रम्भः खलु जनन्यामकृत्रिम एव, रुदितं परं कृत्रिमप्रदर्शनं भवेदिति भावः । विश्वासशङ्कुप्रतिबद्ध एव बालो रोदितीति यावत् ।

धमन् धायं धायं करविधृत-पीयूषकुतुपौ[६]
प्रमीलाधीनः सन् निभृतवदनोऽसौ जपति यत् ।[७]
समाश्वस्तो वक्षस्तव समुपधाय स्वपिति यत्[८]
स आनन्दाभोगो भगवति सुराणामसुलभः ॥

निलिम्पा लिम्पन्तु प्रसभमभिकाश्चन्दनघनं[९]
सुरीणां स्वर्णद्यां निधुवनधुवित्रं विधुवतु ।[१०]
सुराधानो गन्धैर्मदयतु मुहुर्नन्दनवनं
यदम्बाया अङ्कः प्रथयति सुखं तद् दिवि कुतः ॥[११]

मुदा सध्रीचीना तरलसरला पालिविषये
प्रयोगे नीचीना निरुपधि विषूचीनखचना ।
अपीचीन-स्नेहा विरचित-पराचीन-वलया
प्रतीचीनाम्बायाः सुतवदनचुम्बा विजयते ॥[१२]

---

६. स्तनंधयो स्तनं धमति, मुखेन फूत्कृत्य पिबन् विनोदं तनुते । कुतुपशब्द इह स्तनार्थे लाक्षणिकः ।

७. प्रमीला=तन्द्रा । शिशुस्तन्द्रालुर्मुखेन जपन्निव दृश्यते ।

८. उपधाय=वक्षोजावुपधानीकृत्य ।

९. निलिम्पा देवाः । अभिकाः कामुकाः ।

१०. निधुवनं कामकेलिः । धुवित्रं मृगचर्मकृतं व्यजनम् । देवाङ्गनाः स्वर्णदीजले धुवित्रं कम्पयित्वा प्रियाणां काममुद्दीपयेयुः, तथा तथा क्रीडेयुरिति भावः ।

११. दिवि हि न मातुरङ्कं लभन्ते ।

१२. सध्रीचीना=सहकृता । नीचीना=न्यग्भावं गता, वात्सल्येनाभिभूता । प्रयोगे=चुम्बनव्यापारे । विषूचीनं विष्वक् कृतरेखं खचनं यस्याः । अपीचीनो निगूढः । पराचीनं विवलितं किञ्चित् तिरश्चीनम् । तिरश्चीना प्रत्यावृत्ता, सकृत् तृप्तिमनधिगततया पुनः पुनश्चुम्ब्यत इति भावः ।

प्रविष्टः सप्तत्यां जयति रसनिष्पत्तिनिपुणः[13]
प्रवीणो वादेषु म्रदयति मुनीनामपि मनः ।[14]
जराजीर्यन्मूर्तिर्जरयति भयं यद् भवकृतं
रसज्ञायां लग्नः स तव भवति स्तन्यमहिमा ।।

हिमर्तौ सप्तार्चिः प्रतपति तपे त्वं हिमरुचि-
स्त्वमौशीरी कुम्बा वहति दहनोष्णेऽपि पवने ।[15]
विपत्तौ सम्पत्तिः स्मरणविषयीभूय महसा
सुताय त्वं मातः सकलमनुकूलं कलयसि ।।

रसस्त्वं त्वं रक्तं पिशितमथ मेदोऽस्थि च शिरा
धमन्यो मज्जा त्वं बलमपि मनश्चेन्द्रियगणः ।
अमीषां संघातश्चिदवकलितः षोडशकलो[16]
न तत् किंचिज्जन्तौ जननि घटते यन्न भवसि ।।

अभावानां भावस्तव सति तिरोभाववचनः[17]
स तेऽम्ब प्रत्नानां प्रतनु-तनुधारासु नियतः ।[18]
अभिव्यक्ति यां च प्रसव इति गायन्ति कवयो
निमित्तानां भावे तव भवति भावो भव इति ।।[19]

---

१३. सप्तत्यां प्रविष्टः=सप्ततिवर्षदेशीयो वृद्धः ।

१४. म्रदयति=मृदूकरोति ।

१५. कुम्बा=वृतिः ।

१६. प्राणः, श्रद्धा, आकाशः, वायुः, तेजः, आपः, पृथिवी, इन्द्रियम्, मनः, अन्नम्, वीर्यम्, तपः, मन्त्राः (वर्णाः), कर्म, लोकः, नाम चेति पुरुषस्य षोडश कला उपनिषत्सु पठिताः । तद् यथा—

—"स प्राणमसृजत । प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नम् । अन्नाद् वीर्यं तपो मन्त्राः कर्म, लोका लोकेषु नाम च ।"

(प्रश्नोपनिषद् ६/४)

१७. अभावः खलु वेदान्ते तिरोभावरूपो भाव एवेति ।

१८. प्रतनुतनवः=सूक्ष्मशरीराणि जन्मसु प्रवर्तमानानि ।

१९. निमित्तकारणसामग्रीसमवधाने सत्युपादानस्य कार्यात्मना य आविर्भावः स एव भवरूपेण भावो निगद्यते लोके ।

उपादाने मूले त्वयि जगदिदं जन्म लभते
त्वयि स्थित्वा काले त्वयि विलयमेति प्रतिलयात्।[२०]
त्रिदेवप्रख्यानं यदुपलभते शक्तिशबलं
तदद्वैतं मात्रीभवति महितं तत्त्वममृतम् ॥

विरिञ्चिर्वैराजं रचयतु विवर्तेन भुवनं
चतुर्बाहुर्बाढं वृढयतु दृढं पोषयतु तत् ।
क्षणात् संवर्तेन त्रिपुरमथनः संहरतु च[२१]
त्रयः क्रोडाक्रीडे तव जननि चेक्रीडपृथुकाः ॥[२२]

जगत् पिण्डीभूतं शिशुरिति यतः सूतिमयते
पितॄणां साहस्री भवति खलु यद्गौरवगणिः ।[२३]
मणिर्मूर्धन्योऽसौ त्रिभुवनपतेः सृत्वरकरो
जगन्मातुर्मातुर्ननु गुणभिदां को गुणयतु ॥[२४]

प्रसूनप्राग्भारैर्विकिरति महीं पादपगणः
सनात् प्रह्वीभावं व्रतति-ततयः संविदधते ।
समीरः सौरभ्यं वहति सरितः पूतसलिलं
तवैवायं मातः प्रसृत उपचारव्यतिकरः ॥[२५]

---

२०. प्रतिलयः=प्रतिलोमपरिणामेन कारणे कार्यस्य लयः।

२१. विवर्तः खलु कार्यरूपेण कारणतत्त्वस्याविर्भावः। कारणे कार्यधाराया लय एव संवर्तः = पुनस्तिरोभावः। वृढयतु=वृढ उद्यमने+क्त+-नामधातुः ।

२२. आक्रीड उपवने । भृशं पौनःपुन्येन क्रीडन्तीति चेक्रीडाः ।

२३. "सहस्रं च पितॄन् माता गौरवेणातिरिच्यते ।" इति मनुः ।

२४. जगन्माता महामाया च मदीया च माता गुणकृतं भेदं न सहेते इति भावः ।

२५. उपचारव्यतिकरः=पूजासामग्री ।

नरीं त्वां मन्वानो यदवमननं त्वय्यतनवं[२६]
तनूं स्वां ते तन्वाः पृथगगणयं यच्च वितथम् ।
यदौद्धत्यं बाल्ये तरुणिमनि चाहं व्यरचयं
क्षमामूर्ते सर्वं तदकृतमिव त्वं विगणय ।।[२७]

२६. नरीं=मानुषीम् ।
२७. विगणय=मा मनसि कार्षीः । क्षमस्वेति भावः ।

जाबालिपुरं चल !

(डा० रमाकान्त शुक्लः, ६ वाणी-विहारः, नयी दिल्ली ११००५९)

जाबालिपुरं चल रमाकान्त ! जाबालिपुरम् ।
आकारयति त्वामभिवन्द्यं जाबालिपुरम् ॥ ध्रुव०

शङ्करशशिलेखावारिबिन्दुरखिलौघहरो
बहुवीचिविवर्तावर्तयुता नर्मदा बभौ ।
नर्मदा स्वयौवनमधिजगाम यस्मिन्स्थाने
तत्स्थानं 'भेडाघाट' - पदप्रथितं च बभौ ॥
जगदागन्तुकलोचनावलीपश्यतोहरं
स्फटिकाश्मशिलारमणीयविभाविस्तारकरम् ।
तं भेडाघट्टं निकषा यद् राराष्टि सदा ।
तन्नगरं चल हे रमाकान्त ! जाबालिपुरम् ॥
जाबालिपुरं चल...... ॥१॥

जाबालिमुनेः साधनास्थलं पूतं प्रथितम्
अर्जुनपलाशसहकारप्रभृतिपादपलसितम् ।
देशस्य कृते सर्वस्वहोतृभिः संवलितम्
आयुधनिर्मित्या भारतसैनिकबलप्रदम् ॥
दुग्धप्रदातृपशुधनपरिपालककृषकयुतम्
दुर्गावत्याः विक्रमगाथाभिः परिलसितम् ।
नरसिंहमन्दिरं धत्ते यत्कलुषापहरम्
शंकरगाथाभिर्भवति च यद्रोमाञ्चकरम् ॥
जाबालिपुरं चल...... ॥२॥

'कृष्णायन' - कृद्द्वारिकाप्रसादमिश्रलसितम्
श्रीहीरालालजैनकृतशोधमयूखसितम् ।
हरिशंकरपरसाई - व्यंग्योक्तिविलासयुतम्
चौहानसुभद्रा - राष्ट्रगीति - गरिमप्रथितम् ।।
श्रीप्रभुदयालु - गोविन्ददास - साधनांकितम्
श्रीकृष्णकान्त - राजेन्द्र - प्रभृतिविद्वल्लसितम् ।
रामेश्वरशुक्लाञ्चल - नवरचनाप्रभाधरं
पुष्पा - लीना - चित्रा - कर्तृत्वविकासकरम् ।।
जाबालिपुरं चल······ ।।३।।

योऽवन्तिसुन्दरीं परिणिनाय मुदितेन हृदा
अनुसन्दधते यं विश्वविपश्चिद्गणा मुदा ।
येन ग्रथिता कर्पूरमंजरी नाट्यकृतिः
श्रद्धासुमानि यस्मै ददाति विद्वज्जगतो ।
अथ विद्धशालभञ्जिकोदयं यस्मात्प्राप्ता
मीमांसा काव्यस्यापि यदीया कृतिराप्ता ।।
रामायणमथ भारतं बालपूर्वं यस्य
मान्यं प्रबन्धषट्कं च विबुधसंसारस्य ।
यस्मिन् वाणी व्यलसन्मुदिता वारम्वारम्
तं राजशेखरं यत्स्मरति प्रियकाव्यकरम् ।।
जाबालिपुरं चल······ ।।४।।

चल कविसमवायं पश्य तत्र सहृदयमहितम्
मध्यप्रदेशसंस्कृताकादमीसन्निहितम् ।
रेवाप्रसाद - कमलेशदत्त - कृति-संवलितम्
बच्चूलालवस्थिनो गजलगीतैर्लसितम् ।

श्रीश्रीनिवासरथमन्द्रघोषनवगानयुतम्
कविपुंस्कोकिलराजेन्द्रमिश्रकलगानयुतम् ।
श्रीरहसबिहारीप्रभृतिकविप्रतिभाद्रुतम्
भास्कराचार्यसञ्चालनकौशलसम्पूतम् ।
पठ कवितां त्वमपि स्वीयां तत्र यथावसरम्
जाबालिपुरं चल रमाकान्त ! जाबालिपुरम् ॥
जाबालिपुरं चल······॥५॥

मा भूस्तेजापःक्षेपघृणितघटनाऽत्र पुरे
स्यादत्र सदा शुभसौख्यसमृद्धिरतीव पुरे ।
संस्काराणां धानीयं विलसतुतरां सदा
जागर्तु मनीषा जगदुद्धारायात्र सदा ।
धत्तामिदं पुरं कलासाहितीगरिमाणम्
योगिनीमन्दिरं वितरतु जगते कल्याणम् ।
प्रार्थय शुद्धेन हृदा जगदीशं सृष्टिकरम्
मोदतां वर्धतां राजतां च जाबालिपुरम् ॥
जाबालिपुरं चल······॥६॥

(रचना-तिथि: २२-१२-१९८८ ई०)

★

परिहास-प्रहेलिकाः
(सख्योर्वार्तालापः)

(डा० सुधीकान्त भारद्वाजः 'कल्पः' रोहतकस्थे महर्षिदयानन्द-विश्वविद्यालये संस्कृत-विभागाध्यक्षः)

१. पुच्छं धुनोति लौल्येन मृदुकण्ठी बुभुक्षितः ।
भिक्षमाणः पदं लेढि सन्तुष्टो गुर्गुरायते ॥
किं सखि, कुक्कुरः, ?

न सखि नेता ।

२. दूरादालोकते मृग्यं झटित्यापतताहया ।
पिबति शोणितं तावद् यावन्निश्चेष्टतां गतः ॥
किं सखि श्येनः ?,

न सखि, तीर्थपण्डितः ।

३. रवीत्यसह्यमानोऽपि ताड्यमानोऽपि मोदते ॥
गुरुं भारं स्वमानस्य वहति गौरवान्वितः ।
किं सखि गर्दभः ?

न सखि, कविः ।

○

यतो यतोऽपि गम्यतें

(डा० भगवतीलाल राजपुरोहितः,
१२-वीरदुर्गादास मार्गः, उज्जयिनी)

यतो यतोऽपि गम्यते
तमस्तमो नु दृश्यते
सितांशुना करैर्नतै-
स्सितीकृतं तमस्सितैः ।

घनं तमो नु लभ्यतेऽ
भितस्तमो हि दृश्यते ।
न किं तमः नटायते
प्रदृश्यते निलीयते

असत्य - सत्य - वर्तने
विभिन्न - रूप - दर्शने
अराल - भूर्धजेषु यः
गुहासु कोटरेषु यः

तुरुष्क[1]-गन्ध-कोमले
निरुद्ध - दैव - दुर्बले
अकाल-सत्र - सञ्चरे
पटच्चरे नरे नरे

१. लोभान

प्रयन्त्र' - धूम-चारणे
सुमन्त्रता - विदारणे
तमस्तमोऽनुभूयते
यतो यतो निरीक्ष्यते ॥१

अधीनतावधारणे
परस्य पादकर्षणे
तमो-विचित्र-पल्वले
वने वने दले दले

ध्वजापण-प्रधावने
ध्वनि-प्रचार-कारणे
सुमस्जिदे सुमन्दिरे
धनेश-दुर्ग - मन्दिरे

कुराजनीति-गह्वरे
दुरोदर - द्रुमान्तरे
शठोन्दुरुप्रसाधने
कशा-मृगेन्द्र-चालने

निकाम-नग्न-नर्तने
जनाकुलेऽपि निर्जने
अधर्म-धर्म-धारणे
निज-प्रचार-कारणे
सितं तमो नु दृश्यते
यतो यतोऽपि गम्यते ॥२

---

२. कारखाना

कुशस्त्र-शास्त्र-साधने
नख - प्रचण्ड - धारणे
विदग्ध-नीति-खण्डने
सुदीन - हीन - दुर्दिने
वृथोपहास-मारणे
विदेश-वेश-धारणे
विदेश-वाग्विलक्षणे
विदेश - चिन्तनक्षणे
स्वकीय-लाभ-लोभने
परस्य हानि-चिन्तने
अरण्य-नाश-कारणे
सुवन्य-जीव-मारणे
कुधारणे कुपोषणे
दुरौषध - प्रचारणे
प्रदूषिते जलोज्ज्वले
सुवर्ण कृष्णतानले
न किं तमोऽत्र दृश्यते
यतो यतोऽपि गम्यते ॥३

ध्वनि-प्रदोष-पञ्जरे
प्रसून-मूल्य[1] - जर्जरे
कुलाल-चक्र-नर्तने
कुचाल-शक्र-वर्तने

१. उत्कोच

वधू-विदाह-मारणे
कृतापराध-तारणे
सुदक्षिणा-विचेष्टने
कुलीनता - प्रचारणे

अमी रतास्सुधारसे
दरिद्रता क्षुधारसे
हविर्भवन्ति ते मखे
ज्वलन्ति के न के सखे

दिवानिशं मया श्रुतं
कुवल्कलं त्वया हृतं
तमो द्रुतं निलीयते
दिवानिशञ्च दृश्यते
सितेऽसितं हि दृश्यते
यतो यतोऽपि गम्यते ॥४

धारणा

(डा० प्रकाश पाण्डेयः, "अहल्या" दत्तमन्दिर-सविधे,
कर्वेनगरं, वर्धा रोड, नागपुरम्)

स्थविरोऽहम् । वृद्धोऽहम् । याः का अपि कांक्षाः आसन् ता अपि त्यक्तजीविता इव महिष्यः कस्मिंश्चिदिव तृणजाङ्गले, विलीना अभूवन् । मम चैतज्जीवितमत्राद्य, परित्यक्तभावनम्, त्यक्तवासनाकम् केवलमेव परिणतमद्योभान (subconscious) विश्वरूपेण । आसंश्च का अपि कविताः या यौवने रचिता आसंस्ता अपि परित्यक्ताः सदनस्यस्य उपरिकक्षायां कुत्रापि विलिल्युः । अद्य न जानामि कुत्राहम् कस्मै वा कस्याः कृते महिष इव बलीवर्द इव नितरां विरचित-हम्वारवोऽहम् । माता च मृता एव ॥ एकाऽसीत्काऽपि प्रियतमा, साऽपि हृतेव जीवनादेव विनिर्ययौ । ··· कथं वदति स्म सा, कथं च हसति, प्रहसति स्म स्फुटितकाचद्रवमिव विकिरन्ती, सागरतीरे इव माला फेनानाम् ! कथं वर्तते स्म सा श्वेतांशुकिरणैरिव स्नाता, सुतरां विनिभाविता,—ईषत्प्रेम्णा, ईषदातुरत्वेन मया, येनाल्पमतिना निर्जितमिवासीद्गगनं तरणेः ।

आगताऽसीदेकस्मिन्दिने,···मम सदने,···मम सदने सदनप्रिया, मम रुदने रुदनप्रिया, मम जीवने जीवनप्रिया, मम सकले सकलप्रिया,···सा,···यथा भार्येव सार्यतां समीरणे समुद्धूनयन्ती । न तस्याः कोऽप्यासीन्मनसि विचारः, यदयं प्रेम करोति । अविज्ञातमत्प्रेमा सा स्वयमेव मयि रागवती सञ्जाताऽसीत् । तस्याः, तस्या एतस्याः कृते न किमपि कृतं मया । केवलमासीदेको भावः शरण्यः शरणयायी तस्याम्, यदा साऽस्माकं सदने समायाता, तस्थौ च यया काऽपि संहिता,—प्रेमचरितस्य ।

अनरालकेशयुता, सर्वथा भावनाविकलतायां मम सर्वदैव शरण्या, साऽऽसीन्मे मेरुः, सविता, महाँश्चोदन्वान् ।

स्मरामि, मोदेऽस्या मे प्रमोदः, विकलतायामस्यां मे विक्लवता, सकलमेव चरितमासीद्यथाऽस्या एव चरितम् । सुस्पष्ट-जघनरेखाऽस्या यदा विश्व-सार्थावरणादेव संदृष्टा मया, तदैव मतं मया यदासीदियं शशाङ्करेखा । तस्याः नयनयोश्च यो भावः, भूतो मे प्रजागरहेतुः । अहं च पठन्नासं सपठन् विविधान्पाश्चात्त्यकविवरान् । बाणः पठितो यथा कोऽपि विश्वकविः, विश्व-कविर्दान्ते (Dante) च पठितो यथा कोऽपि सुमधुरो भावनावैश्वानरः । ततोऽपि नासीन्मे वाचनाद्विरतिः । सुतरां विशदोऽभूच्छनैः शनैः स भावो, योऽभूत्स्व-भावो नाम कश्चिदपि मच्छरीरे इव निविडतयाऽनुस्यूतः । तदनन्तरञ्च सञ्जातं पठनं शेक्सपियरादिकानां कवीनां नाटकानाम् अथ सुनीतानां, नैकेषां च लेखकानां काव्यानाम् ये तदाऽसन्समसामयिकाः नूतनकवयः—अद्य ते सकलेऽपि प्रसिद्धिमुपेताः सन्ति,—नामान्येतेषां न ग्रहीष्यामीदानीम्, यदिदमसमञ्जसं भवेदिति, एतदेव तु जाने यत्प्रेम, कविता चेति द्वयम्, बभूव कश्चिदपि मे स्थायी भावः,—स एव च मां संप्लावयन् स्थितो मानदण्डः,—अस्मदायुषः कोऽपि निराकारो, बृहद्विश्वो गरिमा,···मानविन्दुः । तेनैव पथा गतं कृच्छ्रेषु अनुभूता सम्यगुपेक्षा, आयुष्यनुभूता कृत्रिमदरिद्रता याद्य सत्ये दरिद्रतायामिव शनैः शनैः परिणमन्ती दृश्यते, यस्या नैवाद्यापि विमुक्तिः केवलमेकमेव तु स्मृतम्, यन्नाम नाम प्रियायाः,—साकं दैवतानाम्, साकममराणाम्, सह विष्णोः, सह रामस्याथ च सह कृष्णस्य नाम्ना । सकलमेव जीवितं कतिकालमास्तिक्यभावेन परिणतं बभूव, पक्वीबभूव । तत्रैव स्थितम् यत्राकाशमपि बभूवैकमालोकावरणम् साक्षादपि सवितुरुदारं किमपि महन्महनीयं भानम्,—यः प्रार्थितो मया । यथोमया शिवः, यन्मे रोगापहरः सविता,—तेऽहमेको भक्तः येन सर्वमपि परित्यक्तं तव कृते, केवलं च भूतम् एकं भूरिभूरिशो महदास्तिक्यम् ।

आस्तिकः । नास्तिकः । को नामास्तिकः, कश्च वा नास्तिकः ? द्वयमपि सममेव समीहनीयम् ; द्वयोरपि किमपि यत्सन्तुलनम्,···तन्नाम जीवनम् । यदि जीवनमेव भ्रष्टम्, नाशमितम्, प्रणष्टम्, तत्किमर्थमेतज्जीवनयापनम् ? अस्मि कश्चिदपि युवा,···मन्मानसे, मच्चेतसि, आत्मनि मे, यः किल नितरां 'निधर्मी'।

स वदति यदीश्वरोऽस्ति, तर्हि तेन तत्रैव स्थातव्यम्, यत्रेश्वराः युगादारभ्य तस्थिवांसः, न तेनागन्तव्यमस्यां भुवि, यत्र केवलं नश्वराः जीवन्ति। यथा ? यथाऽहम्, यथा सा, यथा सः, यथा पुनरपि 'तस्य' सा, तथैव। तथैव जीवितव्यम्, यथा जीवने जीवितव्यम्। तथैव कविकर्म समाचरणीयम् यथा कविकर्म समाचरणीयम्।

चेतसोऽन्तरात्मनि यच्च पातालं जगद्व्याप्तम्, यत्राजगराः सहस्रशः सृपसर्पन्ति, क्षपाश्चानिशं चरन्ति, अटन्ति च भावाः, बभ्रुवर्णाः केवल दिव्यजीवनजीवातवे, तत्र स्थातव्यम्। तथाऽपि यदि फ्रॉइड् पठितव्यः, तथाऽपि यज्जीवनं सात्त्विकम्, तदेव जीवितव्यम्। महानात्माऽसीत्सः पाश्चात्यमानसविज्ञाने, येन न्युब्जं यत्तदवकलितम्, हीनात्मनाञ्च कृते साक्षात्संजीवनं विनिर्मितम्। सन्तु पाप्मनः भावाः सहस्रशः, किन्तु तेषामनुभवेन न तावता तीव्रेण स्थातव्यम्, येन सकलापि सात्त्विकता विनश्येत। नूनं तस्मिन्नपि न्युब्जजीवनपाताले, कपिलान्तरि जीवितव्यम्। तस्मिन्कपिले, रागे वा महर्षौ, यः पृथिवीमध्यः। यश्च ज्वालाभिरनाकुलोऽपि ज्वालापरिवृतः, जीवति च वलिवत् (यस्यैव महात्मनो नाम्नाद्य महाबलिपुरं विख्यातम्), ··· केवलमेकमायुः, यन्न्युब्जेऽपि पवित्रम्, ···यच्चास्ति तत्पटलीनम्, ···यदर्जुनेन महाभारते विज्ञातम्, तया भीषणया भीत्या, या कुरुक्षेत्रेऽपि तस्यात्मनि न कदाऽपि सम्यक्, आविरासीत्। तदस्ति पूततमम्, तत्र च जीवन्त्यायुषः विविधा विधाः याः कूर्मकारेण पुरैव नितान्तकमनीयतया सुविज्ञात आसन्। तत्राऽवधानं दातव्यम्।

पुनरपि कथयामि, यत्फ्राइड् (Freud) तावत् संमत एव मे। येन फॅंटस्यै (Fantasy) सत्यजीवनस्पर्शोऽपि संप्रदत्तः। एतदपि जानामि यत्, यद्दिव्यम्, तस्य हेतुः कारणं वाऽदिव्यमेव। न केवलमदिव्यम्, अपितु नितरामेनसां निखिलतया केवलं सारमयम्। तत्रैव, अथवा 'तत्राऽपि', यथा कस्मिश्चिदपि प्रबन्धे तलवक्तव्यम्, foot note) स्थातव्यम्, यत्र न कोऽप्यलसकरो दिव्यगोलः, यन्नाम ध्वनिः, अपि तु मतिप्रेरितः कश्चिदात्मा एव कस्या अपि वक्रतायाः। फ्रॉइडपठनेन वयं मानसिकं वक्रिमानमेव, मानसिकान्तराले स्थितिमन्तः,··· प्रजानीमः नान्यत् किमपि। येन खलु भावनाविरेचनं स्यात् किमपि।

या वक्रता काव्ये, सा पठनीया, सम्यगवधारणीया। अयं 'सन्दर्भः',... न वृत्तिः, प्रवृत्तिः, केवला वा मूलप्रवृत्तिः। मानसिकान्तरीक्षसन्दर्भोऽयम्, यत्र चेतोऽवकाशः जागर्ति नूनन्। अत्र तथा स्थातव्यम्, यथा केनापि अन्तरीक्षयानेनान्तरीक्षे स्थातव्यम्। तत्रैव स्थातव्यम् नाधो यातव्यम् ततोऽपि समुच्चैर्गन्तव्यम्। वक्रता नाम सन्दर्भः, किन्तु न सा काऽपि केवलसारवत्ता कोऽपि न्युमिनस् सेमिनल् (numinuos seminal) वा सारः। तिर्यगनुभवोऽयम्। नानुभूतिः।

एवं वक्रतामधिकृत्य विचारयुते मय्यहं पुनरपि भालयामि तानि दिनानि, यत्र न कोऽपि भावोऽद्य तिष्ठति यश्च नीतिं न प्रजागरयति। यत्प्रेम विहितम्, विहितव्यम्, तत्तथैव विहितम्, विहितव्यम्, यथा केनाऽपि प्रेमिणा प्रेम कर्त्तव्यम् न यत्र कोऽप्यवरो हेतुः। यदि प्रेम निर्हेतुकम्, तर्हि किमर्थं विवाहेच्छा? एवमेव चरतु जगत्, एवमेव समुत्पादयन्तु जनाः पुत्रान्पौत्रांश्च! किन्त्वहम्? अहमत्रैव स्थास्यामि प्रेमणि स्थिरः, न यथा कोऽपि शीतांशुः पृथिवीप्रियकरः, न वा यथा कोऽपि चण्डात्मा गरिमा महात्मनस्तरणिः-किन्तु किमपि ध्वान्तावलीनं तमोऽलङ्कारभूतं नक्षत्रम्। नक्षत्रनाम्नी कल्पना सर्वदैव मत्काव्ये, क्वचित्क्वचिच्च समीक्षायामपि भूयो भूय आविर्भवति। किन्तु न सा केवल कल्पना, नाऽपि वा काऽपि केवलव्यावहारिकी सत्ता सा तु संकल्पना,— मदीयप्रेम्णः, यत्र त्वमलङ्कारः, अहञ्च तस्य मधुरिमाऽहार्यसत्ताभूतः, तस्य वलयम्, तस्य,...अनुभावः। अस्यामेव संकल्पनायां स्थास्यामि, तत्रैव गमिष्यामि, यत्र वस्तूनां सत्त्वमेव विरलतमं सारभूतं तिष्ठति, केवलं वस्तुरूपेण। तत्र विश्वे यत्र न काऽपि हीनमनस्कता,...केवला तु शान्तिः। यदि स प्राप्यते, तर्हि सकलमपि संप्राप्यते। अतो न किमपि निभालनीयम् यद्गर्हणीयम्, नाऽपि मुखमण्डलकमपि विनिभालनीयम् यद्येकवारं साकूतं निर्णिकाये विनिर्वर्णितम्। अनुभावस्तु सः यावज्जीवं कलनीयः। इयमेव चेतना यस्याः कल्पे, प्रेम तिष्ठति। तदेव जीवति, जीवनमपि मृत्युरेव निरन्तरं मृत्योरभिगन्तव्यं नाम। अस्य च मृत्योरन्तिमं तत्त्वम्? प्रेम! जीवनस्याऽप्यन्तिमं तत्त्वम्, प्रेम। इदमेव कच्चित्प्लेटोमहर्षिणा कथितम् यत्प्रेम चिरन्तनम्, जीवत्सु च वस्तुषु सर्वत्र न्यूनाधिक्येन सञ्जीवनमिव जीवति। किमिहान्यत्कथनीयम्?

मोदे प्रमोदोऽस्याः मे इति मन्तुर्मम पुरस्ताद् विश्वमिवापरमाविरासीदाविरस्त्येव। यत्र सर्वमप्याध्यात्मिकं तिष्ठति। नास्तीदं नास्तिकं विश्वं जातिस्मृते (race memory) र्यन्नयनयोर्विनिमीलितयोः पुरस्तादन्तः प्रतिभाति। कुत्रेदं तिष्ठति ? कच्चित्प्रातिभ-केन्द्रेषु मूर्ध्नः ? अथ प्रेमाऽपि, अवस्फूर्तिरित्यपि ? अथवा संशोधनक्षमतारूपेण ?—सर्वमेव मूर्ध्न एव विकारविलसितम्। नात्र शङ्का कार्या। सर्वमपि यद्यत्सौन्दर्यं प्रतीयते नयनयोरन्तस्तदभियाति मानसम् तदभि च मानसं समुत्कं दोलास्थितमिवार्भकं सुतरां पुरः सरति।

परं कुत्र मया रागान्वितेन स्थितम् ? तदेव न जानामि। ज्ञातुं वा पारयामि। केवलं किमपि विश्वमान्तरे समभिवीक्ष्य सम्यगुक्तं मया,-यन्मया प्रेम कृतम्, यन्मया न प्रेम कृतम्, यन्मया प्रेमणि किमपि कृतम्, विश्वमेकं समवकलय्य। काऽत्र स्यादुपमा ? कच्चिद्दान्तेकवेरेव। अनेन द्वे पुस्तके लिखिते। एकम् Vita Nuova, अपरञ्च, —Divine Comedy। द्वयमपि पठितं मया पूर्वमेव, यदा मयैव रागात्मकतया जगदिदं विनिभालितम्। तदा त्वत्र केवला रागात्मकतैव समनुभूता। नान्यत् किञ्चन। अद्य तु पश्यामि यन्न प्रेम अपितु प्रेमविश्वं दान्तेमहाकवेरुपलब्धिः। नायं यथा-कुसुमाग्रजः आसीन्महाकविः अपि त्वासीत् स्वयमेव महाकविः। अस्यैव दृशा तु पश्यामि जगदिदमद्यापि। यद्यच्च परितो रिङ्गते, तत्तदपि प्रेम्ण आलोकसहस्रेषु सुतरां विनिमज्जति। कुत्राऽस्ति मे स्थितिः ? कस्मिन्विश्वे कस्मिन्सूर्ये ? कस्यां पृथिव्याम् ? न जाने।—एवं तु जाने यदनुभवेष्वपि केचनैवंविधा अनुभवाः सन्ति, येऽपरविश्वेषां भ्रान्तिमुत्पादयन्ति। क्वचित् क्वचित्पश्यामि निद्रास्वपि क्षपासु पूर्णालोकविनिमग्नतां सर्वेषाम्,—सर्वस्या अपि सृष्ट्याः। यत्र तरीतुमुत्प्रेक्षे क्वचित्क्वचित्।

आम्। तत्र सकलोऽप्यालोकः। न सन्ति वस्तूनि इति न। किन्तु सर्वा अपि जीवनगतयः सुप्रकाशिताः आलोकविनिमज्जितास्तिष्ठन्ति। तत्र सन्ति गावः, अरण्यानि, शाद्वलेष्वजापुत्राः, महिष्यो वृहदाकृतयः, शार्दूलाः, विविधप्रकारकाश्च खगाः, पक्षिणः,—एतस्य च सर्वस्योपरि, कश्चित्स्थिरयुवा, ···अहरूपः,···पक्षी···। नायं गृध्रः अपितु गृध्रसमाकारः कश्चित्सुतरां

निनदता गुरुध्वनिना सह सन्तिष्ठमानः कोऽपि तेजोगर्भः । तत्र च पूरुषः । तत्र विष्णुस्तत्र चान्यः कश्चिद्युवा, यो सकलमिदं परिपश्यति, दृशा च विश्वमप्यालोकमयं वितनोति ।

···स्वप्ने कदाचनैकदा दृष्टम्,···यदहं रेलयानस्यायोवर्त्मनि विचरामि, अधःस्ताच्च भीषणालोकः । अन्धतामिस्रः । भीषणालोका च काचित्प्रदरी । ध्वस्तो रेलायानपथः कल्माषितः । न पर्जन्यधारा कदापि, किन्तु केवलो ग्रीष्मः, —मत्कण्ठे ग्रीष्मः, रेलपथोपरि ग्रीष्मः, प्रदरीषु न कोऽप्यङ्कुरोऽपि हरितस्य,— सर्वमेव बभ्रु पीतम् निष्पर्णम्, निष्पर्जन्यम्,···एकम्···यथा-'सहारा'-विश्वम् ।

तत्र च भग्नरेलयानध्वंसेषु, रेलमार्गध्वंसेषु, विचराम्यहम्,···शतशतेषु प्रेतेषु । सर्वेऽपि प्रेतानां प्रेताः । अहमेव जीवितवान् । यथा सञ्चरामि यत्र-कुत्राऽपि, विनान्नेन तिष्ठन्, विना पानीयं, विनाऽलोकं, विना पर्जन्यं, विनानुभावमपि केवलमनुभूतिवान्,···साक्षाद्ग्रीष्मः । भयात्रहः । भीतिपदविलोलः,— कश्चित्साक्षाद्भीत्याः पुरस्तात् अहम् अभूवम् । नान्यत्किमपि कलनीयम् । नान्यः सविता विद्यते । नान्यश्चन्द्रमाश्चकासति । अयं नाप्यनुभवस्तु केवलं ममैव, यथा ग्रीष्मचण्डे चन्द्रे, चन्दिरे, यत्र भानुः प्रतपति, शताधिकडिग्रीकञ्च तापमानम् ।

आम् ! ज्ञातं मया । यदेते ममैवोद्विग्नचेतसः सम्यग् विकाराः,— विकृतयः । आकाशमेव परापतति स्म स्वापेष्वपि यथा कम्बलं प्रेतचर्ममृत्तिकाचूर्णमिव । आसीच्चैकोऽनुभवः यत्र मया शिवेन भूतम् । मृता चोमा । मम विकलयोर्हस्तयोरहञ्चैतस्याः प्रेतं गृहीत्वा कुत्राऽपि प्रस्थितवान्,—न जाने कुत्र, किन्तु निश्चितमेवायं जगद्द्वयानुभवः । एकस्मिन्वयसि या प्रियाऽसीत् पत्नी एवासीत्,—सा मृता पत्नीभावमुपेतुमीहमाना । अपरस्मिंश्च जन्मनि तया पत्नीभावेन परिणमय्य वर्तितव्यम् । तत्पूर्वं तु चितैव जीवनम् । यथा कमपि पतितं सलिलालोकसूर्यं पिबामि तथैव तामपि...चितामपि । यत्राहमास्मं कोऽपि सम्राट् । सम्राजमिमं मां नो नयतु कोऽपि कुत्राऽपि । यत्र तिष्ठाम्यहम्, तत्रैवाहं सम्राट् । राजा भावनानाम्, राजा विकाराणाम्, राजा समीहानाम्, राजा दृष्टीनाम्, राजा दृष्टिकोणानाम् राजा च यद्यत्पश्यामि तस्य तस्य भूत्वा,···तत्तत्···सकलमेव···प्रेम ।

प्रेम ! तव कृते किं किं न कृतं मया ? किमर्थं नायासि ?—त्वं नासि काऽपि व्यक्तिः । तथाऽपि केवलो भावः, मदन्तरात्मनिष्ठः येन ततमिदं जगत्सर्वम् । येनालोकेन ततं विश्वमिदं सर्वम्, स एव सकलानुरागः । तत्रोर्ध्वे जगति विद्यते प्लेटो । तत्त्वज्ञः । येन महर्षिणा केवलं संन्यस्तेनाऽपि, यद्यपि वार्द्धके एव, प्रेमानुभूतम् अथ वा व्यवकलितम् ।

तस्मिन्नेव वार्द्धके तिष्ठाम्यहमिहेदानीम् । स्मरामि च सकलमप्यायुः । अनुभवामि च सम्यक्प्रेमाणम् । सम्यक् तत्त्वम् । सम्यगात्मानमपि यथानुभूतं भगवता शङ्करेण । यथा प्लेटोमहोदयेन ।

तत्र नो गुरुः । गुरुगोल एव गुरुः । तत्र नातपः । तत्र नानातपः । तत्र सकलमेवातपः । तत्र ताम्रमेव वहति वातावरणे अभ्रेषु, मेघेषु, घनेषु जलदेषु शुभ्र कर्पासवद् वर्तमानेषु घनजालेषु, वर्षा तत्र ताम्राणां मतीनाम्, ताम्राणां विद्यानाम् आलोकानाम्, यत्र विराजते गुरुरेव नो गुरुः । तत्राहं गुरुः । ममैव । मम च विश्वे ये केऽपि जनाः समायान्ति, तेषामपि ।

किमिदं विचारितमासीत्प्लेटोमहोदयेन ? यदा तेनोक्तं यद्वस्तूनां प्रत्येककृते तिष्ठत्यूर्ध्वे, किमपि सत्यं वस्तु, वस्तुविश्वं व्यावहारिकं तु मिथ्या विश्वम्, द्वितीयसत्यम्, न प्राथमिकम् । यावन्मया नास्य गुरोश्चिन्तितम्, तावदिदमेवासीन्मे मतम्, यत्प्लेटोमहर्षेः सत्यवस्तुविश्वं केवलं वैचारिकतायामेव···स्यात्··· केवलं···वैचारिकतायामेव, किन्तु वैचारिकतायामेव तिष्ठति केवलमव्यक्तम् । किन्त्विदं त्वपरमेव किमपि । किमियं प्रमुग्धता ? अथवाऽनुभवः, अयवा भ्रान्तिः, यत्राकाशशतगणेषु नीलिम्नः समुन्मीलन्ति कल्हाराणि ?

भ्रान्तिष्वपि तिष्ठामि कदाचन । किन्तु नेयं सकलाऽपि भ्रान्तिः । ततोऽवतारितव्यआत्मा तदैव तव प्रेमाणमवलोकयितुं पारयिष्ये । अन्यथा सकलमेव केवलप्रमुग्धताविलसितं स्यात् । अतो न मिलितव्यम् । प्रस्थापितव्यौ च पदौ मेऽस्यां भूम्याम् । यदि पदौ भूस्थिरौ, तदैव भूम्याश्चिन्तनं सुशकम् । भूमिस्तरस्य वा सागरसमतलस्य समुच्छ्रताऽधःस्तनभानस्य । नान्यथा । pedastal of truth-the ground ? इयमेव भूमिका, सकलासामाकृतीनाम्, समेषां विचाराणाम् सकलानां भावनानाम्, सकलानां कामानाम् जनानाञ्च सकलानाम्, भूमिः, भूमिका, ···—नॉर्म् ······न आयडिअल् ।

तदत्र स्थितिरावश्यकी । अन्यथा ते मामपहरिष्यन्ति । त्वया च नितान्त-कान्तःरो वियोगः, विश्लेषो भविता-सह । यदीदं परिवर्तनीयम्, परिवर्जनीयम्, तर्ह्यत्रैव चेतसा सुष्ठ्वाकारेण स्थातव्यम् । इयमेव द्रावतरस्य सूचना, यदा-युर्जीवितव्यम्, यथा व्यावहारिकमायुः, न स्वप्नेषु स्थातव्यम्⋯ ।

परम्, विना तं स्वप्नम्,⋯यत्र त्वं स्वप्नप्रिया । त्वमेव मे व्यावहारिकसत्ता, त्वमेव च स्वप्नसत्ता त्वञ्च · पारमार्थिकी वस्तुसत्ता, यत्राहं जनः, त्वञ्च सविता । आकाशे त्वम् । त्वं जलम् । त्वं कज्जलम् । त्वमपि नयनयोरश्रुसरित् । आवयोरयं स्वप्नः सदैव तथैव तिष्ठतु । नेहान्येन केनापीषदपि समागन्तव्यम् । सर्वमेव स्मरामि । अद्याप्यत्रापि वार्द्धके । यद्यद् भूतं तदा, यदाऽहं युवाऽऽसम् । काव्येषु च धुरीणः । ईषदपि काव्यस्पर्शेण व्याकुलीभूतोऽभूवम् ।

तत्र त्वया न स्थातव्यम् । केवलं जीवितव्यम, यथा-जीवनम् । न केवलं जीवनयात्रा कर्त्तव्या । किन्तु जीवितव्यम्, ⋯केवलं जीवनार्थे । अहञ्चात्र जीवामि, केवलं काव्यार्थे । ममायं काव्यार्थः, तव च जीवनार्थः, इत्यनयोर्भ-विष्यति किमपि विश्वम्, कोऽपि विश्वस्वप्नः, यत्र काव्यं जीवनम्, जीवने च काव्यम् । अद्यैव निर्णयं कुरु । किं करणीयं मे कवितायाः इति । स्वीकुरु ताम् स्वीकुरु मामपि, परं केवलं कल्पनायाम् । यतः कल्पनासत्यमप्यस्मिन्नूतने जगति परिणमते पारमार्थिकसत्यत्वेन, व्यावहारिकसत्यत्वेनापि । सा मे कल्पना नियतैव काचिद्वनस्थली नीहारजालपरिवृता ।

अहमस्मि । अयमहङ्कारो सत्यम्, यः शृङ्गारकेन्द्रम्, यश्च शृङ्गारतोऽप्युपरि यत्प्रेम तिष्ठति, तस्यैष मध्यः । एतत्तु न केवलं वैचारिकसत्यम् केवलं तत्त्वपरा-मर्शसत्यम्, अपि तु स्वारसिककल्पनावसरसत्यम् । नेदं केवलं काव्यसत्यम् अपितु जीवितं सत्यम्, न केवलं जीवितसत्यम् अपि तु जीवनव्यवहार-सत्यम् । व्यवहारसत्ये यः सविता प्रकाशते, स एव प्राकाश्यं नयति सकलामेव जीवनदृष्टिसरणिम् । यत्र त्वया स्थातव्यम्, यथा मया, ⋯(स्थितम्),⋯⋯ यथोमया स्थितं शिवस्मरणेषु नितान्तम् तथा त्वया स्थातव्यम्, यथा मया, यथोमया, यथानया, यथा नयेन, यथा सरलेन, यथा वपुषा, यथा चेतसा यथार्भकेण, यथा मनुजेन, यथा मनुजया, ⋯⋯त्वया⋯मया । उमयाऽप्युमया त्वया, शिवेन मया, ⋯⋯सत्यम् ।

अस्म्यहम् । अहमाकृतिवान् । अस्म्यहं सा वनिता, या त्वम् । अस्म्यहम्पुरुषः । अस्म्यहं स्त्री, सा स्त्री, या त्वम् । त्वमेव । अनेनैव भावेन जीवितुमीहे सकलमप्यायुषम् । यत्र पुरश्चरा विकाराः, भावनाकान्ताराः, भीषणानि चारण्यानि, यत्र न तिष्ठति किमपि जीवनं नाम । अनया चेतनया व्यग्रोऽहं कार्यात्मन्यायुषि, जीवेन सुतरां कार्यशीलस्तत्र, यत्राहं चारणः, सम्राडपि ।··· विचरामि विजनेषु महीधरेषु महोदरेषु, शाद्वलेषु, हरीतिमासु, यत्र-काननं, सलिलंसलिलञ्च काननम्, तत्र सागरतटिनीषु लहरीणामालोकानां तव तव तवालोकः। यत्राहं मधुमक्षिकः, एकः सम्राट् । यत्राहं बिन्दुः, अहमेवोदन्वान् । अहमेव सत्यम्, अहञ्च मिथ्या । आम् । सत्यान्मिथ्याऽपरम् न च मिथ्यातः सत्यमवरम् । सर्वमप्यहम् ।··· ···

यत्र त्वं सुविराजमाना विराजन्ती काऽपि दिव्या मही । याऽहम् यश्चालोकसविता सवितुरपि परतरम्, य आकाशसविता सवितुराकाशस्याऽपि परतरं विराजते, ······सः सम्राट्, स जेता, स विजेता, सः सकलविद् वेत्ता, वेत्ता नराणाम् काननानां कोटिकोटीनाम्···आत्मा···अहम् । तत्र त्वयाऽवलीय जीवितम्, जीवितव्यञ्च यत्राहमवलीये, भविष्यत्कान्तारेषु निबिडम् ।

तस्मिन्नतीतविश्वे, ·· न कोऽपि विकारोऽवतिष्ठते । अथवा सर्वेऽप्यनुभवाः वैकारिकाः वैचारिकाश्च । आननानि काननानि सञ्जातानि, लक्षलक्षाणाम् । काननान्यपि चाननानि सञ्जातानि भावं विभावयन्ति ।

जाने, यदिन्दिरा गान्धी यदा केनापि नराधमेण गुलिकाभिर्निहता, तदा,··· ···तदनन्तरं यदा दृष्टो मया हिमाचलः तदा प्रतीयते स्म सा कोऽप्यतीतभावरूपिणी हिमाचलस्य सम्यगाविष्करणरूपिणीव, ·· तत्र दृष्टो मया तस्याः मुखमण्डलसविता, यः प्रकाशते स्म जनेषु विजनेषु, राष्ट्रेषु राष्ट्रेषु, विचारेषु अस्मद्राष्ट्रचारणेष, धरणिषु, सूर्येषु, काननेषु, सरित्सु, विन्ध्याचले, लवणपर्वतेषु, आर्सेनिक (arsenic) पर्वतेषु, सीमान्तेषु च सीमेण्टफैक्टरीषु,···· सर्वत्र, सर्वत्र !

किमिदं जानासि त्वम्,···नूतनमानसिकसत्यम् ? अहं जानामि, अहं जानामि काव्यम्, परमहं जानामि जीवनमपि, अथ जीवनजैविकतामपि । परं मम काव्यमेकं

वस्तु, जीवनञ्चापरम् । इमे द्वे, यथा हस्तद्वयम्, द्वयमपि यथा मनुजस्य कृते सम्यगावश्यकम् तथैव जीवनम्, काव्यञ्चेति द्वयमपि समावश्यकं मनुजकृते। एतदेव मन्तव्यम्। एतदेव कलनीयम्। एतदेव जीवितव्यम्, एतदेव च कवयितव्यम्।

यथा तन्तुभिर्विनिर्मांति जीवनं व्यथातन्तुर्जीवः, तथा काव्यात्मा भावयिता भवति जीवनात्मनः। अत्र जेतव्यं सकलमपि, अथवा न किमपि जेतव्यम्, केवलं स्थातव्यम्, यत्र स्थितिरपि नश्वरा। नश्चर्यांकृतानाञ्च कृते करुणिमा, अनुभवितव्यः। आकाशमपि यतः परावर्तते, तस्मिन्निन्दौ स्थातव्यम्, न वीर्यादिकं कामनीयम्। न तत्कमनीयम्। तदेव रामणीयकम्, यत्र केवलं मुखमण्डलं विराजते। यथा मुखमण्डलम्, व्यथामुखण्डमम्, त्वमेव। जानामि यदीषद्विकारस्पृष्टोऽभूवं तस्मिन्क्षणे, ······यत्र त्वमेव राजहंसीव विराजमानाऽसीः, यदाऽहं कामप्रज्वालितोऽभूवं दीप इव।

अद्य वार्द्धके तु किं करणीयम्? किं चिन्तितव्यम्? यदा मूर्द्धनि श्वेतिमा यथा हिमात्त्छन्नो देवदारुः कमनीयो विराजते। जाने त्वां स्मरामि, परं कथंविधां त्वाम्? किं तरुणिमनि स्थितां त्वाम्, अथवेषज्जराकुलाम्? अथवा स्थविरां त्वां स्थितिमतीं विवेकेषु? न जाने। परमेतत्तु विनिभालयामि नयनयोः, यत्तस्मिन्क्षणे यथा त्व वर्तमानाऽसीः, तदैव तस्मिन्नेव क्षणेऽहमपीदानीं वर्तमानोऽस्मि।

वृद्धं जगत्। यदाऽयुर्जरां स्पृशति। किन्तु दिव्यकाननं महत्, यदा प्रकृतिस्त्वमुदारा मच्चित्तस्य चरमे स्थले राजसे। भ्राजिष्णुं कामये, परमहमेव मूर्द्धनि भ्राजिष्णुः, विद्युच्च नितरामवसर्पंत्येव मूर्द्धस्था। किं तेजोऽपि न पूजयितुं कामये? किमनलमपि नार्च्चयितुं समीहे? किं न पश्यामि जगदिदमलम्. येन मूर्द्धनि स्थिरा दृष्टिरपि नापयातु? न जाने। किमर्च्चाऽपि निषिद्धा? किं प्रीतेरालोकोऽपि न जीविते जीवतु? किमहमेवमेकैकलतया जीविष्ये? ···पश्चाद् वृद्धतमपितुर्मरणात्।

किं करोमि, किं करिष्याम्यस्मिन्गेहे, यत्र स्थण्डिलं प्रदीप्तं मया तवानुरागस्य? तत्रैव ते प्रतिचित्रम्! तत्रैव ते मुखमण्डलम्, यत्र सदनं विहितवान्स्वय-

मेव विवस्वान् । विभ्राजमाना त्वमाकाशगङ्गा, यया स्पृष्टो नैव नैवायं क्षुद्रसविता, योऽहं नाम विद्वत्सु विचरामि, सञ्चरामि विस्फूर्जन् ? त्वमेव महन्महनीया । नाहमलमपि जाने कुत्राहं स्थापयिष्ये विग्रहमिमम्, इदं कलेवरं भूतायुष: प्रेतमिदम्, ममेहाद्यतनायु: ? यत्केवलं चलति चलत्येव भग्नरथ्यासु, यत्र नोर्वरितो मार्गोऽपि राजपथ: यत्राहं क्षीण: क्षीव: केवलं विस्मृतिवान् वैश्वानर: ।

वैश्वानरसन्दर्भादिदमपि स्मरामि । यन्नामाकाशपतनम्, यथा नश्वरवीर्यस्य पवनमाकाशत: । अनेन तस्मिन्क्षणे जीवनमपि क्षणमात्रं प्रतिभाति केवल-वृथार्थता, केवलं नश्वरता । केषाञ्चन जनानां कृतेऽयमनुभवो नितरां भीतिकरो भवति । न जानाम्यत्र किं सत्यम्, किं वा मिथ्यात्वम् । वदन्ति केचन यदयं भीषण: कोऽपि रोग: । केचन चोद्गिरन्ति यदयं केषाञ्चनागोचरंजनानामेव कोऽपि मानसिको रोग: । यदेकस्मिन्नेव क्षणे दशमिनिटावधिके एव सकलमपि जगन्निष्पर्णकाननमिव नि:सलिलं प्रतिभाति । क्वचित्तु धारासारवर्षास्वपि इदमेव केषांचन चित्तेषु प्रतीयते । कदाचित्केचिन्मन्यन्ते यत्सवितर्येव तिष्ठन्ति केचनात्मरूपिणो, जना:, प्लेतोन: (soul men) येशुभ्रमेकं महत्सलिलमुद्-गिरन्ति । नायन्तु रोग: । इदममृतम् । इदं जीवनमिदमायु: । इदं घृतमेव, यथा पौराणिकैर्व्यक्तम् । यदाविरस्ति सर्वत्रोदन्वानिव, प्रतीयते चाङ्गेषु । क्वचिच्च बिन्द्वग्रमात्रता यन्नाम जीवाजीवं जगत् यदन्तरि चेतस:, बहिश्च बाह्यजगति प्रतीयमानम् ।

······तत्राऽपि न मे चेतना स्पृशनि । त्वामेव मन्तुरपि कृते मम न मुक्ति: । यदि न मुक्ति:, तत्किं करणीयम् न किमपि । यतस्त्वमेव जीवनम्, त्वमेव च मोक्ष: । मम कृते । तवाऽपि च कृते इदमेव भानमुत्प्रेक्षे । येन द्वयमपि पुनरागमिष्याव:, कामपि जीवन-धारणां यत्र त्वञ्चाहं च धृति:, क्षमा, कैवल्यम्, वैराग्यम्, अथ च वासनैकसवितृजीवनम् । कामे नैष्काम्यम्-यथा कर्मणि नैष्कर्म्यम् अथ च निष्कामतायामीहासदनो काम:, द्वयमपि यदि मानसिकमेव, तर्ह्येव वरम् । नान्यथा ।

······तदेवं मिलिष्याव:, एवं जीविष्याव: । त्वं,······तत्र,······स्थिरा, ·····स्थिरयुवति:,······अहम्····· अत्र स्थिर:, स्थिरयुवा,······त्वम्······

तत्र स्थिरा चेतनामयी केवलभावना,——अहम्, अत्र——स्थिरस्थविरः,... त्वम्भानमयः, एकः, नैकलः,······अनुभवः। द्वावपि जीवावः। —···अत्र ·· स्थिरा···भव।···मा कामय तं वैश्वानरम् यो मया संप्रज्वालित आसीत् त्वच्चेतसि, ······किन्तु, भव भवैका कामिनी, यामिनी, भामिनी कस्याऽपि, तथापि मम सौदामिनी, अस्य घनचत्वरस्य वर्षाकुलस्य,·· त्वमहम् अहम् त्वम् इत्यवधारय, पुनरपि, नूत्नप्रनूत्नतरान्विश्वान्कामयमाना, कामयमाना सुसमीहमानाऽनागसं किमपि, यत्र प्रेमणि मृत्युरपि न चरमत्वं स्पृशेत्। भविष्यति तु केवला,······एका,······स्थितिमती,···स्थविरा,······युवतिः, ······नाम्नी कांक्षा। इदमेव कथितासीन्मया त्वं मे काव्ये, यत्राहं सविता, त्वं च क्षितिजम्। यत्र त्वं सवितृप्रिया,—अर्थः ?—सवितृरूपिणी प्रिया,— अहञ्चाकाशम्।

एतत्सर्वमवकलय। 'धारणा' नाम विद्यते किमपि कान्तारम् यत्र चरति रमणीयो महाविष्णुः। तत्र विष्णुप्रिया विभात्यरण्ये यत्र जानासि त्वम् यदरणिरपि भवति भानुरुदारः कान्तारकोविदः,··· यत्र च नदी,···

——..

....

आफ्रिकनकान्तारेषुः द० अमेरिकनजाङ्गलेषु यथा कांगो, आमाशोन—शेते प्रतिशेते, वलति, वर्तते, परिवर्तते, वर्तुलयति स्वात्मनीनं प्रवाहम् यथा काप्यजगरी। किमिदं स्पृष्टं त्वया, यदाऽहं तव प्रेमणि पतितोऽभूवम् ? न जाने केन केन कान्तारपथेन गत आसमेतेषु नैकत्रिंशत्युत्तरेषु प्रावृट्षु। दृष्टानि सलिलानि, संदृष्टानि मरुस्थलानि, पतितं पर्वतेषु पतितं च प्रदरीषु। किन्तु न चिन्तितं कदाऽपि किमपि येन जीवनं भग्नं भविष्यति। एवं चरिष्ये पुरोयायिषु वर्षेषु, शनैश्च शनैर्भविष्यामि, त्वदायुषि वनस्थलीष्वेतासु सृष्टिष्विवापरासु एकः···कान्तारसविता ! समुत्कः ! त्वां च कामयमानः, वर्धिष्णुः··· बृहद्वक्षः,···अहम् !

....

....

तव तव तव गन्धर्वः ! हिमाद्रिषु पर्यटन्, सरित्सु सञ्चरन्,—यथा मत्स्यः, मत्स्यपुरुषः कामानाम्, व्यथायाः अगस्तिः येन क्षारः समुद्रोऽपि विनिपीतोऽश्रूणाम्। तत्र च बाष्पोदन्वति स्थितम्, यत्र त्वमाकाशकविता,-काननशैलानामेका एकला, तथाऽप्यनैकला,-मम,-आहुतिः प्राणानां ज्वालासु राकाणाम्, रागा-

नाम कला रागिणी, ······एकला च विरागिणी,—केवलाकूतिररण्यानी।

एवं सिद्धं भवति जीवनम्, यत्र कामाकामं जगदिदमलम्···परिवर्तते,··· यथा सूच्यग्रं भान्वालोक-वनितास्वमरासु यत्र नृत्यम्, यत्र कला, यत्र सौन्दर्यम् यत्र च स्फीतिमा मानसिकः, यश्चलति न केवलं कान्तारेषु, अपितु स्वर्गङ्गासु,-अथ कारक्षेपु, फेक्टरीपु, विशालेषु समुच्छ्रितेष्वयोदानवेषु, यत्रैका एव देवता, ······नाम ? ······प्रगतिः। जीवनप्रगतिः, संस्कृतिप्रगतिः, राष्ट्रप्रगतिः, राष्ट्राणां शतशतानां प्रगतिः, मानुषप्रगतिः, जनानां समुद्वेल्लतीयं सागरिका, यत्र स्पृष्टो मया नूनमस्माकं प्रगतेरेव महान्, ज्योतिष्मान् भावः !

यद्यनेन पथा गन्तुं न शक्ष्यसे, न चिन्तयसि तत्किमर्थं मां विनिभायलसि विदूरतोऽपि प्रेमरसरञ्जितयाऽरूपया दृशा ?······जाने! प्रेम सत्यम्। किन्तु तद्यदि न मानवसत्यम्, तत्कोऽर्थो जीवनस्य ? अतो 'मूल्य' मवधारणीयम्। इदमप्यवधारणीयम्, यन्मूल्यं प्रेम, प्रेम च मूल्यम्। रामो मूल्यम्, कृष्णो मूल्यम्, रामकृष्णोऽपि मूल्यमेव। अस्य कृते संन्यासः, अस्य कृते प्रवृत्तिः, अस्य कृते च समृद्धिः, सकलेष्वपि एक एव भावः, यन्नाम गरिमा विश्वशान्त्याः।

···

···

पुनरपि स एव कक्षः, तदेव नवचित्रम्, प्रतिकृतिः, स एवाहम्, पुनरपि य आसं पञ्चविंशतिद्विगुणितसंवत्सरेभ्यः प्राक्। सा एव कांक्षा मम महोदारा, ······त्वञ्च जीवन्ती, अहञ्चोपरतः······इव समुत्प्रेक्षमाणो मृत्युम्, नकारन्यक्कारस्य, य आसीन्मनसा त्वयैव कवलितः, यदाऽहं तवाभूवं युगेभ्योऽपि प्राक्। अत्राद्य समुत्प्रेक्षमाणो मृत्युं यावदविकलः, विग्रहेण विकलाङ्गः, चेतसा तु स्पृहामयः, शतशतानामाशानामाशासु प्रदीपायमानः, स्वस्यैव जीवनस्य कोऽपि स्वस्मिन्नेव स्थिर आविष्कारः, यः सत्यममिथ्या कोऽपि भावनादिषु मिथ्याचारः यथा-कालिदासे। जीर्णं नाम घृष्टनाणकमपि ध्वन्यध्वनः।

······इदमेव सत्यम् ! मम वक्रिमा। ममैव स्वात्मोपयुंपल इवावस्थापितेयं मम क्रूरता। यत्कक्षोऽयं जातोऽस्ति मम जीवनम्, अस्मत्कांक्षाणामाकृतीनामेकमावसथम्, ·········यत्र त्वम्, अहं च, द्वयमेव सत्यम्, अन्यदपरंच मिथ्या।

आन्दोलनम्

(डा० इच्छाराम द्विवेदी १६७/१२ पंजाबी कालोनी, मैनपुरी)

"अनवरतश्रमशीलानां, स्वेदप्रवाहद्वारा यन्त्रशालापरिचालकानां निर्धनत्वेऽपि धनिनां कृते सततधनोत्पादनतत्पराणां कार्मिकाणामनेन प्रकारेण निष्कासनं सर्वथानुचितम्। यावत्पर्यन्तमेतेषामस्माकं निष्कासितानां बन्धूनां यन्त्रागारे पुनः प्रवेशो न भविष्यति तावत्पर्यन्तं न कोऽपि कार्यनिष्पादनार्थं यन्त्रागारे गमिष्यति। एते धनिनः सकलसुखोपभोगनिरता ऐश्वर्यमदमत्ताः केचन स्वगृहेषु वातानुकूलितकक्षेषु सुखं स्वपन्ति परं तेषां कृते भवादृशाः केचन कार्मिका भृत्याश्चाहोरात्रं प्राणान् करतलीकृत्य वाष्पनिर्माणयन्त्रे[1] दहनागारे[2] विघूर्णितभयंकरचक्रजाले,[3] विषविमिश्रितवायुप्रवाहकारिणि[4] कक्षे, वस्तूत्पादनार्थमात्माहुतिं कुर्वन्तीति तु न तैर्ज्ञायते। यदि वयमुत्पादनकार्यं स्थगयामस्तर्हि कतिपयेष्वेव दिवसेषु ते ज्ञास्यन्ति महत्त्वमस्माकम्। अत एवास्माकं परिषन्निर्णीतवती यत्कोऽपि न गमिष्यति कार्यार्थम्।"

"कार्मिकानामेकता"
"जीयताम् जीयताम्"
"शोषणतन्त्रम्"
"नश्यतात् नश्यतात्"

एतादृशान्येव वाक्यानि यन्त्रागारस्य विस्तृते पुरोवर्तिनि भूभागे वायुमण्डले स्फुरन्ति स्म। उत्तेजिताः कार्मिकास्तत्रैव समूहे स्थिताः वार्तालापे निमग्नाः। कार्यालये प्रबन्धकाश्चिन्तातुरास्तिष्ठन्तिस्म। सर्व एव घर्घरध्वनिरकस्मादेव शान्तिमाप। यन्त्रागारस्थधूमनिष्कासनस्तम्भेन धूमोद्गिरणं परित्यक्तम्। प्रातःकालेऽष्टवादने यः सावधानकरणयन्त्रस्य तूर्णध्वनिः श्रूयतेस्म सोऽपि मौनमभजत्। सर्वत्र परिव्याप्ता शान्तिः। परं शान्तेरस्या उरसि प्रवर्तते ज्वालामुखी चिन्तायाः।

---

१. बायलर
२. भट्टी
३. पहिये
४. गैस सिलेंडर कक्ष
५. चिमनी
६. सायरन भोंपू

सप्ताहपर्यन्तं कार्मिकाणां प्रबन्धतन्त्रस्य च मध्ये न किमप्यभूत् सामञ्जस्यम् । कार्मिकाः वेतनवृद्धि तथा च मासस्यैकस्य वेतनं पुरस्काररूपेण[1] वाञ्छन्ति स्म । प्रबन्धतन्त्रन्तु प्रस्तावद्वयमध्ये केवलमेकमेव प्रस्तावं स्वीकर्तुमैच्छत् । विशालेऽस्मिन् यन्त्रागारेऽनुमानतः षड्सहस्रकार्मिकाः कार्यं कुर्वन्तिस्म । तेषु यन्त्रवेत्तारः,[2] सुधारकाः,[3] यन्त्रसंचालकाः,[4] वाहनचालकाः,[5] वस्तुविक्रेतारः,[6] विविधप्रकारकाश्च कार्मिका आसन् । तत्र च केचन नियमितनियुक्तिवन्तः, केचिदनुबन्धिताः, केचित् तदर्थं नियुक्तिभोगिनः, केचिच्च दैनिकवेतन-भोगिन आसन् ।

दैनिकभृत्यानां कृते महत्कष्टकारकमान्दोलनमिदं संजातम् । सप्ताहं यावत् तु यथाकथञ्चित् ते दिवसयापनं कृतवन्तःततः परं जीविकाराहित्यं तेषां कृतेऽतीव दुःखकरं समभूत् । अन्नेन विना गृहेषु व्यलपन् बालकाः । यन्त्र-संचालनकर्मणा क्षयादिरोगग्रस्ता अधिकांशाः भृत्या अशक्तिवलात् गृहनिर्माणा-दिकार्येषु असमर्था अभूवन् । अतस्तेषां समक्षं महत्कष्टमुपस्थितम् ।

कार्मिकसंघस्य नेतारस्तु प्रतिदिवसमुग्रतर व्याख्यानं दत्त्वा तत आगत्य स्वगृहं भोजनादिकं निर्वापयन्ति स्म । आमरणमनशनं प्रारब्धं यन्त्रागारस्य द्वारे कार्मिकैः । प्रबन्धतन्त्रेण सह वार्तायाः किमपि फलं यदा निकटमायातिस्म नेतारस्तेषां विषमा अन्याः वार्ताः स्वामिनां समक्षं संस्थापयन्ति स्म । यावत् सुदीर्घकालमान्दोलनं प्रचलिष्यति तावदेवं तेषां कृते लाभप्रदं भविष्यतीति जानन्त्येव ते ।

सप्ताहानन्तरं कार्मिकाणामान्दोलन हिंसकं जातम् । ते यन्त्रागारेऽग्नि-काण्डमकुर्वन् । मार्गेष्ववरोधान् स्थापयित्वा ते यातातातमस्तव्यस्तं समपाद-यन् । मार्गेष्वभूवन् क्रोशं यावत् दीर्घाः वाहनानां पंक्तयः । यात्रिणः भयभीताः । कार्मिकाः कतिपयेषु वाहनेषु प्रस्तरप्रहारं, कतिपयेषु वह्निसमुज्ज्वलनं, कतिपयेषु हिंसनञ्चक्रुः । नगरे सर्वत्रैव संजाताभूतपूर्वा स्थितिः । राजकीयरक्षका मूकदर्शकवत् सर्वमपश्यन् परं न तैः किंचिदपि कृतम् ।

एतादृश एव जटिले काले कार्मिकसंघस्य प्रधाननेता य आसीत् हिंसका-न्दोलनप्रवर्तको, मार्गावरोधकारकश्च सोऽशृणोत् यत्तदीये गृहे तस्या धर्मपत्नी प्रसववेदनया व्याकुलायते । त्वरितगत्या सोऽधावत् गृहं प्रति । द्वारि कार्मिक-वसतेः स्त्रीणां समूहश्चिन्तातुरस्तिष्ठति स्म । चिकित्सकस्तु केनापि पूर्वमेवा-

---

१. बोनस-लाभांश
२. इंजीनियर
३. मिस्त्री
४. आपरेटर
५. ड्राइवर
६. सेल्समैन

कारित: । चिकित्सकस्तं दृष्ट्वा द्रुतमकथयत्—

"अस्मिन्नेव क्षणे राजधान्या: प्रधानचिकित्सालये प्रापयैनामन्यथा न ते हस्तंगतं भविता किञ्चिदपि ।"

नेता सत्वरं गत्वा कथंकथमपि चतुश्चक्रिकावाहनमेकं द्वारे समानीय स्त्रीणां साहाय्येन पत्नीं याने संस्थाप्य राजधानीं प्रति प्रस्थित: ।

राजमार्गे आसीत् विप्लव: । सर्वत्र अव्यवस्था, वाहनानामन्तहीन: सम्मर्द: । आन्दोलनकर्तृभि: यत्कृतं तदधुना नेतु: मन:पटले साकारतामुपगतम् । यानादवतीर्य स वाहनानि चालयितुमुन्मत्तवत् प्रार्थनमचीकरत् । इतस्ततो धावन्स: करबद्धतया गद्गदया गिरा, विलपन् समेषां समक्षं पौन:पुन्येन याचनमकरोत्परं सर्व एव विवशा: । यावत्स: पुन: प्रत्यावर्त्य स्वयानं नगरं प्रति प्रत्यावर्तितुमैच्छत्तावत्तस्य यानस्य पश्चादपि बहूनि वाहनानि समागतानि यैरवरुद्ध: प्रत्यावर्तनमार्ग: ।

विवश: स: स्वकीये यान एव रोदनं प्रारभत । पृष्ठपार्श्वे प्रसववेदनया चीत्कारपरायणा वराकी तस्य पत्नी तरलतारकाभ्यां नेत्राभ्यां वारंवारं तं दृष्ट्वा कम्पिताभ्यां करकमलाभ्यां तस्य करं दृढतया ग्रहीतुमसमर्था सती हिक्काव्याजेनाकस्मादेव दिवमयासीत् वाहन एव साजीजनत् पुत्रमेकं तिसृणां कन्यानामनन्तरं सोऽपि च नवजात: शिशु: मात्रा सहैव दिवं गत: । तत् सर्वं दु:खातिशयकरं दृष्ट्वा वृत्तान्तमुन्मत्तो नेता—

"आन्दोलनमान्दोलन" मिति साम्रेडमुच्चैरालपन् स्व वस्त्राणि च विदीर्य मार्गेऽधावत् ।

अद्यापि नगरे यदा कदा स नेता दृश्यते मार्गेष्वितस्ततो यत्र तत्र "आन्दोलनमान्दोलन" मिति अस्फुटं प्रलपन् ।

○

जापानदेशीयानि (जापानीज़)
'तान्का' काव्यानि

(डा० हर्षदेव माधवः, सी-२४७ भावना टेनामेण्ट्स वासणा बैरेज-निकटे
अमदावादः-३८०००६)

o समाजोत्सवः
युवतीनां गीतेषु
यूना चेतांसि ।
युवतीनां मनांसि
उष्णिक्चित्रवर्णेषु ॥

o समाजोत्सवः
मनसः क्रीडाचक्रे[1]
परिचिता सा ।
व्रणपीडिते हार्दे
चरणशताऽऽघातः ॥

o पतङ्गो[2] गतः ।
पश्यन् पतङ्गगुणं
रिक्तं बालकः ।
छिन्नपतङ्गसमं
गगनं शून्यं च मनः ॥

o नागतो गृहं
पत्रवितरकोऽद्य
दीर्घं निःश्वस्य
प्रतिनिवृत्य वधूः
प्रमृजत्यश्रुबिन्दुम् ॥

o वृत्तौ चकितः
शशकः शलभं तु
वीक्ष्य, शङ्कितः,
चमत्करोति कर्णं
चालयन् पार्श्वे पर्णम् ॥

o जीर्णवस्त्रेण
वेष्टयित्वा स्वगात्रं
गच्छता तेन
दृष्टं पूरितं पात्रं
नवसंवत्सरेण ॥

o यातौ नताङ्गौ
कशापीडितौ क्षीणौ
शकटलग्नौ
बलीवर्दौ निःश्वस्य
नववर्षमाकृष्य ॥

o शिरसि घटं
वहन्ती, चालयन्ती
कपोलालकम् ।
पदस्खलनत्रस्तम्
उच्छलति मे हार्दम् ॥

---

१. Merry-go-round.

२. Kite.

o रेल्वेयानस्य
वियुक्तकक्षसमा
गतिः प्रियस्य
हस्तं चालयन्ती सा
जाता 'सिग्नल' निभा ! ॥

o वातायनं तु बद्धं
न दृश्यते सा,
कर्णौ परन्तु
शृणुतो द्वारशब्दं,
अयं मे तपोभङ्गः ! ॥

o क्षुत्क्षामकण्ठः
रोदिति रथ्यायां श्वाः,
शिथिलं पुच्छम् ।
उदित इवोत्कण्ठः
पाण्डुराङ्गश्चन्दमाः ॥

o खर्जूरच्छाया
विशीर्णा सिकतासु
नष्टा च सन्ध्या ।
गच्छति चन्द्रिकासु
पुनरप्युष्ट्र-काया ॥

o वेश्यापर्यङ्के
वाक्षस वस्त्र[1] गन्ध;
उदिते चन्द्रे
रञ्जयति ताम्बूलं
क्वाथेन युवा हट्टे ॥

o प्रियतमायाः
उच्छलद्वक्षसि
नृत्यं वेलायाः ।
किन्तु भग्ननौकायाः
आतंको मे वपुषि ॥

o क्रुद्धतित्तिरः
रक्ताक्षोऽभिद्रवति ।
युध्यतेऽपरः ।
ददति हस्ततालाः
दन्तलग्नौष्ठा जनाः ॥

o श्रावणे मन्त्रान्
शृणोति नन्दी, जिघ्रति
कच्छपो गन्धान्,
ताम्रसर्पः स्पृशति
शिरसि दुग्धधाराम् ॥

o भ्रमति गृध्रः
नभसि चक्राकारं
रक्ताक्षः क्रुद्धः ।
प्राप्यते शवगन्धः
पुनश्च क्षुत्सम्बन्धः। ॥

o प्रथमरात्रिः……
अरुन्धती वसिष्ठौ
सा दर्शयन्ती……
श्याम-नेत्र-नभसि
अहं पूर्वजन्मनि ! ॥

१. Brassieres.

o दिनाङ्कपत्रे
पुनः···वसन्ताऽऽरम्भे
नूतनवर्षे···
पुनश्चित्रगता
हसति शुचिस्मिता ॥

o पुनश्च प्रातः
पुनश्च पुष्पामोदः
प्रफुल्लं सरः ।
चक्रवाकस्याऽऽक्रोशः,
भवति परितोषः ॥

o होली ! न प्रियः
विलोक्य वातायनम्
श्वसिति गात्रम् ।
नेत्राञ्जनाश्रुसिक्तं
पत्रप्राप्तं कुङ्कुमम् ॥

o दीपावली रे
प्रज्वालिते प्रदीपे
भाति युवतिः ।
प्रज्वलिते च नेत्रे
शाटीपर्यन्तद्वये ॥

o चक्रं भ्रमति
कुम्भकारः पश्यति
वृद्धोऽनुशोचति ।
(आशुविनाशि-सग
दृष्ट्वा ब्रह्मा सर्जनम् ॥)

o पाटल-पुष्पं
त्वया प्रदत्तं, मार्गे
गन्धात् ऋते
पाटलवर्णपत्रेषु
जातस्ते वक्त्रस्पर्शः ॥

o सर्पः शृणोति
मुरली-वक्षः श्वासं
शनैर्नृत्यति ।
सङ्गीततन्तुबद्धाः
केनापि पञ्चप्राणाः ॥

o लोष्ठगुटिकां
कर्षको विसृजति
विहगं प्रति ।
कर्षकवध्वा वक्षः
सभयमुच्छलति ॥

o सैन्दूरवर्णं
सत्याः···हस्तस्य चिह्नं
ज्वलत्श्मशानं
अङ्गुष्ठाऽनलदग्धा
सायं समये सन्ध्या ॥

o भिक्षुकः स्थितः
बसस्टेण्ड-फलके
क्षुत्त्रस्तः, पार्श्वे
सपुष्पा जातिलता
प्रसारयति शाखाः ॥

o सहसा पार्श्वे
बसयानस्याऽऽसने
काऽपि युवतिः ।
रोमाञ्चे ऋतु-स्पर्शः
स्कन्धे कोरकोद्भवः ।।

o काऽपि युवतिः
बसयानस्याऽऽसने,
अकस्मात् योगः ।
पुरुषो निर्विकारः
अचेतना प्रकृतिः ।।

o 'कर्फ्यू'[1] ग्रस्ते
नगरे लावारसः
जनसंमर्दे ।
शतघ्नीमुख-समा
सहसा प्रतिरथ्या ।।

o करफ्यूग्रस्तं
नगरं···वनमिव
निर्जनं दग्धम् ।
भित्ति-वक्षःस्थलानि
गोलिका-चिह्नितानि ।।

१. Cerfew

सौरि-सरेति[1] महावाक्यम्

(डा० रामेश्वरदत्त शर्मा, ३ विकासनगरम्, भिवानी १२५०२१)

वेदवेदाङ्गशास्त्रेषु भूयसी वाक्यशृंखला ।
परं 'सौरि-सरो' वाक्यं सर्ववाक्यशिरोमणिः ॥१॥
'अहं ब्रह्मास्मि' वेदान्ते 'तत्त्वमसि' च गीयते ।
निष्पक्षं ब्रूत शास्त्रज्ञाः किमाभ्यां कोऽपि रक्षितः ॥२॥
सौरि-सरेति वाक्येन रक्षिताः कोटिशो जनाः ।
गणयेत् कोऽपि सर्वांश्चेद् बृहद् ग्रन्थो भवेत् तदा ॥३॥
न जाने केन शब्दोऽयं केन पुण्येन निर्मितः ।
यस्य स्मरणमात्रेण कष्टी कष्टाद् विमुच्यते ॥४॥
कियानपि भवेद् दोषोऽक्षम्योऽपराध एव वा ।
सौरि-सरं समुच्चार्य मुक्तो भवति मानुषः ॥५॥
कुत्रापि षोडशीं स्पृष्ट्वाऽत्यानन्दश्चानुभूयताम् ।
कथञ्चिच्चेद्धि कुप्येत् सा 'सौरि मैडम' तां वद ॥६॥
कस्यापि महतः पुंसो मानं निहत्य मा शुचः ।
मानहान्यभियोगे त्वं 'सौरि-सरेण मोक्ष्यसे ॥७॥
कार्यालयान्न भेतव्यं सुखं स्वपिहि निर्भयम् ।
दैवाद् बॉसः प्रपृच्छेत् त्वां सौरि-सरस्तदोच्यताम् ॥८॥
व्यर्थमेव हि युध्यन्ते यत्र तत्र मिथो जनाः ।
सौरि-सर-सुधां पीत्वाऽऽनन्दः कथं न भुज्यते ॥९॥

---

१. Sorry Sir.

न कापि वित्तहानिर्वा शारीरिकोऽपि न श्रमः ।
नोद्विग्नता च चित्तस्य तस्माच्छ्रेष्ठमिदं बलम् ॥१०॥
बुधा मुधैव जल्पन्ति सौरिर्दण्डो महत्तरः ।
कारावासस्य शूलस्य मुखं दृष्टं न तैस्तथा ॥११॥
अतो हे स्वात्मगोप्तारो ! यावत् सौरिर्मुखाम्बुजे ।
ईशो दण्डयितुं नालम् मनुष्याणान्तु का कथा ॥१२॥

※

मावमंस्थाः सखे !

(डा० परड्डी मल्लिकार्जुनः, धारवाडः)

ताज् महल भव्यतादिव्यतालोकने
हर्षपूर्णं भवेत् तावकं मानसम् ।
किन्तु तन्निर्मितेर्मूलहेतुं कथं
न स्मरस्यद्य तं दैन्यपूर्णं जनम् ? ॥१॥

गायने नर्तने काव्यबन्धे रताः
साक्षराः लब्धमानाः समाजे यतः ।
किन्तु तेषां कलावर्धके साधने
राक्षसास्ते कथं मानवे निर्धने ? ॥२॥

शिक्षकाश्छात्रवर्गोपदेशे रता
धार्मिका वीतचिन्ताः समाजे यतः ।
वैद्यवृन्दोऽपि यत् स्वीयकार्ये रतः
दीनचित्तं स्मरस्यन्नदाने रतम् ? ॥३॥

आङ्ग्लराज्ये पराधीनतादुःखिताः
भारतीयाः सदा शृङ्खलायन्त्रिताः ।
यैर्महादेशभक्तैर्वयं तारिताः
जर्जरान् संस्मरस्याद्य तान् वा मृतान् ॥४॥

हर्म्यवासी जनोऽमूल्यवस्त्रान्वितो
मिष्टभोजी सदा वैद्यसम्मानितः ।
वृक्षमूलाश्रयं जीर्णवस्त्रान्वितं
खाद्यहीनं क्षणं संस्मरेत् शोषितम ॥५॥

उन्मुखीभूयते स्वाक्षि वोन्मील्यते
येन भूमौ लुठन् ना कथं दृश्यते ।
बान्धवो भारते हन्त जातः सखे
किं त्वयोपेक्ष्यते दैन्यपूर्णो जनः ? ॥६॥

यत्तरोर्वा लतायाः शिरोभूषणं
पुष्पवृन्दं सदा द्रष्टुकामो नरः ।
पादपानामिदं यैः कृतं पोषणं
तानि पश्येत्तु मूलानि नम्राननः ॥७॥

असंख्यातवर्षाणि जीवनम्

(रचयिता—डा० परमानन्दः शास्त्री, सिद्धार्थसदनम्, मन्दिरमार्गः,
अलीगढम् २०२००१)

मया जीवनं दृष्टमविरलं मृत्योर्मे नहि काचिद्भीतिः ।
या दिक्कालतटान्तराल इह वहति निरन्तरजीवनधारा,
भिन्नरूपवर्णाकृतिकोणा रसास्वादगतिभिन्नाऽपारा,
तस्यां कश्चिल्लघुद्वीप इव मन्येऽहं मृत्योरस्तित्वम् ।
केवलमस्यर्धार्धविरामो मृत्यो ! पूर्णविरामो न त्वम् ।
कालदिशोरानन्त्येऽजस्रं जीवनस्य गुञ्जति सङ्गीतिः ।
मया जीवनं दृष्टमविरलं मृत्योर्मे नहि काचिद् भीतिः ।

लता पुष्पफलतरवो लुप्ताः निजबीजे जीवनमुपयान्ति,
मरुभुवि वाष्पे, हिमे हिमगिरौ जलसीकरा विवर्तं यान्ति ।
परमाणुषु च पञ्चतत्त्वानां देहिनां हि देहा लीयन्ते ।
नहि विलीयतेऽस्तित्वं तेषां रूपाण्येवान्यतामयन्ते ।
नवतापरिवर्तनमविरामं जीवनस्य सैवैकपदीतिः ।
मया जीवनं दृष्टमविरलं मृत्योर्मे नहि काचिद् भीतिः ।

जीवनरूपमात्मजे पित्रोः पञ्चत्वेऽपि स्थितं जीवनम्,
दृषदां वक्षःस्फोटं कृत्वा बीजाङ्कुरणं पुनर्जीवनम्,
जीर्णपत्रगलनाद् वसुधाया उर्वरतावर्धनम् जीवनम्,
एकीभूय सलिलबिन्दूनां सिन्धुविधानं ध्रुवं जीवनम् ।
जीवनस्य वर्षाणि सहस्रं मृत्योरेकक्षणं प्रतीतिः,
मया जीवनं दृष्टमविरलं मृत्योर्मे नहि काचिद् भीतिः ।

गतिर्जीवनं कर्म जीवनं चरैवेति शुभमतिर्जीवनम्,
निशि निद्राविश्रान्तिर्मृत्युः प्रातर्जागरणं च जीवनम्,
स्वार्थकृते परहानिर्मृत्युः निस्स्वार्थं परहितं जीवनम्,
अनृतहेतुसंघर्षो मृत्युः सत्यकारणात्सैव जीवनम्।
अश्रुविधानं मृत्युर्जीवनमापन्नाश्रुसृजायां प्रीतिः।
मया जीवनं दृष्टमविरलं मृत्योर्मे नहि काचिद् भीतिः।

श्रेयः प्रेयो द्वन्द्वपरीतं सर्वं दुःखं नैव जीवनम्।
भौतिकभोगैरिन्द्रियतोषणमृगमरीचिका नैव जीवनम्।
नैष्कर्म्योग्रा परोपदेशे वावदूकता नैव जीवनम्।
मौनं मानवतासेवायां रतं जीवनं परं जीवनम्।
वामा नापि दक्षिणा द्वन्द्वे केन्द्रियदृष्टिर्जीविनरीतिः।
मया जीवनं दृष्टमविरलं मृत्योर्मे नो काचिद् भीतिः।

मरणं येन शिक्षितं लोके ज्ञातं तेनैवात्र जीवनम्,
अलसैर्वर्षैर्नैव, गण्यते कर्मठतायाः क्षणैर्जीवनम्,
तापितमपि बहु परसम्पर्कात् स्वयं शैत्यगुणमेव जीवनम्,
बिन्दुबिन्दुभिः सिन्धुसर्जनं सहचरताभिख्यं हि जीवनम्।
जीवनमेकमखण्डं ज्योतिस्तमसां भिदा केवलं नीतिः।
मया जीवितुं शिक्षितमास्ते मृत्योर्मे नहि काचिद् भीतिः॥

○

क्व गच्छानि क्व यानि ?

(डा० कृष्णनारायण पाण्डेयः, आकाशवाणी पणजी, गोआ)

सत्ययुगे सर्वेषां मनुष्याणाम् एका भाषासीत्, एकः वर्गः एकं च राज्यमासीत्। अस्य पौराणिकतथ्यस्य वर्णनम् ईसाई धर्म पंथग्रन्थ 'वाइबिल' मध्येऽपि 'ओल्ड टेस्टामेण्ट' इति भागे वर्तते। सा प्राचीनतमा भाषा का ? भाषाविज्ञानदृष्ट्या संस्कृतं, तामिलं, लैटिनं भाषात्रयं वर्तते।

संस्कृतस्य प्राचीनतमं रूपं वेदसाहित्ये संरक्षितं वर्तते। प्राचीनलैटिन भाषायां केवलं व्यापारिकविवरणानि वर्तन्ते तथापि ईसाई-सम्प्रदाये धार्मिक-कृत्येषु लैटिनप्रयोगः प्रचलति। तमिलभाषाक्षेत्रे रामायणकाले संस्कृतस्य प्रचलनं सम्पर्कभाषारूपेण आसीन् इति वाल्मीकि-रामायणे स्पष्टतया वर्णितम्। महर्षिणा अगस्त्येन सर्वप्रथमं तमिलभाषा-व्याकरणस्य रचना कृता इति प्रसिद्धम्। तमिलभाषायां प्रचलितशब्दाः पलम् चंगमम्, तन्नीरम् वा तन्नी क्रमशः फलम्, संगमम् तत्नीरम् (जलम्) इति संस्कृतशब्दानां प्रतिरूपाणि। तमिललिपिः ब्राह्मीलिपेः दाक्षिणात्यं रूपम्। वर्णमालायां क ङ, च ञ, ट ण, त न, प म इति अक्षराः संस्कृतवर्णमालाक्रमे एव वर्तन्ते। लैटिनभाषायाः शब्दः ''सुओमोटो'' संस्कृतस्य स्वमेव इति शब्दस्य परिवर्तितरूपम्। लैटिननिःसृतभाषासु 'सेण्टर-केण्टर-केन्द्र' 'करेक्टर-चैरेक्टर-चरित्तर-चरित्र' 'डोर-द्वार' 'अल्टिमेटम अंतिमित्थम्' 'कमिटी-समिति' इति शब्दानां रूपं मूलभाषा का इति संकेतयति।

आर्याणां मूलस्थानं ध्रुवप्रदेशतः भारतवर्षस्य ब्रह्मावर्तपर्यन्तं विविध-स्थलेषु ऐतिहासिकशोधेषु प्रमाणितम्। वस्तुतः एतेषु समस्तस्थलेषु आर्याणां स्थितिः आसीत् इति भाषाविज्ञानदृष्ट्या प्रमाणितम्। सर्वत्र तथाकथिता भारोपीयभाषा प्रचलितासीत्।

वस्तुतः परिकल्पितभारोपीया मूलभाषा संस्कृतम् एव। तुलनात्मक-भाषाविज्ञानविषयस्य जन्म पश्चिमजगति संस्कृतस्य अध्ययनेन जातम्। साम्प्रतं संस्कृतम् अनेन कारणेन् एव विश्वस्य अधिकांशविश्वविद्यालयेषु पाठ्यते।

स्वदेशे मराठी, कोंकणी-बंगला-कन्नड, मलयायम-गुजराती भाषाणां मूलरूपज्ञानाय संशोधनं कुर्वन्तु। यत् रूपं मिलिष्यति तत्संस्कृतं भविष्यति। तथा सांस्कृतिकैक्यभाषा संस्कृतं साम्प्रतं भारते 'पुस्तकस्था' इव प्रतिभाति। लोकजीवने श्रवणं तु सुलभं परन्तु प्रयोगे दर्शनंदुर्लभम्।

मानवताया ऐक्यसूत्रं संस्कृतं लोकजीवने प्रचलितं स्यात्, देववाणी भूलोकवाणी स्यात् इति ध्येयेन लोकभाषा प्रचार समितिः पुरी, हिन्दू-सेवाप्रतिष्ठानम् बंगलोर, संस्कृताध्यापक संघ-पुरनट्टुकरा केरलः, विश्वसंस्कृत प्रतिष्ठानं वाराणसी-इत्येताभिः संस्थाभिः सार्वदेशिकसंस्कृतसमन्वयसमिति-सम्प्रेरणेन, तथैव शताधिक संस्कृतपत्रैः संस्कृत-सेवा क्रियते परन्तु परस्परम् असमन्वयेन कृते कार्ये शक्तिः न भवति।

संस्कृत-क्षेत्रे समन्वयाय कश्मीरतः कन्याकुमारी पर्यन्तं प्रवासं कृत्वा संस्कृतानुरागिणः निवेदिताः प्रतिवर्षम् एकवारं कार्यमूल्यांकनाय परस्परं योगदानाय अनुभवस्य आदानप्रदानाय च। १९८५ वर्षे जम्मूकश्मीरे श्री अमरनाथ-गुहा क्षेत्रे संस्कृत भाषा १९८६ वर्षे अयोध्यानगरे अखिलभारतीय संस्कृत-संमेलनं, तथैव १९८७, १९८८, १९८९ वर्षेषु श्रीरामवनयात्रामार्गे चित्रकूटे, पंचवटी-नासिके, किष्किधा-कर्नाटके सम्मेलनानि समायोजितानि। बहु प्रचार प्रसार कृतेऽपि अपेक्षित संख्या न भवति प्रतिनिधि-जनानाम्।

अस्मिन्वर्षे २६, २७ दिसम्बर ९० मासे रामेश्वरम् तमिलनाडु प्रदेशे अस्मिन् क्रमे अंतिमं सम्मेलनं भविष्यति। तीर्थयात्रा व्याजेन संस्कृतसेवा भवतु इति प्रायोजना वर्तते। शताधिक पत्राणि प्रेषितानि; अद्यावधि स्थानीय-संस्कृतानुरागिभिः पत्रोत्तरं न दत्तम्। पत्रोत्तरदाने संस्कृतज्ञानां शैथिल्यम् अभिनंदनीयम् ?

अस्तु समन्वय-माध्यमेन रामेश्वरक्षेत्रं दक्षिणे, द्वारकाक्षेत्रं पश्चिमे पुरीक्षेत्रं पूर्वे नैमिषारण्यम् उत्तरे संस्कृतक्षेत्रं कर्तुं शक्यते। इति सर्वसम्पादनाय सर्वेषां संस्कृतानुरागिणां संस्कृतसंस्कृतिसंस्थानां समन्वितयोगदानम् अपेक्ष्यते। यथाशक्यं प्रयासः क्रियते परन्तु पूर्णसाफल्यार्थं क्व गच्छानि क्व यानि ? इति कृपया सूचयन्तु सुपाठकाः। शुभम् !

स्वरमंगलायाः श्रीनेहरूविशेषांकः[1]

(श्री अरविन्दनाभः शुक्लः, ५६ पटेलनगरम्, मुज़फ्फरनगरम्)

राजस्थान-संस्कृत-अकादम्याः त्रैमासिकसंस्कृतमुखपत्रस्यायं विशेषांकः स्वतन्त्रभारतस्याद्यप्रधानमन्त्रिचरस्य स्वर्गीय पं० जवाहरलालनेहरू-महाभागस्य जीवनं, व्यक्तित्वं कर्तृत्वंचाभिवलक्ष्य सुमनोंजलिरूपेण समर्पितो वरिवर्ति। उत्कृष्ट लेखक-चिन्तक-दार्शनिक-राजीतिविचक्षणस्य पं० नेहरूमहोदयास्य जन्मशतीवर्षावसरे प्रकाशितोऽयमंकः विविधदृक्कोणैरद्वितीयः। विश्वस्य प्रख्यातदार्शनिक प्लेटोमहाभागः स्वीकुरुते यत् प्रशासक-दार्शनिकयोः समन्वयो वस्तुतो लाभप्रदः। दार्शनिकः प्रशासकः प्रशासको दार्शनिकश्चेत्युभयं जनकल्याणाय कल्पते। माननीय पं० नेहरू महाभागस्य व्यक्तित्वे उभयमपि समन्वितं सत् वैशिष्ट्यमुत्पादयति। भारतराष्ट्रं पारतन्त्र्यगाढतिमिराद्न्मोच्य अमुष्यातीतस्य पृष्ठभूमौ नव-भारतराष्ट्रस्य कल्पनां साकारतामापादयन्नयं स्वीयां गहनचिन्तनसरणिं प्रथयांचकार।

सम्भ्रान्तपरिवारे जनिमुपलभ्य विदेशेषु चोच्चतमां शिक्षामधिगम्याप्यय-मात्मनो जीवनं सकलमपि देशसेवायै प्रार्पयत्, भारताय च नवीनां दिशं प्रदर्श्योन्नतेः शिखरं प्रापयत्।

प्रकृतेऽस्मिन् विशेषांकेः विषयदृष्ट्या पण्डितनेहरूसम्बद्धेषु विविधपक्षेषु समुल्लिखिताः प्रकृष्टविदुषां लेखा विषिष्टमाकर्षणं जनयन्ति। महामनीषिणो-ऽमुष्य राष्ट्रनायकस्य जीवनसम्बन्धिनीनां समस्तघटनानामितिवृत्तानांच साकल्येनैकत्र प्रस्तुतं विवरणमेतस्य सर्वांगीणं परिचयं प्रस्तोतुमलमास्ते। श्रीमता समये-समये विलिखितानां ग्रन्थरत्नानां सामग्र्याः समावेशेन विशेषांके-ऽमुष्मिन् मणिकांचनसंयोग इव समुपस्थापितः। राष्ट्रनेतुः कूटनीतिमर्मज्ञस्यास्य सम्बन्धे आधिकारिकीं सामग्रीं प्रस्तुवत्या संस्कृत-अकादम्या स्तुत्यः प्रयासो विहितः।

सम्पादकीयस्य लेखकेन डा० गंगाधर भट्ट-महाभागेन स्वीये लेखे पण्डित नेहरू-महाभागस्ग जीवनस्य, व्यक्तित्वस्य, कर्तृत्वस्य च विविधपक्षान्

---

१. स्वरमंगला (श्रीनेहरूविशेषांकः) सम्पादकः डा० गंगाधर भट्टः। राजस्थानसंस्कृतअकादमी, जयपुरम्।

समावेश्यैतेषां मूल्यांकने विशिष्ट आग्रहः प्रदर्शितः। देशस्य व्याख्यासम्बन्धिनो नेहरूमहाभागस्य "भारतस्य जनतैव भारतो देशः'' इत्याकारकान् विचारान् विदधता सम्पादकेनामुष्य चिन्तनधाराया मर्मोपस्थापितम्। नेहरूमहाभागस्य दृशा सर्वसुखसम्पन्नो मानवः स एव यस्य विचारे कर्मणि च सामंजस्यं वर्तते। सामंजस्यानुसन्धानमेव कर्तव्यकर्मणो मार्गं प्रशस्तं विधत्ते।

पण्डितनेहरूमहाभागं प्रति कवित्वमयानि भावपूर्णानि श्रद्धासुमानि समर्पितवत्सु कविपुंगवेषु प्रमुखाः राजस्थान-भाषाविभागस्य निदेशको देवर्षि-कलानाथशास्त्री, राजस्थानविश्वविद्यालये संस्कृतविभागाध्यक्षोः डा० हरिराम आचार्यः, "लेलिनामृता"-महाकाव्यकर्ता श्री पद्मशास्त्री, श्रीकृष्णलाल शुक्लश्च यैः स्वीयभावार्पणव्याजेन स्वीयः श्रद्धाकुसुमाञ्जलिः समर्पितः। "नेहरू-विंशतिका" डा० शिवसागरत्रिपाठिना विंशति श्लोकैरुपनिबद्धा स्वीयं वैशिष्ट्यं प्रकाशयति।

पण्डितजवाहरलालनेहरोः जीवनमाधृत्य काव्यद्वयी विशेषांके महत्त्वपूर्णं स्थानं भजते। डा० उमारमणझा-विरचितं "नेहरूचारुचर्या" नामकं ११९ श्लोकेषूपनिबद्धं काव्यं रम्यं भव्यं चास्ते। काव्येऽस्मिन् नेहरुमहाभागस्य जीवनस्य घटनानां विविधायामानां भारतं प्रति तस्य दृढनिष्टायाः निःस्वार्थ-सेवायाश्च सुरम्यं चित्रणं विहितम्। एवमेव श्रीरामकृष्णशास्त्री "अव्यय"-विरचितं "नेहरूशतक"-न्नाम काव्यं वर्णनादृष्ट्या चित्रांकनेन च रामणीय-कतामावहति।

विशेषांकेऽमुष्मिन्नुत्कृष्टानां गद्यलेखानां प्राचुर्यं रचनादृशा चैतेषां वैशिष्ट्यमुल्लेखनीयम्। एतेषु डा० गंगाधर भट्ट-विरचितो "महामनीषी पं० जवाहरलाल नेहरूः" नामको लेखः नेहरोः व्यक्तित्वस्य, जीवनचर्यायाः रचनाधर्मितायाश्च परिचायको वरीवर्ति। शोधदृष्ट्यास्मिन् लेखे प्रभूता सामग्री समुपलभ्यते। डा० प्रशस्यमित्रशास्त्री भाविन्या एकविंश्याः शताब्द्याः सुविशदं चित्रांकनं विहितवान्। एकविंश्याः शताब्द्याः सम्भावितानां घटनाक्रमाणां जीवनसरण्याश्च सजीवं चित्रं प्रस्तुवता कविनाऽऽत्मनो भावनाः विशदीकृताः। "पं० नेहरूमहोदयस्य चिन्तनसृति"रिति डा० राजेश्वरी भट्टस्य लेखो नेहरूमहाभागस्य चिन्तनधाराणां सुस्पष्टं विवरणं प्रस्तौति। चिन्तनस्य विशिष्टता लेखेऽमुष्मिन् सुव्यक्तं मुखरिता।

पण्डितनेहरूमहाभागस्य साहित्यसर्जनायाः विवेचनं विश्लेषणं च विहितं श्रीमता मोहनलालशर्मणा स्वीये लेखे "साहित्यस्रष्टा नेहरूः" इत्यात्मके।

एवमेव अमुष्य कलाप्रेम चिवितं श्रीमता हरमल्लेन। उभावपीमौ शोधच्छात्रौ समुदीयमानलेखकौ:, गहनाध्ययने चैतयो: विशिष्टाभिरुचि:।

श्रीरामदेवसाहू युगपुरुषाय नेहरूमहाभागाय काव्यात्मकं श्रद्धांजलिं समर्पयांचकार। श्री साहू महाकाव्यस्यैकस्य रचनाकृद् वर्तते। श्रेयांसकुमारसिंघई "पं० नेहरूमहाभागस्य विचारोदधिकमलानी" ति लेखे श्री नेहरो: विचारकणान् अथवा जीवनसागरस्य कमलानि सम्निमिषितानि व्यधात्।

पं० नेहरूमहाभागस्य शास्त्रीयविवेचने महती रुचिरवर्तत। फलत: डा० बालशास्त्रिण: साहित्यविषयको लेख: डा० राजेन्द्रप्रसादशर्मणश्च बौद्धार्थविषयको व्याकरणसम्बद्धो लेखोऽस्य विशेषांकस्याकर्षणम्।

भाषाया दृष्ट्या विशेषांकेऽस्मिन् सरला, सहजा, समुत्कृष्टा भावोत्पादिका च भाषा प्रयुक्ता। लेखकानां भाषासु वैविध्यन्तु स्वभावसिद्धमेव तथापि भाषाया: स्तरस्य पूर्णरूपेण रक्षणम विहितम्। लेखानां प्रौढा, परिष्कृता, प्रांजला च भाषा तेषां काव्योचिता शैली च लेखकानां प्रौढिं प्रतिपादयितुं सक्षमा। अनेनेदं तथ्यं समुद्घाटितं यत्संस्कृतभाषा साम्प्रतमपि सजीवा नवनवोन्मेषशालिनी च।

प्रकृतलेखानां लेखका: प्रख्याता विद्वांस: सन्ति। कतिपय एतेपूदीयमाना लेखका येषां प्रतिभापाटवमत्रावलोकयितुं शक्यते। अकादम्या: प्रमुखमिदमुद्देश्यं यन्नवीना लेखका: प्रोत्साह्येरन् येन ते राष्ट्रियस्तरीयांल्लेखान् लेखितुं समर्था: भवेयु:।

लेखेषु लेखकानां व्यक्तित्वमंकितं भवति। विना लेखकानां परिचयं विवेच्य विषयस्यावगमनं सुदुःशकम्। अमुमेवोद्देश्यं लक्ष्ये कृत्वा प्रत्येकं लेखस्य आदौ सम्पादकीयटिप्पण्यां लेखस्य सारांशो लेखकस्य च परिचयो यथायथमंकित: सम्पादकेन। अनेन पाठकानां लेखपठनेऽभिरुचिरभिवर्धते।

आकारदृष्ट्या स्वरमंगला स्वीयां सीमामनुव्रजति। विशिष्टचिन्तक विचारकराष्ट्रनायकस्य महिमानं विचिन्वतो विशेषांकस्यापर्याप्तत्वं स्वाभाविकमेव तथापि व्यापकता-दृशा ससंक्षेपं प्रस्तुतीकरणस्य प्रयास: सर्वथा स्तुत्य एव।

विशेषांकस्यास्य सफलप्रकाशनार्थं सम्पादको डा० गंगाधर भट्ट: अकादम्या अध्यक्षो डा० मण्डन मिश्रोऽन्ये च सहयोगिन: प्रशंसामर्हन्ति।

स्वरमंगलाया माध्यमेन संस्कृतभाषाया साहित्यस्य च परिरक्षणस्य परिवर्धनस्य प्रसारस्य च य: प्रयासो विधीयते स सर्वथा प्रशस्योऽभिनन्दनीयश्च। आशासे, आयत्यामपरेऽपि विशेषांका अनेनैवोत्साहेनाकादम्या प्रकाशयिष्यन्ते।

काव्योन्मेषः[२]

(श्री श्रो० भि० वेलणकरः सम्पादकः, 'गीर्वाणसुधा', मुम्बई ४००००४)

श्रीहरिश्चन्द्ररेणापुरकरकवेः संस्कृतभाषायां रचितः काव्योन्मेषः ४: कविताभिर्मण्डितः । अत्र प्रयुक्तानि छन्दांसि यथा प्राचीनप्रथितानि तथैव विषयाश्चार्चिता आधुनिकाः । बहूनि काव्यानि व्यक्तिपराणि । कालिदासः दयानन्दः, विवेकानन्दः, गान्धी, सावरकरः, सातवलेकरः जवाहरलालः इन्दिरागान्धी, शास्त्री, लाजपतराय, इत्यादयो नरविशेषाः कारणवशात् विशयीभूताः । तथैव स्वदेशप्रीतिरप्यत्र निमित्तं कासाञ्चित् कवितानाम् । यथा 'सा खलु धन्या भारतभूमिः' 'भो देशभक्तोत्तमाः' 'भो पाकभूशासकाः' इत्यादयः । तत्र 'तावत्स्वराज्यं नहि लोकराज्यम्' 'जीवेच्चिरं भारतलोक-राज्यम्' इत्यादय उल्लेखविशेषमर्हन्ति । संस्कृतभाषामधिकृत्य 'सा देववाणी खलु सेवनीया' 'आलम्ब्यतामक्षरदिव्यवाणी' 'श्रयत विश्वशुभङ्करसंस्कृतम्' इत्यादयो लिखिताः कविता न केवलं कवेः संस्कृताभिमानं प्रथयन्ति अपि तु संस्कृतभाषावरेण्यत्वं प्रस्थापयन्ति उद्घोषयन्ति निदर्शयन्ति च । 'भीषण दुर्भिक्षम्' 'सन्नागरा एव यथार्थराष्ट्रम्' इमे रचने यथा परिस्थितिचित्रं साधयन्ति तथैव आदर्शं पुरस्कुर्वन्ति । 'कर्मगतिर्विचित्रा' 'धर्मतत्त्वसमीक्षा' चिकित्सायुते रचने न केवलमन्धश्रद्धावादिन्यौ ।

वृत्तसंयोजनं कविना साधु साधितं; भवतु सा शिखरिणी वा मन्दाक्रान्ता वा उपजातिर्वा, न कुत्रापि क्लिष्टता न अरुचिकारिका शब्दयोजना न सन्दिग्धता वा । कवेराशयो निश्चितः स्पष्टतया मण्डितः ।

सर्वकवितानामधो रचनाकालो निर्दिष्टः । तेन ज्ञायते यदस्मिन्ग्रन्थे १९६४ ख्रिस्ताब्दतो रचनाः सङ्कलिताः । क्वचिद्रचनाकालनिर्देशो न कृतः यथा 'भो देश भक्तोत्तमाः' 'इन्दिराहौतात्म्य'मित्यादिषु । १९८६ वर्षे रचितं 'आनात्मवादः खलु दुःखमूलम्' कविता कविमानसं विशदयति । आधुनिकाना-नाचारहेतुरस्मत्तत्त्वज्ञानपराङ्मुखतेति तेन गीतम् । तस्मिन्नेव वर्षे रचितं 'विना तेन मानुष्यजन्मैव मोघम्' काव्यमपि प्राचीनतत्त्वज्ञानमनुवदति ।

एवं पुरातनाधुनिकसमन्वयोऽयं काव्योन्मेषो रसिकान् विचारवतस्तोषयेत् इति कामये । (ग्रन्थारम्भे)

---

२. काव्योन्मेषः (संस्कृतकाव्यसंग्रहः) प्रणेता—प्रा० हरिश्चन्द्रो रेणापुरकरः प्रकाशकः—भारतीयविद्याभवनम् मुम्बापुरी (मुम्बई)-७ । प्रथमं संस्करणम् १९८९ । आकार : डिमाई । पृष्ठसंख्या १८+२००=२१८ मूल्यम् रु० २९-००

जीवनमुक्तकम्[1]

(डा० रमाकान्त शुक्लः, आर ६ वाणी-विहारः, नयी दिल्ली ११००५९)

कविमनीषिणो डा० शंकरदेव 'अवतरे' महोदयस्य सहजातकाव्यप्रतिभायाः यशःप्रसृतिर्नाधुना कामप्यभ्यर्थनामपेक्षते। यथा पारदर्शिनीः काव्यशास्त्र-प्रतिपत्तीरयं विचक्षणणोऽधिकरोति तथैव तस्मिन्नुच्छ्रायसौन्दर्यगुणं कवित्वं शीर्षस्थितिमधिरोहमाणं प्रतीयते। १९८६ तमे ईशवीयेऽब्दे तस्य 'नारीगीतम्' नाम विशालकायं काव्यमुत्तरप्रदेशसंस्कृत-अकादमीद्वारा पुरस्कृतं सत् नैकासु विद्वद्गोष्ठीषु सामान्येतरं सभाजनं समर्जयामास। 'नारीगीतम्' हि नारीजात्याः समष्टिजीवनं चित्रयत् तस्या विराट्रूपं समुज्जागरयति। नारीविषये न किम-प्यवशिष्यतेऽस्मिन् बृहत्काव्ये। 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' इति महाभारतोक्तिर्विषयभेदेन नारीगीतेऽपि संगच्छेत। कविना स्वयमेव पद्यमय्यां भूमिकायामेतत् प्रकारान्तरेण निगमितम् :—

आत्मीया प्रकृतिर्नारी पुरुषस्य यदुच्यते।
तदात्मानं संस्तुवता नारीगीतं विधीयते॥

साम्प्रतं केषांचिद् विश्वविद्यालयानां संस्कृतविभागेषु 'नारीगीतम्' सतत-गवेषणायां तिष्ठति। शोधच्छात्रा यावन्नारीगीते शोधकार्यं कर्तुं प्रारब्धवन्त-स्तावत् 'जीवनमुक्तकम्' नाम द्वितीया काव्यकृतिः कवे'रवतरे' महाभागस्य प्रकाशिता सती ज्ञानगरिष्ठानामपि सहृदयानां रसाजीर्णतामिवादधती समुदिता समुल्लसति। यथा नारीगीतं संस्कृतसाहित्ये 'प्रसिद्धप्रस्थानव्यतिरेकिणी' कृतिरिति बहुभिः संस्कृतसाहित्याचार्यैः प्रमाणीकृता तथा जीवनमुक्तकमपि नीतिकाव्यानां परम्परातः स्वकीयं प्रस्थान-भेदं प्रथयति।

---

१. जीवनमुक्तकम्। प्रणेता—डा० शंकरदेव अवतरे। प्रकाशकः साहित्य सहकारः ई १०/४ कृष्णनगरम्, दिल्ली-११००५१। संस्करणम्-प्रथमम् १९८९। आकार डिमाई। पृष्ठसंख्या ३०८। मूल्यम् ४२.०० रूप्यकाणि।

जीवनमुक्तकं नाम काव्यं मानवताया नैतिकमूल्यानां सीमान्तोपलब्धि कारयद् व्यवहार-पूतं नूतनमेव जीवनदर्शनं समुद्भावयति। एतेन जीवनमुक्तकं न केवलं चाणक्य-विदुर-भर्तृहरिप्रभृतीनां नीतिकाव्यपरम्परायां पतति, अपितु मोक्षपदादपि परां समष्टिमानवोन्मुखवर्त्तिनीं कांचिददृष्टपूर्वी दिशां लक्षयति। मंगलाचरणस्य प्रयोजनीयतां प्रकटयता प्रथमेनैव पद्येनैतत् सम्यक् संसूच्यते तावत् :—

न विघ्नव्यावृत्त्यै न शुभगतये नात्मरतये
न लोकाचारार्थं बहुविधमिदं मंगलवचः
अपीयं मे भक्तिर्विविधजननिष्ठादरकृते
ममास्था सर्वास्थाप्रतिनिधिसमष्टिं प्रणमति-१

इत्यतो न मंगलाचरणमपि कवेः स्वार्थ-निघ्नम्, अपितु समष्टिमानवस्य लोकोत्तरां निष्ठां प्रति समर्पितं सत् विश्वकल्याणभाजनं तत् समपद्यत।

इन्द्रियाणां नियन्त्रणेन, विषयाणां परित्यागेन वा न तत्त्वतो जीवन्मुक्तिः सम्भाव्यते। सा तु वाह्याभ्यन्तरप्रपञ्चासक्तस्य जीवनस्य संशोधनेनैव संजायते। इन्द्रियाणां विषयेषु प्रवृत्तयः सजन्मानः सन्त्यो दुर्निवारा एव, अतः सुधीभिस्तादृश्यः प्रवृत्तयः सत्त्वार्थे परार्थे वा प्रयोजनीया भवन्ति। अयमेव जीवनमुक्तकस्य मौलिक प्रस्थानभेदो यत्र व्यष्टेः स्वयमर्जितो विश्वासः शनैः शनैरसंख्यातेषु जीवनप्रयोगेषु प्रसरन् न केवलं स्वर्गम्, अपितु मोक्षपदमपि स्वार्थ-मितं प्रमाणयन् स्वात्मतादात्म्यदर्शनात् समष्टि-संज्ञितं ईशपदं किंवा ईशसंज्ञितं समष्टिपदं प्रत्यक्षीकरोति :

समष्टिरीशः सर्वेषां स्वात्मतादात्म्यदर्शनात्
तदभावात् तदन्ये तु ज्ञायन्ते व्यष्टिसंज्ञया (पंचदशी)

जीवनमुक्तकस्य कविर्वाह्याभ्यन्तरजीवनप्रयोगाणां परिणतौ तादृशं समष्टिदर्शनं कृतवानिति अन्तःसाक्ष्यं प्रस्तूयते—

न याचे स्वर्लोकं नियमयति यः सावधि सुखम्
न मुक्तावुत्तिष्ठे निभृतनिजकल्याणसजुषि
ममास्था मानुष्ये भवतु भवसंघर्षसुखिनः
मदीयं कारुण्यं परिचयतु सृष्टेः कणकणम्-३६९

व्यवहारोपयोगि जीवनं हि जीवनस्य सर्वोच्चकला संप्रधार्यते। भोगविलासेष्वाकण्ठमज्जनेन शुष्कपर्णभक्षणेन वा नैषा कला प्रापणीया भवति। उन्मुक्त-

वृत्तयो जीवनं पंकिलं विदधति, अत्यन्तवर्जनासु च जीवनं शुष्कमिवोपजायते। सर्वास्वपि दशासु सन्तुलनमेव जीवनस्य परमं साफल्यम्। भुक्तानि सुखानि दुःखपरिणामानि; दुःखान्यपि च तथा भोग्यानि यथा स्वयमेव तानि निष्प्रभावाणि जायन्ताम्। एतादृक् सन्तुलनमेव मनुष्यं कूटस्थतां प्रापयति। अयमेव जीवन्मुक्तेः प्रकारो जीवनमुक्तकस्य संदेशः, यः प्रौढपरिणतौ ग्रन्थस्य प्रतिपाद्यफलं निगमयति। एतामेव पद्धतिमुद्दिश्य जीवनमुक्तकस्य कविः स्वपाठकेभ्यो यात्रानिर्देशं प्रददाति :—

> कुरु स्वान्तःपूतं शृणु सकललोकानवहितः
> मनस्कारादन्यत् परिहर नमस्कारविधिना
> अभावे भावे वा भव समरसश्चिन्तनबलात्
> सुखं वा दुःखं वा द्वयमपि विचारेण जहिहि ३५२

पूर्वं नारीगीतमालोचमानैर्विद्वद्भिः स्वीकृतम्, यत् संस्कृतसाहित्ये नारीगीतं पण्डितराजसदृशीं काव्यत्वप्रौढिं स्पृशति। तदव्यवहितमेव प्रकाशितं जीवनमुक्तकं तद्धारणामेव निःसंशयं द्रढयति। अपृथग्यत्ननिर्वर्त्यैरभिव्यक्तिप्रकारैः स्वयमर्जितैश्चानुभूतिव्यतिकरैः कवेः 'अवतरे' महोदयस्य सहजा कवित्वशक्तिः स्वयमेव सिध्यति। अन्तःसाक्ष्यमपि तदर्थं गृह्यताम् —

> विचारलेशाननुभूतियोनीन् शब्देषु बद्ध्वा स्वयमुत्थितेषु
> आत्मानुरूपोदयसृष्टितुष्टः स्वाभाविकोच्छ्वास इवास्मि मुक्तः ३७१

यथा 'नारीगीतम्' अवतरेमहोदयस्याभूतपूर्वं काव्यम्, इति सहृदयैः निर्णीतम्, तथैव जीवनमुक्तकं नाम काव्यकृतिरपि तस्य निरुपमैव सम्प्रति प्रतिभाति प्रतिभावताम्। स्वागतं जीवनमुक्तकाय अभिनन्दनं च तत्कर्त्रे व्याहरामः!

❀

"भाति मे भारतं" वीक्ष्य

'भाति मे भारतम्' इति कार्यक्रममवलम्ब्य सहस्रशो दर्शकाः स्वविचारैः परामर्शैश्च दूरदर्शनाधिकारिणः कार्यक्रमप्रणेतृनिर्देष्टारं च पर्यचिन्वन्। अधस्तात् केचन विचाराः परामर्शाश्च अंशतः प्रस्तूयन्ते :—

डा० रमाकान्त जी एक कवि ही नहीं, एक कला संगम हैं। इस वृत्तचित्र "भाति मे भारतम" में इनके निदेशक, कलाकार, गायक, चित्रकार इत्यादि अनेक स्वरूप दिखाई देते हैं।

—डा० करुणापति त्रिपाठी

अध्यक्ष, उत्तर प्रदेश संस्कृत अकादमी, लखनऊ

तथा प्राक्तन कुलपति, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी

देश की प्राचीनतम भाषा में आधुनिक भारत का यह गौरवगान अपने आप में एक चमत्कार है। इससे जहाँ एक ओर देववाणी का प्रसार हो रहा है, वहाँ भारत के वैभव के गीत जन-मानस में गूँजने लगे हैं। इस अनूठे प्रशस्तिकाव्य के रचयिता निश्चय ही साधुवाद के पात्र हैं।

—डा० नगेन्द्र

२३४ वैशाली, दिल्ली-११००३४

ऊर्जस्वलसंस्कृतकवेः डा० रमाकान्तशुक्लस्य 'भाति मे भारतम्' इत्येतत्काव्यं विगतदशवर्षेषु दिल्ली-वाराणसी-प्रयाग-जयपुर-भरतपुर-फिलाडेल्फिया (अमेरिका)-प्रभृतिस्थानेषु समायोजितेषु संस्कृत-कविसम्मेलनेषु मया तन्मुखेनैव नैकवारं श्रुतम्। अस्य काव्यस्य पुनरुक्तिः प्रतिवारं काञ्चिन्नवनूतनां स्फूर्तिं कञ्चिदनिर्वचनीयं चानन्दं जनयति।

१९९० तमेशवीयेऽब्दे जनवरीतोऽप्रेलमासं यावद् दूरदर्शनस्य प्रातःकालीन-राष्ट्रियप्रसारणे धारावाहिकरूपेण प्रस्तुतस्यास्य काव्यस्य नव भागाः प्रदर्शिता जाताः। दशमस्य भागस्य प्रदर्शनमवशिष्यते। मया तु दशापि भागाः देववाणी-परिषदा पण्डितराजमहोत्सवावसरे १४.१०.१९८९ ई० तारिकायां समायोजितायाम् एकस्यां पूर्वावलोकन-गोष्ठ्यामवलोकिताः। अत्र कार्यक्रमे न केवलं

मयैव अपितु नैकैर्मम सुहृद्भिः, कुलपतिभिः संस्कृतानुरागिभिश्च काचिन्नूतनैव विच्छित्तिरनुभूता। साहित्य-संगीत-कलानां माधुर्यौजःप्रसादानां च सङ्गमोऽयं कार्यक्रमः कोटिशः सहृदयान् रञ्जयितुम् अरसिकांश्च रसिकीकर्तुं सर्वथा प्रभुः। अत्र कवेः शुक्लस्य राष्ट्रविश्रुता स्वरलहरी स्व नैसर्गिकं गरिमाणं न मनागपि जहाति, अथ च सा सामूहिकस्वरेषु ध्रुवकसम्पर्काद् रमणीयतरा संवृत्ता। शुद्धं संस्कृतोच्चारणं, कवयितुरेव स्वरः, सहगायक-गायिकानां स्वरसंवादः, संगीतविधानं, चित्रांकनं, दृश्यमिश्रणं, शीर्षक-रचना, पद्यानां संकलनक्रमः —इत्यादि सर्वमेव सम्मिल्य पञ्चमिनटात्मके एव काले असंस्कृतज्ञस्यापि जनस्य चित्ते संस्कृतं भारतं च प्रति दृढमनुरागं सञ्चारयति, का कथा पुनः संस्कृतज्ञानां सहृदयानाम्। देशस्य अखण्डताया दृढीकरणार्थं 'भाति मे भारतम्' अनितरसाधारणीं भूमिकां निर्वहति। संस्कृतस्य चिरन्तनयौवनं प्रदर्शन्नयं कार्यक्रमो न केवलं कवेर्यशो वर्धयति, दूरदर्शनस्य गरिमाणमपि प्रथयति।

संस्कृत-भारत्या भारतीयतायाश्च सपर्यां कुर्वाणस्याद्भुतस्यास्य कार्यक्रमस्य प्रसारणं यदि सायंकालीने प्रसारणे, विद्यालय-प्रसारणे, विश्वविद्यालय-प्रसारणे, बाल-कार्यक्रमे, मध्याह्नप्रसारणे च क्रियेत तर्हि नूनमेव देववाण्याः सजीवघोषोऽयं सकलदेशवासिनां मनांस्यावर्जयितुं संस्कर्तुं च प्रभवेत्।

धारावाहिकस्य प्रणेता निर्देष्टा च श्री शुक्लः सपरिकरः साधुवादानर्हति। दूरदर्शनं चैतादृशानन्यानपि कार्यक्रमान् निर्मातुं पौनःपुन्येन प्रदर्शयितुं चार्हति।

—डा० मण्डन मिश्रः

कुलपतिः

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नयी दिल्ली-११००१६

भव्यं राष्ट्रियं गीतम्, विशेषेण यूनां प्रेरणाप्रदम्। कवित्वस्य, संगीतस्य च रमणीयः समन्वयः।

—डा० रामकरण शर्मा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्राक्तनकुलपतिः

६३ विज्ञान-विहारः, दिल्ली ११००९२

"आपको इस महत्त्वपूर्ण उपलब्धि के लिए शत शत बधाई! भगवान् आपको और अधिक यशस्वी तथा प्रभावशाली बनावें।

प्रो० रेवाप्रसाद द्विवेदी

सी/२ जोधपुर कालोनी, काशी हिन्दू विश्वविद्यालय, वाराणसी-५

'भाति मे भारतम्' के प्रसारण देखे। आपने अपनी मधुर गम्भीर गिरा से देववाणी के सागर में स्नान तो कराया ही है, साथ में दुर्लभ भारत दर्शन भी करा दिया है। आपने तो वस्तुतः इस योजना से संस्कृत को जीवनदान दे दिया है। इस बार (३१.३.१९९० ई.) के प्रदर्शन में विभिन्न भाषा के लिप्यात्मक प्रतीकों के माध्यम से जो प्रदेशों का संकेत दिया था वह वस्तुतः आपकी बौद्धिक उर्वरता का ज्वलन्त प्रमाण था। कविता में अभिव्यक्त भावों को रूपायित करने में जो श्रम किया गया है तथा उससे कवितापाठ में जो जीवन्तता आ गयी है उसकी जितनी प्रशंसा की जाय, कम है।

आपकी घन गम्भीर ओजस्विनी गिरा को सुनकर तो एकदम प्रातः स्मरणीय पूज्यपाद आचार्य जी[1] की वाणी का साक्षात्कार होने लगता है। मैं तो कुछ क्षणों के लिए उसी में लीन हो जाता हूँ। जी करता है, पाठ चलता रहे और मैं सुनता रहूँ। इसके साथ अतीत के अनेक क्षण व अवसर पुनरुज्जीवित हो उठते हैं। माँ सरस्वती का यह वरद पुत्र यशस्वी हो और अपनी देवगिरा से विश्व के संस्कृत प्रेमियों को आप्लावित करता रहे, यही कामना करता हूँ।

—डा० देवीदत्त शर्मा
प्राक्तन संस्कृत-विभागाध्यक्ष, पंजाब वि.वि
सम्प्रति प्रोफेसर एमरिटस (यू.जी.सी.)
डी. ९४, कुरुक्षेत्र विश्वविद्यालय परिसर, कुरुक्षेत्र १३२११९

'भाति मे भारतम्' की पंक्तियाँ अभी भी गूँजती हैं।

—डा० मारुतिनन्दन पाठक
संस्कृत-विभाग, मगध विश्वविद्यालय,
बोधगया, गया (बिहार)

---

१. स्व० आचार्य श्री ब्रह्मानन्द शुक्ल—डा० शर्मा के गुरु तथा रमाकान्त शुक्ल के पिता जी।

दृष्टमस्माभिः डा० रमाकान्त शुक्लेन दूरदर्शनाय निर्मितं दशोपाख्यान-समन्वितं 'भाति मे भारतम्' नामकं चित्रम् । इदं दृश्यश्रव्यं वस्तु निश्चित-मेवास्माकं मोदाय जातम् ।

'भाति मे भारतम्' इति काव्यं तु डा० रमाकान्त शुक्लेन अष्टाधिकशतेन पद्यैर्विनिर्मितम् । तेषु पद्येषु राष्ट्रियभावनाभरितानि षट्पञ्चाशत्पद्यानि गृहीत्वा दूरदर्शनचित्रमिदं निर्मितम् । पद्येषु अभूतपूर्वं रामणीयकं परिलक्ष्यते । काव्ये भारतस्य प्राचीनसंस्कृतेः, भारतीयभूगोलस्य, स्वातन्त्र्योत्तरकाले कृतस्य विकासस्य, भारतीयानां विचारसरणेश्च कवित्वपूर्णं वर्णनमुपलभ्यते । चित्रे च पद्यानुसारिणी दृश्यपरिकल्पना च विलक्षणेव ।

इदानीमेव भारते रक्तपातं विनैव सत्ता-परिवर्तनं जातम् । तस्मिन् विषये कवेरेकं पद्यमुद्धरामि—

रक्तपातं विना शस्त्रपातं विना यत्र सङ्क्रान्तिरायाति मन्दस्मिता ।
येन विश्वं सदा शिक्ष्यते प्रेर्यते भूतले भाति तन्मामकं भारतम् ॥

अस्माकं वैदेशिकनीतेरपि सुन्दरतया वर्णनं कृतं कविना—

यत्र सत्यं शिवं सुन्दरं राजते रामराज्यं च यत्राभवत्पावनम् ।
यस्य ताटस्थ्यनीतिः प्रसिद्धिं गता भूतले भाति तन्मामकं भारतम् ॥

ईदृशानि बहूनि मनोहराणि वर्णनानि तत्र वर्तन्ते ।

अन्ते च केवलमिदमेव कामयामहे यदस्य काव्यस्य रचयिता दूरदर्शनचित्र-निर्माता च डा० रमाकान्त शुक्लः संस्कृतसेवायै चिरं जीवतात् ।

—डा० रमेशचन्द्र रस्तोगी, आइ० ए० एस०
निदेशकः, उत्तर प्रदेश संस्कृत अकादमी, लखनऊ

यह वस्तुतः मेरा परम सौभाग्य था कि मुझे 'भाति मे भारतम्' के दशों खण्ड देखने को मिले । भारत के समुचित दर्शन, चाहे वह प्राचीन भारत हो चाहे अर्वाचीन भारत, चाहे वर्तमान में चल रहा भारत हो, ऐसा सुन्दर, बोधपूर्ण और लासमय दर्शन वस्तुतः प्रेरणास्पद हैं ।···मैं इस विचार से सहमत

हूँ कि ८.३६ पर प्रातःकाल इसका जो प्रसारण है वह ऐसे समय हैं जबकि या तो कुछ लोग दफ्तर जा चुके होते हैं अथवा जाने की तैयारी में होते हैं। जो बोधपूर्ण छात्र हैं, वे भी उस समय स्कूल जाने की तैयारी मे होते हैं; अतः उस समय वे सचमुच समय नहीं दे पायेंगे। और जो इसकी सार्थकता है, जो इसकी सम्प्रेषणीयता है, वह यदि बोधपूर्ण छात्रों तक, बोधपूर्ण व्यक्तियों तक नहीं पहुंच पाये तो यह अपने उद्देश्य में अधूरा रहेगा। मैं हृदय से भरपूर संस्तुति करता हूँ कि इसका प्रसारण कुछ ऐसे समय से हो जो कि सबके लिए सुलभ हो। संस्कृत भाषा के नाम से जो लोग समझते है कि यह प्रदर्शन या प्रसारण बड़ा कठिन होगा वे इसके दर्शन मात्र से ही समझ जायेंगे कि यह कतई कठिन नहीं। पुनश्च जो उस लासमयी कविता के साथ साथ दृश्यांकन है, वह तो भरपूर आनन्द देता है; भरपूर बोध देता है; भरपूर ज्ञान देता है। मैं एक बार पुनः यह कामना करूँगा कि दूरदर्शन इसे ऐसे समय प्रसारित करे, सायंकाल आठ और नौ बजे के बीच ताकि इसके उद्देश्य को पूरी सार्थकता मिले।

यह एक और दृष्टि से भी सम्भव हो सकता है। अगर दिल्ली केन्द्र से अखिल भारतीय प्रसारण, समय की कमी या और किसी कारण से, संभव न हो तो प्रान्तीय स्टेशनों के निदेशकों के पास इसे भेज दिया जाय। यदि वे अपने समय में ७.३० और ८.०० बजे रात्रि के बीच इसे दिखा देते हैं और उस भाषा-विशेष या बोली-विशेष में इसके विषय में भूमिकापूर्ण टिप्पणी दे देते हैं तो भी बड़ा अच्छा रहेगा। कम से कम लोग यह जान तो जायेंगे कि संस्कृत हमारी जीवन्त भाषा है, आज की भाषा है और इसके माध्यम से हम आज की वैज्ञानिकता भी कह और समझ सकते हैं। मैं आज यहाँ आकर वस्तुतः बड़ा कृत पुण्य हुआ और मेरी कामना है कि देववाणी-परिषद्, इसी तरह उत्तरोत्तर वृद्धि को प्राप्त होती रहे और लोक कल्याण का कार्य करती रहे।

—हरिमाधव शरण, आइ.ए.एस.
उत्तर प्रदेश शासन, नियोजन विभाग में
संयुक्त सचिव, लखनऊ

'I saw 'भाति मे भारतम्' on T.V. on 24.3.90 at 8.36 A.M. It is a laudable effort. More time is required for each picture and the song to be repeated. Perhaps 5 minuts are not enough.

—S.B. Velankar
Chief Editor, Girvan Sudha
Devavani Mandiram, A G. Street, Bombay-400004

भवदीयं भाति मे भारतं वयमत्र पश्याम:। बहु सुन्दरं चारुतरं मनोहरं चास्ति। अभिनन्दनं स्वीक्रियताम्।

—प्रा० हरिश्चन्द्र रेणापुरकर:

साहू बिल्डिग, ऐवान शाही रोड, गुलबर्गा (कर्णाटक)

'Glory of ascendency of Post Independene India'—इत्येतेषु शब्देषु टी.व्ही. माध्यमेन बहुतराम् सुष्ठुतराम्-वर्णितं 'भाति मे भारतम्' इति भवदीयं दिव्यं काव्यं वाचयितुं महती स्पृहाऽनेन टी.वी. कार्यक्रमेण मदीयचेतसि सञ्चारितास्ति। न तावत् मार्च-मासात्पूर्वा: कार्यक्रमा: मया संदृष्टा सन्ति। किन्तु तथापि मार्च १० दिनाङ्के यत्प्रेक्षणं कृतम् तन्न किमपि फलदायि इति न कदापि मन्ये। भाखडाबन्ध: बाणगंगा, फरक्का, भिलाई, बुकारो, तैलसंशोधन्य:—इत्यादय: भारतप्रगतेरालेखा नितरां पुर:सरदृष्टि-सरणि सन्दर्शयन्ति। न केवलं लौहनिष्पादन्य:, अपितु 'आर्यभट्टा:' अपि भारतस्य मे सत्यं सन्ति नागरिका:। एतैरुल्लेखै: स्वातन्त्र्यादनन्तरं ये भारतीयसंस्कृतेराधुनिकतमा यन्त्रपुष्टीनाम् आयामा: स्पष्टतामिता:, 'तैश्च या यान्त्रिकी संस्कृति: साकं पुरासंस्कृत्या भारतातमन्यानीता तेषां श्रवणेन दर्शनेन च टी.व्ही. धन्य इव संजातोऽस्ति। अस्मिन्काव्ये यद् देशभक्तिप्रदर्शनं तदविना-कृत्यैव काव्यात्मतां नूनं चेत:प्रह्लादि सम्पन्नमिति मे मतम्। किन्तु काव्यमिदं यद्यपि भावनाशबलम् desultory प्रतिभाति तथापि न सुन्दरमिति न। किं ब्रूम:, शिवराज्योदयमपि यद्यपि राष्ट्रीयभावनां प्रजागरयति, तथापि तत्र काव्यप्रसार: अधिकत्वेन सुस्पष्टविभक्त: प्रतिभाति। काव्यं सुन्दरमेव स्यात्, तद्वाचयितुं समीहे। किं न तस्यैकां कापीं मां प्रेषयिष्यति भवान्?

भवदीय:

—डा० प्रकाश पाण्डे

'अहल्या' दत्तमन्दिर-सविधे, कर्वेनगरम्, वर्धा रोड, नागपुरम्

"भाति मे भारतम्" के प्रसारण को देखकर हृदय प्रफुल्लित है। आप आपका मेघगंभीर कण्ठ, आपका काव्य तथा आपका निर्देशन साधुवादार्ह है।

डा० पुष्पा दीक्षित

संस्कृत-विभागाध्यक्षा,

शासकीय कन्या यहाविद्यालय, बिलासपुर (म. प्र.)

Sanskrit programmes like "Bhati me Bharatam" must be telecast as oftener as possible alover India as these are the most suitable vehicles for National Integration as well as spread of Sanskrit language and literature.

Dr. Dipak Ghosh
Reader in Saskirt, University Colleg of Art & Commerce
Calcutta University, Ashutosh Building, Calcutta

...सम्पूर्ण भारतवर्ष में शंखनाद ध्वनि के साथ इस धारावाहिक की सराहना की गयी। वास्तव में दूरदर्शन द्वारा प्रसारित संस्कृत भाषा के समस्त कार्यक्रमों में 'भाति मे भारतम्' सर्वाधिक रुचिकर, प्रेरणाप्रद तथा प्रभावपूर्ण था। निःसन्देह इस सफल प्रयास के पीछे सहयोगी गायक, गायिका, संगीतकार, सम्पादक आदि की भूमिका को नकारा नहीं जा सकता, परन्तु धारावाहिक की सफलता का सर्वाधिक श्रेय काव्य के प्रणेता और धारावाहिक के निर्देष्टा डा० रमाकान्त शुक्ल को जाता है।

'भाति मे भारतम्' काव्य भारत राष्ट्र की विशेषताओं का वर्णन करके भारतीयों के आत्मनिष्ठ, राष्ट्रभावों को प्रदीप्त करने का एक माध्यम है। ...इस काव्य में भारतीय संस्कृति की धरोहर धार्मिक ग्रन्थ, तीर्थ, दर्शनीय स्थल, ज्ञान-विज्ञान तथा भारत की संपदा का विशद विश्लेषण है।

भारत में 'अनेकता में एकता' है। इसकी अभिव्यक्ति धारावाहिक भाग एक के ५ वें पद (वेशभूषाशनो...) में हुई हैं। ...राष्ट्रीय भावना की अभिव्यक्ति के साथ कवि ने राष्ट्र की विश्वबन्धुत्व की भावना को प्रकट करके अन्तर्राष्ट्रीय भावना को भी उजागर किया है (द्र० धारावाहिक भाग-१, पद सं १)। ...भक्ति, देशप्रेम व संगीत के सम्मिश्रण के साथ दूरदर्शन पर प्रसारित यह रचना और अधिक हृदयग्राही हो गयी है।

—दीनदयाल चतुर्वेदी प्राध्यापक, अर्थशास्त्र-विभाग,
श्री गुरु गोविन्द सिंह महाविद्यालय, पीतमपुरा, दिल्ली ११००३४.

महदानन्दसन्दोहभरितेन श्रीमता सम्पादितं प्रतिशनिवासरं प्रभाते "भाति मे भारतम्" इति भारतीयसंकृतिसमञ्जितं वैदुष्यपूर्णं सुरभारतीकलेवरं दृष्टिमुपगतम्। एतदर्थं श्रीमतां सुरभारतीप्रयोगः सुतरां संस्कृतच्छात्रैरध्यापकैश्चाभिनन्दितोऽत्र। प्रयासः श्लाघ्यः।

अत्र कश्चित्खेदोऽप्यनुभूतोऽस्माभिर्यत् या संस्कृतभाषा समग्रभारते विस्तृता, प्रतिभाषासु च सम्पृक्ता, तस्यै केवलं पञ्चपलात्मकः प्रसारणावसरो दूरदर्शनेन दत्तः। आशास्महे आगामिषु दिवसेषु इतोऽप्यधिकतरसमयास्पदं कल्पं प्रसारयिष्यति दूरदर्शनम्। अद्यावश्यकता वर्तते आधुनिकपरिवेशे संस्कृतस्यापि नूतनतरप्रयोगविभवस्य।

—डा० विश्वम्भर मिश्रः 'वागीशः'
साहित्य-विभागः, श्यामाचरण संस्कृतविद्यापीठम्, बौंसी,
मन्दारः, भागलपुरम् (बिहार)

यह तो स्पष्ट है कि 'भाति मे भारतम्' प्रसारण आधुनिक स्वतन्त्र भारत के यशोगान की गाथा हैं। इस प्रकार के देशभक्तिपूर्ण काव्य को शासकीय शिक्षण संस्थओं में संस्कृत की पाठ्य पुस्तकों में स्थान प्राप्त होना चाहिए। अतः निवेदन है कि आप मेरे इस सुझाव को प्रसारित कर केन्द्रीय और प्रादेशिक सरकारों के शिक्षाविभागों का ध्यान इस ओर आकृष्ट करें।

—विश्वनाथ शास्त्री
२-बी/५१, सेक्टर ८, भिलाई (म. प्र.)

दिल्ली दूरदर्शन प्रत्येक शनिवार को सुबह ८ बजकर ३६ मिनट पर 'भाति मे भारतम्' नामक एक कार्यक्रम दिखा रहा है। संस्कृत भाषा में निर्मित यह कार्यक्रम एक अनूठा प्रयोग है। यह एक ऐसे देशभक्त कवि का प्रेरक स्वर है जिसके मन में जहाँ एक ओर भारत के गरिमामंडित अतीत के प्रति प्रबल अनुराग भरा है तो दूसरी ओर उसके उपलब्धिपूर्ण वर्तमान और मंगलमय भविष्य के प्रति गहरी आस्था भी विद्यमान है। इसमें एक साथ इतिहास, कल्पना, दर्शन, साहित्य, संस्कृति, धर्म विज्ञान, प्रकृति आदि तत्त्वों का अद्भुत समन्वय दिखलाई पड़ता है। इसका सबसे बड़ा गुण इसकी तन्मयकारिता और मंत्रमुग्धकारिणी शक्ति है जो बरबस श्रोता या दर्शक का मन अपनी ओर खींच लेती है। इसका सन्देश राष्ट्रीय महत्त्व का है, जिसे उत्तम काव्य, स्वर माधुर्य, चित्ताकर्षक संगीत और कुशल छायांकन ने और अधिक सम्प्रेषणीय तथा प्रभावशाली बना दिया है। इस समयोपयोगी और देशप्रेमपूर्ण कार्यक्रम के राष्ट्रव्यापी प्रसारण के लिए दूरदर्शन बधाई का पात्र है। ...कार्यक्रम-प्रणेता कविवर डा० रमाकान्त शुक्ल ने जिस अनुकरणीय तत्परता, अदम्य उत्साह और अथक परिश्रम के साथ इसका निर्माण किया है, वह निःसन्देह श्लाघनीय है।

इस सम्बंध में मेरा एक सुझाव है। ...यदि दूरदर्शन इसका प्रसारण सायंकालीन राष्ट्रीय कार्यक्रम में हिन्दी समाचारों के ठीक पहले या तत्काल बाद कर सके तो थोड़े समय में ही इसके राष्ट्रोपयोगी संदेश को घर-घर पहुँचाया जा सकता है; तब करोड़ों लोग इसका एक साथ आनन्द ले सकेंगे। आशा है, सम्बन्धित अधिकारीगण ध्यान देगें।

—मुकुल शर्मा, एम ए,
पीएच०डी०-शोधछात्र
सी ५ डी/१६ सी, जनकपुरी, नयी दिल्ली-११००५८

'भाति मे भारतम्' की रचना द्वारा आपने एक महान कार्य किया है। साधुवाद ! आप और आप का व्यक्तित्व मेरे लिए चिर स्मरणीय है।

—डा० लक्ष्मी नारायण अग्रवाल
प्रधान मन्त्री, श्री युगलानन्द शिक्षा समिति, माधवनगर, उज्जैन (म.प्र.)

कई सप्ताह पूर्व जब मैंने टी.वी. सेट खोला तो आपका स्वर गूंजता हुआ कानों तक पहुँचा। ...यह कार्यक्रम बहुत ही सुन्दर लगा। प्रातःकाल अपने देश की महिमा सुन्दर दृश्य और उत्तम वाणी में और वह भी सस्वर सुनकर भला किस भारतीय का हृदय प्रसन्न नहीं होगा।

—राधेश्याम शर्मा
उपसम्पादक, नवभारत टाइम्स, चण्डीगढ़ कार्यलय,
मकान २१४, सेक्टर २२, चण्डीगढ़-१६००२२

"आजकल हर शनिवार को सवेरे ८.३६ बजे दूरदर्शन पर संस्कृत धारावाहिक 'भाति मे भारतम्' दिखाया जा रहा है।

इसमें बड़े मधुर कंठ से सरल संस्कृत में भारत के अतीत और वर्तमान के साथ देश के कर्णधारों, नदियों, पर्वतों, समस्त धर्मों, तीर्थस्थलों के साथ भारत की परंपराओं का यशोगान किया गया है। भारत के विकास कार्यों और वैज्ञानिक सफलताओं की भी झांकी इस कार्यक्रम में मिलती है।

इस अनूठे कार्यक्रम के प्रणेता और निर्देशक संस्कृत और हिन्दी के विद्वान डा० रमाकान्त शुक्ल है।... केवल अपने ही देश का यशोगान करना और अन्य देशों को हीन समझना यह उद्देश्य डाक्टर शुक्ल का नहीं है। 'भाति मे भारतम्' धारावाहिक भी शुरूआत ही उन्होंने समस्त मानव समाज के कल्याण की कामना, पूरे संसार के भाईचारे की भावना से की है।...

'भाति मे भारतम्' धारावाहिक में देश के समस्त धर्मों की झांकी सरल संस्कृत में दृश्यों के साथ इस प्रकार प्रस्तुत की गई है कि उसे समझना कठिन नहीं है। ···हमारे प्राचीन कवियों, धर्मग्रंथों, स्वतंत्रता सग्राम के सेनानियों का भी बड़े सम्मान के साथ उल्लेख इस कार्यक्रम में मिलता है। इसके अतिरिक्त भारतीयों के स्वाभिमान को भी प्रशंसापरक शब्दों में व्यक्त करना नहीं भूला है। इस पवित्र भूमि पर पर आकर बसाने वाले विविध धर्मावलबियों को आत्मसात करने की अपनी क्षमता को भी गौरवपूर्ण स्थान इस धारावाहिक में मिलता है। ······'भाति मे भारतम्' एक सफल प्रयोग है।

—अनन्तराम गौड़

'सान्ध्य टाइम्स', नयी दिल्ली २६.२.१६६०

"भाति मे भारतम्" में भारत देश का आदर्श, प्राकृतिक भौगोलिक छटाओं का स्वरूप, राज्यों की सुषमा और विकासात्मक तत्त्वों को ही आधार बनाया गया है। बड़े ही भावपूर्ण ढग से वाक्यांशों को प्रस्तुत करते हुए इसमें पोखरण में विस्फोट, एशियाड की सफलता, अंतरिक्ष में राकेश शर्मा सहित भारतीय ऋतुओं, मेघमाला, भारतीय नृत्यों विभिन्न प्रान्तों में बसते भारत में मनाए जाने वाले पर्व, उत्सव, त्यौहार आदि को वड़े ही आकर्षक ढंग से प्रस्तुत किया गया है।

—स्निग्धा। दैनिक हिन्दुस्तान, नई दिल्ली

२० फरवरी १६६०

शनिवार को प्रात: संकृत गीतिका 'भाति मे भारतम्' सहज ही एक नया देश भक्ति गीत बन सकता है। दृश्यांकन सुन्दर बने हैं। स्वयं रमाकान्त द्वारा गाये गीत पृष्ठ संगीत के साथ चले तो और भी अच्छे रहे।

—अज़दक

'जनसत्ता'-दिल्ली संस्करण। ११.२.१६६०

The past and present glory of India is depicted in this programme so beautifully that the viewers, not well versed in Sanskrtt too, understand and enjoy the theme of this patriotic Sanskrit Serial.

—R.K. Narula

BH, 585-A, Shalimar Bagh Poorvi, Delhi-110052

'भाति मे भारतम्' की दूरदर्शन-प्रस्तुति को देखकर मन अत्यन्त प्रसन्न हो गया। ऐसा लगा मानो समस्त भारत दृश्य हमारे सामने ही आ गया हो इसमें सम्पूर्ण भारत की प्राकृतिक शोभा, ऐतिहासिक गौरव, धार्मिक सामाजिक रीति-रिवाज़ों तथा पारस्परिक समन्वयशीलता का वर्णन इतनी सरल संस्कृत भाषा मे क्रिया गया है कि प्रत्येक भारतवासी इसे समझ सकता है एवं स्वदेश के गौरव से परिचित हो जाता है। यह कार्यक्रम रचनाकार के हृदय की विशालता, निर्भयता, प्रकृतिप्रेम तथा देशभक्ति का परिचायक है।

—चन्द्रभान शर्मा

भारत सरकार मुद्रणालय, मायापुरी, नई दिल्ली

रम्ये कान्ते काव्यकुञ्जे पिकोऽयम्
कूजन् विज्ञः श्रीरमाकान्तशुक्लः ।
नव्यं स्तुत्यं सत्सुधापानयोग्यम्
काव्यं प्रादात् 'भाति मे भारतम्' यः ॥

—डा० रवीन्द्र नागरः

ए२/४६ राजौरी गार्डन, नयी दिल्ली-११००२७

यज्जिह्वाग्रे काव्यधारा प्रवाति
रम्यैः काव्यैर्यस्य चित्तं समृद्धम् ।
"विद्वान् धीमान् श्रीरमाकान्तशुक्लः"
दीर्घायुष्यं प्राप्नुयाद् भूतलेऽस्मिन् ॥

श्रीमतां विद्वद्वरिष्ठानां कविमल्लानां श्रीशारदाम्बावरदपुत्राणां शुक्लमहाभागानां "भाति मे भारतम्" काव्यं दृष्ट्वा श्रुत्वा च एतेषां पितृपादानांच्छन्दोबद्धवाङ्मयमाधुरीविलसितान्तःकरणानां प्राचीना स्मृतिरपि नवीना जाता। युक्तप्रान्तीयद्वितीयसंस्कृतच्छात्रसम्मेलने(यत्राहं प्रधानस्वागतमन्त्री समासम्) तत्र-मथुरायां यदा ते समागताः खलु खुर्जातस्तदा तैस्साकं स्वकीयसद्मन्येव "सा हि साहित्यरीतिः" इति विषये तेषां स्व०श्रीशुक्लमहाभागानां साहित्यचर्चाचर्चितानां तदेवं मधुरालापयुतं मुखारविन्दमधुनापि स्मृतिपथमागतम्। तल्लक्षीकृत्यैवाहं चिरं गोपालनपण्डितं राधाजानिं श्रीरुक्मिणीवल्लभं श्रीगोकुलेन्दुं प्रार्थयामि किलैते डाक्टरपदवाच्या आशुकवयः श्रीशुक्लमहाभागाः "काव्यसुधाधवलितां श्रीपराम्बां शारदां वीणापुस्तकधारिणीं सुसेवयन्तो वेदोक्तपूर्णापुष्यं प्राप्नुयुः"

(संकलयित्री-वन्दना मिश्रा) याज्ञिकसम्राट् पं० लालनकृष्ण शास्त्री

नागर गली, गोलपाड़ा, मथुरा

देववाणी-परिषद्वार्ता

श्रीगान्धिचरित-समुन्मीलनम्

दिल्ल्यां २६.१.१९९० ई० तारिकायां गणतन्त्रदिवसे दिल्लीविश्वविद्यालयस्य संस्कृत-विभाग आचार्यः, पुरीस्थ-श्रीजगन्नाथसंस्कृतविश्वविद्यालस्य प्राक्तनः कुलपतिः सम्प्रति च थाइदेशस्य बैंकाकनगरे शिल्पाकर-विश्वविद्यालये प्राच्यभाषाविभागेऽभ्यगताचार्यो डा० सत्यव्रतशास्त्रिमहाभागः श्रीचारुदेवशास्त्रिप्रणीतं किञ्च देववाणी-परिषदा पुनः प्रकाशितं 'श्रीगान्धिचरितं' समुन्मीलितवान्। अस्मिन्नवसरे कुरुक्षेत्रविश्वविद्यालयस्य संस्कृत-विभागे प्राध्यापको डा० पतञ्जलिकुमारभाटिया-महाभागोऽप्यभ्यभाषत। ग्रन्थप्रस्तावनाकारेण किञ्च देववाणी-परिषन्महासचिवेन डा० रमाकान्त-शुक्लेन गान्धिपरके संस्कृतवाङ्मये श्रीगान्धिचरितस्य वैशिष्ट्यं रेखांकितम्। अस्मिन्नवसरे 'भाति में भारतम्'- इत्येतत्कार्यक्रमस्य वीडियोफिलमप्रदर्शनमप्यभूत्।

भाति मे भारतम्

'भाति मे भारतम्' इत्येतत्कार्यक्रमस्य नवभागानां प्रसारणं दूरदर्शनस्य प्रात.कालीनसभायां जन. २०, २७, फर्वरी ३, १०, मार्च १०, १७, २४, ३१, अप्रेल १४—इत्येतासु तारिकासु ८.३६ वादनवेलायां प्रातःकाले सञ्जातम्। अवशिष्टस्य दशमस्य भागस्य प्रसारणं २१.४-१९९० ई० तारिकायां सम्भाव्यते।

पुनश्च, ये द्रष्टारः कथञ्चित् दूरदर्शनप्रसारणं द्रष्टुं नाशकन् तेषां सौविध्यार्थं देववाणी-परिषदास्य कार्यक्रमस्य वीडियोफिल्म-प्रदर्शनान्यपि समायोज्यन्त, समायोज्यन्ते च। २६.१.९०, १८.३ ९०, २०.३.९०, २५.३.९०, ३०.३.९०, ३१.३.९० ई० प्रभृतितारिकासु दिल्ली-मेरठ-उज्जैन-होशियारपुरप्रभृतिस्थानेषु ईदृशानि प्रदर्शनानि अभूवन्।

एतानि प्रदर्शनानि कार्यक्रमस्य प्रणेतुः निर्देष्टुश्च डा० रमाकान्तशुक्लस्य सान्निध्ये समायोज्यन्त।

श्रीहरिमाधवशरणस्याभिभाषणम्

उत्तरप्रदेशशासनस्य नियोजनविभागे संयुक्तसचिवः संस्कृतभक्तः आई.ए.अस. अधिकारी श्रीहरिमाधवशरणमहाभागः ८.४.१९९० ई. तारिकायां देववाणी-परिषदायोजिते एकस्मिन् कार्यक्रमे सञ्चारमाध्यमेषु संस्कृतकार्यक्रमाणां अपेक्षितां भूमिकामवलम्ब्य अभ्यभाषत। परिषत्पक्षतः तस्मै अभिनन्दनं व्याहरता परिषन्महासचिवेन डा० रमाकान्त तस्मै 'भाति मे भारतम्' इति कार्यक्रमस्य ध्वन्यंकितपट्टिकोपायनीकृता। 'भाति मे भारतम्' इत्यस्य वीडियोफिल्मप्रदर्शनमप्यभूत्। श्रीहरिमाधवशरणमहाभागेन इमं कार्यक्रमं सायंकालीनराष्ट्रीयप्रसारणेऽपि प्रसारयितुं दूरदर्शनाधिकारिणः प्रचोदिताः। तेनोक्तम्-अस्य कार्यक्रमस्य प्रसारणेनेदं सुस्पष्टं सिद्धयति यत्संस्कृतं वैज्ञानिकतामपि सरलतया बोधयितुं क्षमनमस्ति। परिषत्सहसचिवेन डा० इच्छारामद्विवेदिना धन्यवादज्ञापनं कृतम्।

संस्कृत-जगद्वार्ता

डा० हरिदत्तशर्मणः फ्रांसयात्रा

इलाहाबादविश्वविद्यालय-संस्कृत-प्राध्यापको डा० हरिदत्त शर्मा पेरिस-नगरस्थितस्य ('मैजों द सियाँस दलोम' इत्याख्यस्य) उच्चमानविकीय-संस्थानस्य आमन्त्रणे नयीदिल्लीस्थितस्य विश्वविद्यालयानुदानायोगस्य नामाङ्कने च अतिथि-प्राध्यापकरूपेण जनवरीमासस्य सप्तदशतारिकायां पेरिसनगरं प्रस्थितः। स एकमासं यावत् 'भारत-फ्रांस-सांस्कृतिकादाप्रदान-योजनायां' निर्धारितविषये विशिष्टानुसन्धानकार्यं, विविधविषयेषु सम्भाषणं, फ्रांसीय-संस्कृत-मनीषिभिः सह सम्मेलनमित्यादि कार्यं करिष्यति। तस्य शैक्षणिकी सांस्कृतिकी चेयं यात्रा विश्वमध्ये संस्कृतस्य सम्मानं संवर्धयेत् साफल्यञ्चावाप्नुयादिति काम्यते।

डा० रवीन्द्रनागरस्य अमेरिकायात्रा

देववाणी-परिषदः प्राक्तनसचिवः किञ्च श्रीलालबहादुरशास्त्रिकेन्द्रिय-संस्कृतविद्यापीठे पौरोहित्यकर्मकाण्डविभागाध्यक्ष आचार्यश्रीरवीन्द्रनागर-महाभागः अमेरिकादेशस्य, 'कालबासस' इति स्थाने भारतीयसंस्कृतिप्रचाराय ३.३.१९९० ई. तारिकायां दिल्लीतः प्रस्थितः। तस्य यात्रा सफला स्यात्!

दिल्ली संस्कृत अकादमी

दिल्ली संस्कृत अकादमी १८.१.१९९० तारिकायां 'फिक्की' सभागारे एकमखिलभारतीयं संस्कृतकविसम्मेलनमयोजितम्, यत्र डा० श्रीधर भास्कर वर्णेकर-डा० रेवाप्रसादद्विवेदी-श्रीश्रीनिवासरथ-डा० राजेन्द्र मिश्र-डा० रमाकान्त शुक्ल-डा० हरिराम आचार्य-डा० विष्णुकान्त शुक्ल-श्रीश्रीसुन्दरराज-डा० घनश्याम तिवारी-डा सुधीकान्त भारद्वाज-डा० नित्यानन्द शर्म-प्रभृतयः त्रिंशत्प्रायाः कवयः काव्यपाठं चक्रुः।

'दिल्ली संस्कृत अकादमी' ३१-१-१९९० तथा १-२-१९९० तारिकयोः दिल्लीविश्वविद्यालयस्य संस्कृत-विभागस्य सौजन्येन संस्कृतनाट्य-समारोहमायोजितवती यत्र पञ्चनाटकानां प्रस्तुतिः जानकीदेवी-हिन्दू-मिराण्डाहाउस-इन्द्रप्रस्थ-किरोड़ीमल-महाविद्यालयैः कृता।

अकादम्या २६-२-१९९० तारिकायां संस्कृत-साहित्य-सेवा-सम्मान-समारोहोऽप्यायोज्यत यत्र पं० टी०वी० परमेश्वर अय्यरप्रभृतयो विद्वांसः कवयश्च सत्कृता अक्रियन्त।

कुरुक्षेत्रे संस्कृत-प्रतियोगितायोजनम्

२०–२२.२.१९९० तारिकयोः कुरुक्षेत्रविश्वविद्यालयस्य यूनिवर्सिटी-कालेजे क्षेत्रीय-युवकसमारोहस्यायोजनं सञ्जातम्। अस्मिन्नवसरे २२-२-१९९० तारिकायाम् संस्कृत-भाषणप्रतियोगिता, संस्कृत-नाटक प्रतियोगिता चायोज्याताम्। प्रतियोगिताद्वयस्य-निर्णायकेषु डा० मदनलाल वर्मा डा० रमाकान्त शुक्लश्चास्ताम्। भाषणप्रतियोगितायाः आध्यक्ष्यं प्रोफेसरएमरिटसेन डा० देवीदत्तशर्मणा कृतम्। सञ्चालनं डा० चित्तरञ्जन-कौशलेन कृतम्। समारोहस्य सफलसंयोजनार्थं प्राचार्यो डा० बाँकेलालशर्मा वर्धापनानि अर्हति।

कालिदास-अकादेम्याः 'कल्पवल्ली'-समारोहः

उज्जयिनीस्था कालिदास-अकादेमी १८-२२.३.१९९० ई० तारिकासु उज्जयिन्यां 'कल्पवल्ली'-तिकार्यक्रममायोजितवती यत्र वेदशाखास्वाध्यायः, पेरिणी-शिवताण्डवम्, भारतीयदर्शनेषु प्रामाण्यवादमवलम्ब्य विचारसंगोष्ठी, अमदावादस्थ-संस्कृतसेवासमिति-कृतो 'दूतवाक्य'-प्रयोगः, सुजाताश्रीनिवासकृतं भरतनाट्यम्, संस्कृत-कवि-समवायः, श्रीमत्या सुलोचनाबृहस्पतिमहाभागायाः शास्त्रीयं गायनम्-इत्येतदादिकान्यनुष्ठानानि समायोज्यन्त।

संस्कृतकविसमवायः २१.३.१९९० ई० तारिकायामायोज्यत यस्याध्यक्ष्यं डा० बच्चूलाल अवस्थि-महाभागैः सञ्चालनं च डा० भास्कराचार्यत्रिपाठि-

महाभागै: कृतम् । समवाये डा० राजेन्द्र मिश्र-डा० रमाकान्त शुक्ल-डा० पुष्पा दीक्षित-डा० इच्छाराम द्विवेद-डा० रहसबिहारी द्विवेदी-प्रभृति कवीनां विंशतिर्भागं गृहीतवती । अकादमीसञ्चालक आचार्यश्रीश्रीनिवासरथ: कल्पवल्ल्या: सफलसमायोजनार्थं वर्धाप्यते ।

लोकार्पणम्

२०.३.१९९० ई. तारिकायाम्, उज्जयिन्यां कालिदास-अकादेमीसभागारे 'ग्रन्थ प्रकाशन समिति जैन साहित्य मन्दिर, पालीताणा' इत्येतस्या: संस्थायास्तत्त्वावधाने आचार्यश्रीयशोदेवसूरीश्वरमहाराज प्रणीताया 'उणादिप्रयोगयशस्विनी-मञ्जूषा'या: लोकार्पणसमारोह: आचार्यश्रीश्रीनिवासरथमहाभागानामाध्यक्ष्ये, विक्रमविश्वविद्यालस्य प्राक्तनकुलपतीनां डा० कमलाकर केशव केमकर-महाभागानां मुख्यातिथित्वे तथा च डा० बच्चूलाल अवस्थि-"ज्ञान"-महाभागानां प्रमुखोद्बोधकत्वे सम्पन्न: । समारोहस्य संयोजनं डा० रुद्रदेवत्रिपाठिमहाभागेन कृतम् ।

राजस्थानसंस्कृताकादमी-कविसम्मेलनम्

राजस्थान-संस्कृतम-अकादमी २३.३.१९९० ई. तारिकायां जयपुरे एकमखिलभारतीयं संस्कृतकविसम्मेलनमायोजितवती यस्य सञ्चालनं देवर्षिपंक्कलानाथशास्त्रिमहाभागेन कृतम् । अकादम्यध्यक्षेण कुलपतिना डा० मण्डनमिश्रमहाभागेन कविभ्य: स्वागतं व्याहृतम् । डा० रमाकान्त शुक्ल:, डा० राजेन्द्र मिश्र:, डा० रुद्रदेव त्रिपाठी, डा० दयानन्द भार्गव:, डा० इच्छाराम द्विवेद:, इत्यादय: कवय: स्वरचना: पपठु: ।

होशियारपुरे यास्क-संगोष्ठी

होशियारपुरस्थ - विश्वेश्वरानन्द-विश्वबन्धु - संस्कृत - भारत - भारती-अनुशीलन - संस्थानस्य रजतजयन्ती-महोत्सवे २३ - २५.३.१९९० ई० तारिकासु 'यास्काचार्यो वेदव्याख्या च'-इति विषयमवलम्ब्य राष्ट्रिय-संगोष्ठी समायोज्यत । संगोष्ठ्या उद्घाटनं जयपुरविश्वविद्यालयस्य प्राक्तन-संस्कृतविभागाध्यक्षेण डा० सुधीरकुमारगुप्तमहोदयेन कृतम् । समापन-समारोहस्याध्यक्ष्यम् आकाशवाण्या जालन्धरकेन्द्रस्य निदेशकेन श्रीराजेन्द्र-प्रसादमहाभागेन मुख्यातिथित्वं च प्रख्यातशिक्षाशास्त्रिणा किञ्च दार्शनिकेन डा० आइ० सी० शर्म महाभागेन कृतम् । संस्थानस्य संगोष्ठ्याश्च सञ्चालकेन डा० ब्रजबिहारीचौबे-महाभागेन संस्थानस्य भवियोजनानां परिचयो दत्त: किञ्च देशस्य विभिन्नेभ्यो भागेभ्य आगता विद्वांसो धन्यवादै: सभाजिता । समापनसमारोहे डा० कृष्णमुरारिशर्मणो नेतृत्वे संस्थानस्य

छात्राभिः 'अर्वाचीनसंस्कृते' प्रकाशिताः काश्चन संस्कृतगीतिकाः ससङ्गीतं प्रस्तुताः। अस्मिन्नवसरे डा० रमाकान्तशुक्लस्य काव्यपाठः किञ्च 'भाति मे भारतम्' इत्येतत्कार्यक्रमस्य वीडियोफिल्मप्रदर्शनं चाप्यनुष्ठीयाताम् यदनन्तरं पं० इन्द्रदत्त उनियाल-डा० मथुरादत्तपाण्डेय-महाभागाभ्यां स्वसंस्कृतरचनाः प्रस्तूय डा० शुक्लस्याभिनन्दनं कृतम्। सारस्वतेऽस्मिन्ननुष्ठाने देशस्य नैकैर्विद्वद्भिः सहभागित्वं निर्व्यूढम्।

मेरठ वि०वि० संस्कृतप्राध्यापकपरिषदधिवेशनम्

मेरठविश्वविद्यालयसंस्कृताध्यापकपरिषदः षोडशमधिवेशनं मवानानगरस्थे कृषकमहाविद्यालये २४-२५.३.१९९० तारिकयोः सम्पन्नम्। अधिवेशनस्योद्घाटनं कविवर्यैराचार्यश्रीप्रमुदत्तस्वामिभिः कृतम्। अधिवेशने शोधगोष्ठी, संस्कृतकविगोष्ठी, विचारगोष्ठी, उन्मुक्ताधिवेशनं चायोज्यन्त।

संस्कृताध्यापक-संगोष्ठी

'राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद् दिल्ली' इत्येतया संस्थया नवदिल्ल्यां २६-३१.३.१९९० ई० तारिकासु परास्नातक-संस्कृताध्यापकानां विमर्शसंगोष्ठी आयोजिता। अस्मिन्नवसरे ३०.३.१९९० ई० तारिकायां डा० रमाकान्तशुक्लेन 'संस्कृतनाटकानि', 'छन्दःपरम्पराम्' 'अर्वाचीनसंस्कृतसाहित्यं' चावलम्ब्याभिभाषितम्। समापनसमारोहे ३१.३.१९९० ई० तारिकायां डा० शुक्लस्य काव्यपाठः किञ्च तत्प्रणीतस्य 'भाति मे भारतम्' इत्येत्काव्यस्य वीडियोफिल्मप्रदर्शनं चानुष्ठीयाताम्। संगोष्ठ्याः सञ्चालनं श्रीमत्या शशिप्रभागोयल-महाभागया कृतम्। कार्यक्रमेऽस्मिन् षष्टिप्रायैरध्यापकैः सहभागित्वं निर्व्यूढम्।

अ०भा० प्राच्यविद्यासम्मेलनम्

अखिलभारतीयप्राच्यविद्यासम्मेलनस्य पञ्चत्रिंशत्तममधिवेशनं हरिद्वारस्थे गुरुकुलकांगड़ीविश्वविद्यालये आगामि नवम्बरमासस्य तृतीये सप्ताहे अयोजयिष्यते।

संस्कृत-युवसमवायः

उज्जयिन्यां २०.३.१९९० ई. तारिकायां संस्कृतयुवसमवायस्य तत्त्वावधाने 'भाति मे भारतम्' इत्येतद्वीडियोफिल्मस्य प्रदर्शनमनुष्ठीयत। अस्मिन्नवसरे संस्कृतयुवसमवायस्य मन्त्रिणा श्रीशीतांशुरथमहाभागेन दूरदर्शने संस्कृतकार्यक्रमाणामधिकतरं प्रसारणं कांक्षितम्। तेन संस्थापक्षतः कार्यक्रमप्रणेत्रे डा० रमाकान्तशुक्लायाभिनन्दनं व्याहृतम्। देववाणी-परिषत्सहसचिवेन

डा० इच्छाराम द्विवेदिना अस्य कार्यक्रमस्य अन्येषामपि भागानां निर्माणमाकांक्षितम् ।

विद्वदभिनन्दनम्

२५.३.१९९० ई. तारिकायाम् इन्द्रप्रस्थीयसंस्कृत-परिषदस्तत्त्वावधाने दिल्ल्यां सरस्वती-विहारस्थ-सनातनधर्ममन्दिर-धर्मशालायां दिल्ली-संस्कृत-अकादमी-सम्मानितानां चतुर्णां विदुषामभिनन्दनं समनुष्ठीयत । परिषन्मन्त्रिणा कविरत्नश्रीओमप्रकाशठाकुरमहाभागेन विदुषां परिचयं प्रदाय तेभ्योऽभिनन्दनं व्याहृतम् ।

मध्य प्रदेश संस्कृत अकादेम्या 'एकता-वाक्-संगोष्ठी'

मध्यप्रदेशसंस्कृतअकादम्या आगामिनि जूनमासे १०-११ तारिकयोः अम्बिकापुरे 'एकता' भाषान्तर-कविगोष्ठी, रामगिरिसर्वेक्षण यात्रा-इत्येतदादीन्यनुष्ठानानि अनुष्ठास्यन्ते-इति सूचयति अकादेमीसचिवो डा० भास्कराचार्यः त्रिपाठी ।

डा० भवानीशंकर त्रिवेदी दिवं गतः !

डा० भवानीशंकर त्रिवेदी २५-३-१९९० तारिकायां वाराणस्यां केदारघट्टे 'ॐ नमः शिवाय ॐ ॐ ॐ' इत्युच्चरन् शिवसायुज्यमवाप। ५.४.१९९० ई. तारिकायां तस्मै श्रद्धाञ्जलीन् दातुमेका सभा 'जी-१८ दिलशाद कालोनी, शाहदरा, दिल्ली'— इत्येतस्थाने समायोजिताभून् । स्मरणीयं विद्यते यत् डा० त्रिवेदिना 'मोक्षमूलरवैदुष्यम्' नाम संस्कृतनाटकं अन्ये चानेके ग्रन्थाः प्रणीताः ।

(रमा शुक्ला)

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली ।

२. प्रकाशनकालावधिः—त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति ।

—डा० रमाकान्त शुक्लः

१५-४-१९९० प्रकाशकः, सम्पादकः

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

(१५-४-१९९० तः)

संस्थानां कृते	वार्षिकं (भारते)	रु० 40.00
	वार्षिकं (विदेशेषु)	यू० एस० डालराः 10
	आजीवनं (भारते)	रु० 300.00
	आजीवनं (विदेशेषु)	यू० एस० डालराः 100
व्यक्तीनां कृते	वार्षिकं (भारते)	रु० 25.00
	वार्षिकं (विदेशेषु)	यू० एस० डालराः 10
	आजीवनं (भारते)	रु० 25..00
	आजीवनं (विदेशेषु)	यू० एस० डालराः 100

डाकव्ययः [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]

भारते	: रु० 20.00
विदेशेषु	: यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं 'अर्वाचीनसंस्कृतम्' (Arvacheenasanskritam/*Arvācīnasaṁskṛtam*) इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते।

सम्पादकः

अर्वाचीनसंस्कृतम्

देववाणी-परिषद्, दिल्ली

आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)।

'देववाणी-परिषद, दिल्ली'-कृते डा रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहारः, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१२/२)-प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५.४.१९९०।

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु० ५०.००
२.	श्रीनेहरूवृत्तम (आचार्य रमेशचन्द्र शुक्लः)	रु० १५.००
३.	श्रीपादसप्ततिः(श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
९.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ४०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृतसाहित्य में राष्ट्रिय भावना (डा०हरिनारायण दीक्षित)	रु० १५०.००
१५.	दयानन्दसूक्तिसप्तशती (श्री शिव कुमार मिश्रः)	रु० १५.००
१६.	गान्धिसूक्तिशप्तशती (,, ,,)	रु० १५.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) (,, ,,)	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा०रामकिशोर मिश्रः)	रु० १२.००
२९.	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००
३१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
३२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३३.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
३४.	ऋतम् (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

द्वादशवर्षे तृतीयोऽङ्कः

१५ जुलाई, १९९०

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली–११० ०५९

अर्वाचीनसंस्कृतम् (१२/३)

(R. N. 34554/79)

(१५ जुलाई १९९० ई०)

विषय-सूचिः

	विषयः	लेखकः	पृष्ठांकः
१.	सम्पादकीयम्		१३६
२.	मेघदूतः	श्री ताराशंकर शर्मा	१३९
३.	तिस्रोरचना	डा० परमानन्द शास्त्री	१४१
४.	श्रीजालाललालित्यम्	श्री बटोही झा	१४(
५.	मित्रदूतं	डा० इच्छाराम द्विवेदी 'प्रणव'	१५३
६.	देववाणी-परिषद्वार्ता	रमा शुक्ला	१८५
७.	संस्कृत-जगद्वार्ता	डा० रामेश्वरदत्त शर्मा	१८५

अर्वाचीनसस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली ।

२. प्रकाशनकालावधिः—त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिपद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि, यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति ।

—डा० रमाकान्त शुक्लः
प्रकाशकः, सम्पादकः

१५-७-१९९०

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य द्वादशवर्षीये पद्यमयेऽस्मिन् तृतीयेंऽके डा० परमानन्द-शास्त्रिकृता: 'तिस्रो रचना' श्रीवटोही झा-प्रणीतं 'श्रीलालललित्यं' प्रणवोपाह्व डा० इच्छारामद्विवेदप्रणीतं 'मित्रदूतं' नाम खण्डकाव्यं च प्रकाश्यन्ते ।

डा० हर्षदेवमाधवस्य 'प्रिया' गजलाभिधानं प्रेमगीतं वर्तते ।

डा० परमानन्दशास्त्रिमहाभागानां 'वर्षन्त्यनलं यदि मित्रकरा आकाशः किं कुर्यात्' 'गजलिका' तथा 'सत्यं बन्दीकृतं कन्दरे' इत्येतासु तिसृष्वपि रचनासु साम्प्रतिकनेतॄणां लीला कटाक्षपथमानीता ।

'श्रीलाललालित्यम्' इत्यत्र श्रीवटोही झा-महाभागेन 'धरती का लाल' इति शीर्षकयुते श्रीलालबहादुरशास्त्रिस्मृतिग्रन्थे प्रकाशिता: विविधनेतॄणां विचारा: शार्दूलविक्रीडितवृत्तैः संस्कृते परिवर्तिता. ।

'मित्रदूतम्' इत्यस्मिन् खण्ड काव्ये प्रणवोपनामधारिणा डा० इच्छाराम द्विवेदमहाभागेन दिल्लीतः केदारनाथ-वदरीनाथक्षेत्रं यावत् यात्रामार्गं उपवर्णितः। डा० द्विवेदमहाभागेन अस्मिन् जूनमासे कैश्चित् स्वस्निग्धैर्जनैस्साकं वदरी-नारायणयात्रा कृता । तदनन्तरमेवेदं काव्यं तेन रचितम् । अत्र काव्ये अस्माक-मपि चर्चा विद्यते या हि कवेः स्नेहातिरेकमस्मासु व्यनक्ति ।

देववाणी-परिषद्वार्तायां संस्कृत-जगद्वार्तायां च यथावकाशं विगतमासत्रये घटितानां गतिविधीनां परिचयो दीयते ।

कृपालवः पाठकाः क्वचिज्जातान् मुद्रणदोषान् परिमार्जयितुं प्रार्थ्यन्ते । 'वर्षन्त्यनलं' इत्यादिरचनायाः पञ्चदशपंक्त्यां 'सारः पुनरयमाप्तः' इत्यस्य स्थाने 'सारं पुनरमाप्तम्' इत्येव पठनीयम् । अयं प्रमादोऽस्माकमज्ञानादेव सञ्जातः । एतदर्थं रचनाकाराः मां क्षन्तुमर्हन्ति ।

विदुषामाश्रवः

रमाकान्त शुक्ल:
प्रधानसम्पादकः

१५-७-१९९०
आर ६ वाणी विहार:
नयी दिल्ली-११००५९

प्रिया (गज़लकाव्यम्)

(डा० हर्षदेव माधव: सी/२४७ भावना टेनामेण्ट्स वासणा बेरेज समीपे
अमदाबाद:-३८०००७)

कार्मुके कामस्य कृत्वा भ्रूलते ।
कं निषादं हन्ति हरिणाक्षी प्रिया ॥

कुत्रचिद् रिक्तौष्ठ इव मधुपो गतः ।
वञ्जुकुञ्जे भ्रमति मदिराक्षी प्रिया ॥

हा ! कथं मन्ये गता रात्रिः ? मया—
नैव दृष्टा नैव कमलाक्षी प्रिया ॥

सैकतोऽहं निर्जनो सरितस्तटः ।
विरहजाले वसति मीनाक्षी प्रिया ॥

वारिदैश्छन्नं नभो मां बाधते ।
सङ्गता नैवास्ति चपलाक्षी प्रिया ॥

मेघदूतः

(श्री ताराशंकर शर्मा, साहित्य-विभाग आचार्याध्यक्षः, राजकीय संस्कृत कालेजः, उदयपुर ३१३००१)

श्रावणस्य प्रथमदिनं
कालिदासस्य यक्षः
आषाढे तु का कथा ?
श्रावणेऽपि चातकायते
मेघदर्शनं विना ।
कुतो भवेत् सफला याचना ?
अद्य वृथाऽस्ति प्रार्थना ।
यदा चेतनतोऽपि जातो निराशः
तदा अचेतने भवेत् कथं विश्वासः ?
तथा च याचनाऽपि किमर्थम् ?
मेघं विना कुत्र विरहव्यथा ?
विरहरहिता च कीदृशीयं प्रेमप्रथा ?
मेघागमने तु दूरस्थ एव न,
अपितु विह्वलो भवति निकटस्थोऽपि;
परं न कुत्रापि मेघदर्शनं,
न च प्रियजनस्य दूरस्थता,
तर्हि कश्चित् कुत्र प्रेषयेत् सम्प्रति सन्देशम् ?
दूतश्च को भविता ?

।। इति ।।

अनुवाद: :—

सावन का प्रथम दिन
कालिदास का यक्ष
आषाढ़ तो क्या ?
सावन में भी तरसता मेघ बिन ।
किससे करे याचना ?
वृथा है आज प्रार्थना ।
जब चेतन ही करे निराश,
तो अचेतन पर हो कैसे विश्वास ?
और माँगे भी क्या ?
मेघ बिन कहाँ विरह व्यथा ?
जो निभाये प्रेमप्रथा ।
मेघागमन पर तो दूरस्थ ही क्या ?
विह्वल होते निकटस्थ भी
पर, है न कोई दर्शन मेघ का
न ही स्थिति किसी दूरस्थ की ।
तो कहाँ भेजेगा अब कोई संदेश ?
और दूत होगा कौन ?

॥ इति ॥

तिस्रो रचनाः

(डा० परमानन्दः शास्त्री, सिद्धार्थसदनम्, मन्दिरमार्गः अलीगढम्)

(१) वर्षन्त्यनलं यदि मित्रकराः......

वर्षन्त्यनलं यदि मित्रकरा आकाशः किं कुर्यात् ?
अन्धं चेच्चक्षुः स्वयं रवेरुद्भासः किं कुर्यात् ?
सम्मर्दे नवे मानवानां मानवता लोपमिता ।
नर्दति महिषासुर इह न तदपि सुरशक्तिः कोपमिता ।
दृप्तायानीत्यधरपानैः (?) स्वदते न हि न्यायरसः
क्षारीभूतायां रसनायां माधुर्यं किं कुर्यात् ?
अन्धं चेच्चक्षुः स्वयं रवेरुद्भासः किं कुर्यात् ।।
गच्छत्येकेन पदा तिष्ठति चान्येन निरुध्य गतम्
सर्वात्मनैव प्रत्यक्षमिदं विश्वं यतते सततम्
पाथेयं योजितमयनम् ऋजु, लक्ष्यं न सुदूरस्थम्,
बाधको भवति निजभार एव गतिरोधः किं कुर्यात् ।
अन्धं स्याच्चक्षुः स्वयं रवेरुद्भासः किं कुर्यात् ?
हन्यते न हन्ति च योऽप्यात्मा सोऽप्यधुना हन्त ! हतः
अनयाप्यास्थानं सुरक्षितं विश्वासः क्वापि गतः
सासारमवर्षज्जलदघटा सारः पुनरयमाप्तः
मुखमभूत् पिपासोर्बडवाग्निर्जलसेकः किं कुर्यात् ?
वर्षन्त्यनल यदि मित्रकरा आकाशः किं कुर्यात् ?
ऋद्धिमिता कृषिरुर्वरा मही उद्योगाः सफलतराः,
परिवारास्तथापि क्षुत्क्षामा बहुलोका नग्नतराः,
उत्पादनगणितमभूद् विकलं योजना मुधात्वमिता
जनवृद्धिरेव जनताहानिर्, आयोगः किं कुर्यात्
वर्षन्त्यनलं यदि मित्रकरा आकाशः किं कुर्यात् ?

नन्दनस्य यत्रानन्दोऽभूद् रोरवीति तत्र मरुः
चेष्टते निपतितो वसुधायामुपवनस्य तरुस्तरुः,
मधुलक्ष्मीः शिशिरपीतवर्णा शोचतीह, धूलिगता
पादपः कुठारायते यदा आरामः किं कुर्यात् ?
अन्धं चेच्चक्षुः स्वयं रवेरुद्भासः किं कुर्यात् ?
पातितो राजनीत्याश्छलिकैः साधुर्धर्मो विवशः
धिग् ! गिरां सत्यशिवसुन्दरतापरिपाकश्चाटुरसः
नवरससत्त्वं नो जानीते षड्रसलम्पटरसना
मुखे रामनामा क्षुरकक्षः कस्य शिवं कुर्यात् ?
अन्धं चेच्चक्षुः स्वयं रवेरुद्भासः किं कुर्यात् ।

०

(२) ग़ज़लिका

लुण्ठिताः किमपि तेषां मौग्ध्येनैषां चातुर्येणापि हृताः
अधुनाऽस्माभिः सम्यग्ज्ञातं क्षुरिकायै ग्रीवाऽजस्य मता ।
उद्योग-पट-वयननिपुणास्ते केदारकर्षका हलिन इमे
वेमावत् क्षिप्तास्तत्र वयं खरपत्रवारतामत्र गताः ।
समतलभूमिं च गिरिं गर्तं न समीक्ष्य धावतामन्वेकम्
क्षुरमस्य स्याद्वा तस्य गतिर्मेषाणां मुण्डनमिह नियता ।
मन्त्राणां द्रष्टारो वयमिति अद्यैन्द्रजालिका घोषयन्ति
श्रुतिमिव यजमानाः शृण्वन्तो वयमेव विवशतां हन्त गताः ।
शिशिरेण कृतं प्रालेयपात-नीहारावृतवातावरणम्
उद्धर्तुमिमे पर्यावरणं शरणं दृक्पक्ष्मावृतिं गताः ।
तत्त्वज्ञानाय राज्यलिप्सा वृद्धत्वममीषामिति दृष्टम्
अपि तेषां तथागतत्वमिदम् आयाता, यथा तथैव गताः ।
मुग्धा तेषां तु कर्णमूले स्मितिरेषां वसति दृशि प्रौढा
सम्मोहमधरपुटकुसुमशरैरावृद्धकिशोरं प्रजा गता ।

उद्गमितपांसवस्ते प्रथिताः कर्दमोद्धतिर्नैषामूना
उभयेषां क्रीडाव्यतिहारे होलीत्वं दीपावलिर्गता ।
धारां तत्तुं ये पञ्चतयीं नौदण्डा एषां समर्पिताः
को वेत्ति कदा सीदेयुस्तैर्दण्डादण्डिव्यवहृतिं गताः ।
अद्यापि स्मृतिदहति हृदयं दुग्धेन वयं हि तदा दग्धाः
उत्कर्णाः पर्णमर्मरैरपि स्वपिमो न, जातु चिन्तानिरताः ।
आसीद् यो देशो महान्, अद्य तैरेभिर्महत्तरः स कृतः ।
सर्वतो महाभारतदृश्यं नाक्षेपं नाटकपटी गता ।
दशदिशासु यत्राग्निर्लग्नः प्रविशेच्च वसेदानन्दः किम् ?
पश्चिमद्वारतोऽविशदनयः प्राच्यात् सन्नीतिर्बहिर्गता ।
लुण्ठिताः किमपि तेषां मौग्ध्येनैतेषां चातुर्येण हृताः ।
अनुभूतं साम्प्रतमस्माभिः क्षुरहेतोर्ग्रीवाऽजस्य कृता ।

★

(३) सत्यं वन्दीकृतं कन्दरे

सत्यं वन्दीकृतं कन्दरे
ज्योतिर्जीवनपथे कुतः स्यात् ?
अन्धत मिस्रा प्रसृता लोके
दृष्टिस्तत्त्वग्रहा कथं स्यात् ?
सरलपथे पुरतोऽपि संस्थिते नरः प्रयाति कथं वत ! वक्रम्?
वेगोत्पाति भ्रमन्न विरमति कामार्थयोरधर्म्यं चक्रम् ।
कर्मकौशलं भग्नं सुचिरादानखशिखं निविष्टः स्वार्थः ।
अपथे तथा यदृच्छं चरितम् अपाकृतो धर्मस्याप्यर्थः ।
उच्छिन्नं यन्मूलमेव तत्
पत्रपुष्पफलभरः कुतः स्यात् ?
सत्यं वन्दीकृतं कन्दरे
ज्योतिर्जीवनपथे कुतः स्यात् ?

वैलक्ष्यं नो नृणां विधत्ते कदाचारिता-पौनःपुन्यम्,
ईर्ष्याऽसूयाऽनृतैः परीतं संवृत्तं वृत्तं पैशुन्यम्,
शत्रुरद्य यः श्वो मित्रं स्यात् मित्रमद्य शत्रुः श्वो भविता,
मूल्यपत्रकं कण्ठे लग्नं विक्रयाय तिष्ठति नरशुचिता ।
जीवनस्य विदितं नहि मूलं
रुचिरुत्तममूल्येषु कुतः स्यात् ?
सत्यं बन्दीकृतं कन्दरे
ज्योतिर्जीवनपथे कुतः स्यात् ।

बहुविधसेतुबन्धनिर्माणैर्नदी - सरो - नद - सलिलं बद्धम्,
गलितनीतिभोगेषु निषक्तं नैव निम्नगं मनो निरुद्धम्,
लोको भ्रमति ग्रहगृहीत इव परिवर्धतेऽस्य संग्रहवृत्तिः,
घनजालं निर्माय चेष्टते लूतावत् शोषणप्रवृत्तिः ।
छिद्रितपात्रे जलं दिधित्सो-
स्तृष्णाया उपशमः कथं स्यात् ?
सत्यं बन्दीकृतं कन्दरे
ज्योतिर्जीवनपथे कथं स्यात् ?

दुस्साहसं खलानामेतद् धरागताश्चन्द्रे ष्ठीवन्ति ।
तेषामेव पतति निष्ठ्यूतं शिरसि तदपि नो खलु विरमन्ति ।
वञ्चनमेव कौशलं जातं चारित्र्यं सीदत्याक्षिप्तम्
सर्वंग्रासिलिप्सया नितरामौचित्यस्य वर्त्म संक्षिप्तम् ।
आरोपिता निम्बतरवो यदि
रसप्राप्तिराम्रस्य कुतः स्यात् ?
सत्यं बन्दीकृतं कन्दरे
ज्योतिर्जीवनपथे कथं स्यात् ?

★

श्रीलाललालित्यम्

(श्री बटोही झा, व्याख्याता केन्द्रीयसंस्कृतविद्यापीठम्, लखनऊ)

शास्त्री लालबहादुरो विजयते यो रेलदुर्घट्टने
दायित्वं निजकं विचार्य विजहौ केन्द्रीयमन्त्रालयम् ।
यस्योदारगुणं जगौ जनतया राजेन्द्रराष्ट्रप्रधीः
कारुण्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥१॥

सामान्यान्वयजन्म भारतशिशोर्नो चोन्नतौ बाधकं
सर्वोच्चे हि करोति गौरवपदे दिव्यात्मभावो जनम् ।
राधाकृष्णमहोदयेन गदितं गीतं तथेदं मुदा
चारित्र्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥२॥

वार्ताशान्तिकताशकन्दविषया ह्याशानिरास्थितौ
याता यत्र समस्तविश्वहृदयं द्रष्टुं फलं चोत्सुकम् ।
साफल्यञ्च विलोक्य जाकिरवचः श्रुत्वा समुद्घोषणां
गाम्भीर्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥३॥

शान्तिस्तिष्ठतु पाकभारतगता चात्यन्तिकी निर्मला
सिद्धान्तो हि जवाहरस्य निकटे क्रोडीकृतो गान्धिनः ।
मैत्रीस्थापनपुण्यकर्मविषये नन्दोदितं निश्छलं
सौहार्दप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥४॥

सौभाग्यं मम कार्यकौशलयुतः शास्त्री यथा नैष्ठिको
नो काम्या सहयोगिताऽतिशयिता चान्यत्र लोके ततः ।
लालो लालबहादुरस्य चरिते प्रोवाच वै पण्डितः
सौशील्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥५॥

लेभे यद्यपि जन्म निर्धनगृहे निःस्वार्थसेवारत—
स्त्यागेनात्मबलेन कर्मठतया जग्राह भव्योन्नतिम् ।
निष्ठा तस्य न कस्य विस्मयकरी सिंहोक्तिमुद्राङ्किता
वैचित्र्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥६॥

आशां कर्मफले विहाय सततं निष्कामयोगो मुदा
कर्तव्यञ्च करोति भारतधरागीतं श्रुतौ संस्कृतौ ।
साधुत्वप्रमितौ हृदा स्मृतवती श्रद्धाञ्जलौ चेन्दिरा
सारल्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥७॥

संस्कारोऽनुभवः स्वजीवनगतः प्राप्तो यथा शास्त्रिणः
सम्बन्धश्च सहानुभूतिभरितः स्वाभाविको निर्धनैः ।
यस्योत्कृष्टचरित्रविस्मितमनाः श्रीटण्डनो ह्लादितो
माधुर्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥८॥

शान्त्यै राष्ट्रहिते गतस्य महतो लालस्य ह्याकस्मिके
देहान्ते सति विश्वकम्पतुलिते कारुण्यदैन्यार्तिदे ।
राज जी निखिला स्वदेशजनता सस्मार शोकाकुला
वैराग्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥९॥

रूसे रुष्टविभुर्न भारतमहीं प्राप्तः कथं काबुलं
यस्यातथ्यसभाजनोद्यतयतिः पख्तूननेताऽब्दुल ।
काले भारतयात्रिणा निगदितः शान्तः समाधौस्थितः
सौजन्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥१०॥

याते नेतरि पण्डिते दिवि भुवो भारोऽर्पितः शास्त्रिणि
प्राथम्यं प्रथमे द्वितीयगणना लोकोत्तरा भारते ।
साध्यं वर्षतया गतं पटुतया मासैर्विनोबावचः
सामर्थ्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ।११।

प्रायो मूलविनिस्सृतञ्च गगने यातं भवेदद्भुतं
मातुः कुक्षिसमुद्गतः स्मरति नो बालः पितृस्कन्धगः ।
शास्त्री वै जनताजनार्दनमतिर्जेबीकृपालोमंते
साधुत्वप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥१२॥

नम्रः सात्विकचेष्टितश्च मधुरो मृद्वीकवाचा मृदुः
शक्तेर्यस्य चमत्कृतौ लघुतया स्तब्धीभवन्त्यापदः ।
नेतृत्वं मनुते विवेककलितं ह्याप्तश्च नारायणो
निर्दैन्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥१३॥

सम्पूर्णः कृषिकर्मिणां भवतु वै सेनास्थयूनां जयो
योगक्षेमधुरन्धरौ विजयतां नादोऽद्भुतः शास्त्रिणः ।
उद्घोषो नितरामयं विलसितः श्रीवेङ्कटोट्टङ्कनं
निष्कर्षप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥१४॥

आरम्भे हि समाजबालहितके कार्येऽभियोगः स्वतो
यस्याः नैतिकराजनीतिगमने स्नेहश्च यत्प्रेरणा ।
शास्त्री मार्गनिदेशको मम गुरुर्वाणीन्दिरानिस्सृता
ह्याचार्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥१५॥

हिंसा यत्र विनिन्दिता श्रुतिपथे ह्याचारमार्गे तथा
सम्मानस्य च रक्षणाय समये शस्त्रग्रहस्यौचिती ।
रक्षा तस्य कृता बहादुरतया सम्पूर्णनन्दोक्तिभि—
ह्यौचित्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥१६॥

सत्तालाभलवेऽपि लोभकणिका स्थानं न लेभे हृदि
सेवाभावधियः प्रधानपदवी काले समारोपिता ।
यत्सञ्चिन्त्य जयप्रकाशवचनं सत्ता स्वतः सात्त्विके
संयोगप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥१७॥

श्रीकृष्णः कृषको युवार्जुनतया तुल्यौ जयार्हाविभौ
व्यासस्योक्तिसमं हि शास्त्रिवचन शास्त्रीयसैद्धान्तिकम् ।
मन्त्रं लालकृतञ्च भारतहितं कैलाशनाथप्रियं
श्रीव्यासप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥१८॥

शिक्षा व्यापकतामयी भवतु वै लोके यया जागृतिः
कर्तव्यं ह्यधिकारिता कथमहो शिक्षां विना ज्ञायताम् ।
शास्त्री तत्र च मुख्यभावसहितः साक्षीगतो मेहता
वैदुष्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥१९॥

श्रीशास्त्री कृशकायवामनतनुः स्नेहाश्रुपूर्णेक्षणो
नामोच्चारणमात्रसस्मितमुखः साधुस्वभावः सुधीः ।
श्रद्धाप्रीतिवशीकृताखिलजनो यं शंसते पाटिलो
दाक्षिण्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥२०॥

संयोगाच्च पदे प्रधानसचिवे वर्ते त्वहं भारते
वार्तायां मम रुग्णताप्रकरणं चातोऽधिकं कथ्यते ।
क्वाचित्के मिलनक्षणे श्रुतमहो कृष्णेन यन्निर्मलं
ह्यौदार्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥२१॥

सौम्या मूर्तिरजातशत्रुसरलो नेतृत्वदा धारणा
दृष्टान्तो न परत्र कौशलगुणे प्रज्ञाऽस्य मानप्रदा ।
यन्मृत्युर्महती क्षतिर्ह्यसमये चोक्तं महामायया
व्यक्तित्वप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥२२॥

वज्रं यत्र न निष्ठुरञ्च कुसुमं न्यूनायते मार्दवे
संकल्पे दृढता हिमालयसमा लक्ष्यो महामानवः ।
आर्षत्वं कमलापतिश्च मनुते यस्याखिलस्निग्धतां
पावित्र्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥२३॥

सिद्धान्तो ह्यनुशासनं नियमितं मूल्यं तथा मान्यता
कर्तव्यस्य च पालनाय रचिता या संहिता गान्धिना ।
निर्व्यूढं सकलं बहादुरमते प्राणैः प्रणैः शास्त्रिणा
स्वातन्त्र्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥२४॥

शास्त्री भारतदृष्टिदर्शनविधौ छात्रो विशेषाग्रही
व्यायामो नहि बौद्धिकस्त्ववगतौ सत्यस्य यद्दर्शनम् ।
ध्यानं यच्चरितस्य सादिकमते कल्याणदं शान्तिदं
वैशिष्ट्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥२५॥

सम्भाव्यो नहि ताशकन्दघटिते हस्ताक्षरे शास्त्रिणि
ह्याघातो ननु शान्तिभावभरिते स्वस्थे प्रसन्ने नरे ।
स्वर्णोक्तौ विजयोपहारहरणे सद्योऽपवर्गं गतः
कैवल्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥२६॥

लालत्वं चरिते बहादुरगुणो देशस्य सञ्चालने
शास्त्रित्वञ्च पवित्रकर्मनिचये यस्यात्मयोगे रतिः ।
साम्यं नामगुणे च वाचि करणे याजीदृशा नोपमा
साद्गुण्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥२७॥

निर्लोभत्वमदो हि हन्ति महतो दीर्घां महत्तां सदा
मुद्रायां वचने न यत्र घटिता त्यागस्य गर्वाकृतिः ।
निर्दुष्टं तिलकस्य वाचि सरलं चित्तं निराहंकृते—
नैर्मल्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥२८॥

स्वाराज्यं हि सुरक्षितं जगति वै सम्मानपात्रं तदा
राष्ट्रं निर्भरते यदात्मनि बले स्वातन्त्र्यसौख्यप्रिया ।
आत्मालम्बनतादिशि प्रयतितं नारायणेनाऽङ्कितं
चैतन्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥२९॥

आद्यन्त परिवर्तनं किमपि नो वैयक्तिके जीवने
दृष्टिर्यस्य सदैव लोकनिवहे प्राप्यापि सर्वोच्चताम् ।
शास्त्री रामनिवासवाचि तुलितो निश्छायदीपात्मना
प्राशस्त्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥३०॥

मन्त्रे शास्त्रिकृते हि सत्रसमरे शीघ्रं प्रचारं गते
यज्ञीयाहुतिधान्यहोतृतरुणान् गेहाच्च प्राणात्समम् ।
सोत्साहं कृषका ददुः सुभगजा वाणी ह्यमर्त्यं गता
नेतृत्वप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥३१॥

विश्वस्तश्च विरोधिनामपि दले सम्मानपात्रं यथा
ख्याता यस्य नयज्ञता समतया देशे विदेशे तथा ।
यस्यात्मक्षमता दिनेशवचसा लोकात्मविश्वासदा
माहात्म्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥३२॥

संसारे सहयोगदा हि महिला काचिन्नरस्योन्नतौ
सा माता वनिताऽस्तु काऽपि भगिनी पुत्री च सर्वस्थितौ ।
रामोक्तौ ललिता समस्थितिवती नारीजगत्प्रेरणा
लालित्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥३३॥

स्थानं राजनये ममापि विमलं चैतन्यसम्बोधनं
जातं यत्कृपया तु नन्दनमते नष्टं न तद्दौर्भगम् ।
निर्मातुं प्रभवेन्मृदा हि घटको मूर्तिं न जीवप्रदो
बन्धुत्वप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥३४॥

अण्वस्त्रस्य कदापि सम्प्रति विधौ दीर्घं निषेधेऽन्तरं
व्यक्तित्वस्य तदन्तरं हि गमकं नो केवलं शाब्दिकम् ।
अन्या स्वप्नदृशिर्बिहारिवचने ह्यन्या च दूरङ्गता
याथार्थ्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥३५॥

प्रायो दक्षिणहस्तसज्जितघटी नार्यां न दृश्या नरे
तेनाकारि विदीर्णवस्त्रघटना हस्ते घटी दक्षिणे ।
कौमारीवचसा स्थितोऽपि निधनः शास्त्री प्रधाने पदे
चाणक्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥३६॥

श्रेण्यां यस्य सतां सदैव गणना काषायवस्त्रं विना
यत्पूतस्मरणं ममामरधनं सत्प्रेरणादायकम् ।
यच्चित्रं ननु भक्तदर्शनदृशा सत्साधुतास्मारकं
प्रह्लादप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥३७॥

प्रत्यक्षं घटमानकार्यविषये ध्यानं न शास्तुस्तथा
पूर्वं चिन्तयते कथं हि भविता कालान्तरे तत्फलम् ।
संघर्षः स्वजनैः परैर्नियमतः शास्त्रिस्वरे शास्त्रिणः
शास्त्रित्वप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥३८॥

सम्भाष्या सहजं न तत्र कियती सम्पच्च सन्मानवी
दुष्टाद्दुष्टतरोऽपि याति मृदुतां तस्यात्मसम्वादतः ।
पाण्डेयस्य मते नरः सुरसमः शास्त्री महामानवो
ह्यद्वैतप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥३९॥

स्वाध्याये निरतश्च रामरचनागाने सदासक्तधी–
र्नाधीता ननु पारसी पुनरपि स्वादोऽस्य तस्यां स्वतः ।
सर्वेषां दयितो हुसैनवचसा जातौ विजातौ च यो
मानुष्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥४०॥

यो ध्वस्तोऽपि गतस्तथा तिरुपतिं मित्राग्रहेणादृतो
नीता भागवती स्ववासभवने मूर्तिस्ततः स्थापिता ।
सोमानी मुमुदेऽस्य सौहृदमहो ज्ञात्वा निगूढं तथा
ह्यास्तिक्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥४१॥

अप्राप्य प्रियशास्त्रिणं पथिगता द्रष्टुं च याता गृहे
धावित्वा स्वयमेव ह्यागतजनैर्वार्तां करोत्यद्भुतम् ।
अद्यत्वे नहि विश्वसेच्च जनता ब्रह्मप्रकाशोक्तिकं
वात्सल्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥४२॥

अस्माकं निजसंविधानविहितं देशस्य नामेण्डिया
यच्चेदं प्रगतेस्तु भारतमहो पृष्ठञ्चरं सूचितम् ।
वाह्ये चात्मनि भारतीयबहुलो लालो मधोकस्वरे
राष्ट्रीयप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥४३॥

त्यक्तं येन न ताशकन्दगमने वस्त्रं स्वधौतप्रियं
तुल्या निर्धनता दरिद्रममता येनोदितञ्चावयोः ।
धन्यास्ते पथिका बहादुरपथे ब्रूते स्वयं बागड़ी
ह्युत्कर्षप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥४४॥

विद्यापीठनिरूपणप्रकरणे वाणी भवेन्मुद्रिता
यस्य स्नातकलालशास्त्रिपुरुषः काशीधरा भूमिका ।
यच्छात्रा गठिताश्च शास्त्रिवचसा स्वाधीनतासंगरे
निर्देशप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥४५॥

सम्बन्धो यदि राष्ट्रमङ्गलयुतो व्यक्तेर्भवेद्वस्तुतः
कार्यं सिध्यति पूर्णतो हि नितरां स्वप्ने न यद्भावना ।
श्रीलालस्य समीक्षणं जनहिते कैलाशवाचार्पितं
तादात्म्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥४६॥

आर्ये मुख्यपदे स्थिते सति यदा प्राप्तस्य गेहं बहिः
पूजायां मम पाककर्मणि तथासक्तिर्न यस्य प्रिया ।
पश्चात्तापरता स्वधर्मवनिता सस्मार भावाकुला
ह्याराध्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः ॥४७॥

प्रातर्गच्छति ताशकन्दनगरं तत्पूर्वरात्रौ पिता
यत्प्रेम्णा लवणं विनापि खिचडीं भुङ्क्ते महायात्रिकः।
मुग्धः पुत्रहरिस्तु तस्य नियमे चार्तो वियोगे तथा
गान्धित्वप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥४८॥

शास्त्री पुण्यमतिः समापतिपदे साहित्यसम्मेलने
जातः संस्कृतभाग्यगौरवकृते विद्याविभूतिप्रदः।
विद्यापीठसुयज्ञमंडनमुनिर्जानाति यत्सौहृदं
कैवर्तप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥४९॥

दिल्लीसंस्कृतपीठछात्रसुधिभिश्चायोजिते ह्यध्वरे
संकल्पाहुतिकालशास्त्रिललिते विश्वासभक्त्यार्पिते।
मीमांसाविधिमंडनः कुलपतिः स्मृत्वाऽधुना मोदते
माणिक्यप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥५०॥

भाषाबद्धधरित्रिलालरचनानेतृस्मृतौ चादितो
विधापीठकृतज्ञताविनिमये शार्दूलविक्रीडितम्।
वृत्तं यस्य च भारतीयजनतापान्थस्य पथ्यात्मकं
पाथेयप्रतिमा ध्रुवं ललितया लालो नियत्याऽऽत्मनः॥५१॥

⁂

अथ श्रीप्रणवकवि[1] प्रणीतं

"मित्रदूतम्"

कश्चिद् विप्रो मयिनपुरितो व्याकुलस्तप्तघर्मात्,
प्रत्यावृत्तः सपदि विमलाद्धैमकूटात्पवित्रात् ।
स्मृत्वा स्मृत्वा परमसुखदञ्चोत्तराखण्डशैत्यं,
भावाकाशे स्फुरितशिखरः पत्रमेतल्लिलेख ।

अर्थ—ज्येष्ठ की तप्त धूप से व्याकुल मैनपुरी वासी किसी विप्र ने जो कि कुछ ही दिन पूर्व पवित्र हिमालय की सुखद शीतलता का स्मरण करके अपने भावाकाश में पर्वत शिखरों का स्फुरण प्राप्त करते हुए यह पत्र लिखा ।

इन्द्रप्रस्थे विशदविभवे शुभ्रवाणीविहारे,
कान्तायुक्तं सरसहृदयं श्रीरमाकान्तशुक्लम् ।
प्रेयो मित्रं मधुरमधुरैर्भावगुच्छैरुपेतं,
पत्रं दत्त्वा शुभहिमगिरौ प्रैषयन्मित्रदूतम् ।।२।।

उसने विशाल वैभव वाले इन्द्रप्रस्थ मे वाणीविहार नामक स्थान पर सपत्नीक रहने वाले, रसिक हृदय प्रिय मित्र श्री रमाकान्त शुक्ल को अत्यन्त मधुर भाव गुच्छों से युक्त यह पत्र देकर मित्रदूत के रूप में पवित्र हिमालय के पास भेजा ।

बन्धो ! पूर्वं परमशिवयोः सन्निधानादवन्त्याः,
आगच्छंस्त्वं शकटपिटके मामवादीः सुप्रेम्णा ।
इच्छाराम ! त्वमसि हृदयं मामकीनं द्वितीयं,
शम्भोः प्रेयो हिमगिरिकुलं प्रापय त्वं कदापि ।।३।।

हे मित्र ! पहले उज्जैन से भगवान् पार्वतीमहेश्वर के सन्निधान से लौटते हुए आपने रेलगाड़ी में प्रेम पूर्वक मुझसे कहा था : "इच्छाराम ! तुम मेरे द्वितीय प्राण हो किसी समय मुझे हिमालय की यात्रा पर ले चलो ।"

---

१. प्रणव इति डा० इच्छाराम द्विवेदस्य उपनाम

वाञ्छापूर्वा वसति हृदये मामकीने सदेयं,
ज्योतिर्लिङ्गानमितविभवान् भारते वै समग्रान् ।
नीत्वा स्वीयां नयनसरणौ धन्यभावं गतोऽहं,
लोके सर्वं निगमगदितं सत्फलं प्राप्नुयाम ।।४।।

मेरी इच्छा है कि मैं अप्रतिम वैभवशाली भगवान् महेश्वर के, भारत में स्थित, ज्योतिर्लिगों का दर्शन कर अपने नेत्रपथ को धन्य करूँ और इस संसार में वेदोक्त पुण्यफल प्राप्त करूँ।"

तत्सन्दर्भे कविकुलमणे ! मित्रमेतत्त्वदीयम्,
पत्रं ह्यतल्लिखति मुदितं हैमशैलान्निवृत्तः ।
नेत्रेऽद्यापि स्फुरति रमणीयाकृतिः पर्वतानां,
अत्युच्चानां विपुलहिमवच्छृंगकानां समन्तात् ।।५।।

उसी सन्दर्भ में हे कविकुलमणि ! आपका यह मित्र जो कि अभी हाल में ही हिमालय की यात्रा से लौटा है यह पत्र लिख रहा है। मेरी आँखों में पर्वतों की रमणीय आकृति इस समय भी घूम रही है। और उसके ऊँचे शिखर चारों ओर से मुझे आनन्दित कर रहे हैं।

इन्द्रप्रस्थादहमपि सखे सम्प्रयातस्तदानीम्,
देवेन्द्राद्यैः परिकरयुतैः कारयाने निविष्टः ।
तन्वङ्गी मे सकलसुखदा धर्मपत्नी सुनीता,
आसीद्हृष्टा विकचवदना वामभागे प्रसन्ना ।।६।।

सखे ! मैंने भी यात्रा दिल्ली से शुरू की थी। मेरे साथ मेरे शिष्य देवेन्द्र जी सपत्नीक थे। मेरी कृशाङ्गी धर्मपत्नी सुनीता, जिसने मुझे सभी सुख दिये हैं, मेरे साथ प्रसन्नमुख वामाङ्ग में कार यान में विराजमान थी।

तीर्थे यात्रा भवति विफला सर्वदा मित्र ! तेषां,
येषां कान्ताः क्षुभितहृदयाः गेहकोणे वसन्ति ।
गन्तव्यं भो ! निजदयितया सार्द्धमेव त्वयापि,
अन्यत्कृत्वा न खलु सुफलं प्राप्स्यसे तीर्थभूमेः ।।७।।

मित्र ! उन लोगों की तीर्थयात्रा सदा विफल हो जाती है जिनकी धर्मपत्नियाँ क्षुब्ध हृदय से घर में ही छोड़ दी जातीं हैं। इसलिये आप भी अपनी सहचरी के साथ ही प्रयाण करें अन्यथा तीर्थ यात्रा का सुफल प्राप्त नहीं हो सकेगा।

मार्गो रम्यो विपुलसुखदो वर्ण्यते त्वत्कृते वै,
गत्वा येन त्वमपि परमां निर्वृतिं लप्स्यसे भोः।
मध्ये मध्ये श्रमितवदनो यत्र नीत्वा क्षपास्त्वम्,
प्रत्यूषेषूच्छ्वसितहृदयः प्राप्स्यसे भूरिहर्षम् ॥८॥

अब मैं आपके लिये परम सुखदायी मार्ग का वर्णन करूँगा जिस से जाकर आप भी आनन्द प्राप्त करेंगे। मार्ग में यत्र-तत्र थक कर रात्रि विश्राम करके प्रातः काल उल्लसित हृदय से प्रसन्नता पूर्वक यात्रा हो सकेगी।

मार्गं श्रुत्वा तदनु सरलं मामकं प्रेमपूर्णं,
सन्देशञ्च श्रवणसुभगं श्रोष्यसि त्वं कवे हे।
तन्मे भावं कुशलवचनैः बद्रिकेशस्य पार्श्वे,
गत्वा प्रेम्णा विनतशिरसा ह्यर्पय त्वं कवीश ॥९॥

मार्ग सुनने के बाद मेरा सरल एवं प्रेमपूर्ण कानों को सुख देने वाला संदेश भी आप सुनेंगे। हे कविराज ! मेरा वह संदेश अपने कुशल वचनों द्वारा भगवान् बद्रीनारायण के पास पहुँच विनम्रता पूर्वक प्रणाम करके सुनाना।

जागर्तीयं विमलविमला ब्रह्मवेला समन्तात्,
घण्टानादैः सुखदशयनं विश्वनीडं जहाति।
गेहाग्रे ते कतिपयनरोऽशुद्धगायत्रमंत्रम्,
वाद्यैः साकं कटुकवचनैरारटन्तीह बन्धो ॥१०॥

हे बन्धु ! इस समय विमल ब्रह्मवेला प्रस्फुटित हो रही है। घण्टानाद के शब्द से विश्व रूपी घोंसला अपनी निद्रा त्याग कर जाग रहा है। तुम्हारे घर के आगे कुछ लोग अशुद्ध गायत्री मंत्र को वाद्यों साथ कटु शब्द में गा रहे हैं।

तेषां हित्वा कटुकमशिवं गायनं सम्प्रयाहि,
पत्न्या सार्द्धं शिवचरणयोर्दिव्यलोके सखे हे ।
इन्द्रप्रस्थाद् द्रुततरगतौ वाहने सन्निरूढः,
शान्त्यर्थं के न हि ऋषिगणाः पर्वतान् संश्रयन्ते ॥११॥

हे मित्र ! उनके कटु एवं अशिव गायन को त्याग कर पत्नी के साथ शिव-शिवा के दिव्य लोक की यात्रा पर चल पड़ो। इन्द्रप्रस्थ से किसी द्रुतगामी वाहन (कार इत्यादि) पर सवार होकर चलो। क्योंकि ऋषि लोग शान्ति के लिये पर्वत का ही तो आश्रय ग्रहण करते हैं।

तीर्त्वा सद्यः परमविशदां राजधानीं विचित्राम्,
शुष्कप्रायां मलिनमलिनां तत्र कालिन्दिकां त्वम् ।
क्षोभो यस्ते व्यथयति मनस्तञ्च दूरं विहातुं,
पूर्वं यात्रां कुरु कदिमणे यामुनोत्र्याः पवित्राम् ॥१२॥

शीघ्रता से परम विशाल राजधानी दिल्ली को पार कर उसके किनारे शुष्क प्राय पड़ी मलिन जलवाली कालिन्दी यमुना को देखकर तुम्हें जो क्षोम होगा उसे दूर करने के लिये पहले तुम यमुनोत्री तीर्थ की पवित्र यात्रा करो।

मन्दोदर्याः जनकनगरे मेरठेति प्रसिद्धे,
गत्वा पूर्वं भुवनजननीं श्रद्धया तां नमेस्त्वम् ।
"काली पल्टन्निति" सुविशदे स्थानके या भवानी,
मन्दस्मेरा दिशति सततं मङ्गलं साधकानाम् ॥१३॥

मन्दोदरी के पिता का नगर मेरठ (मयराष्ट्र) से प्रसिद्ध है वहाँ जगजननी जगदम्बा को, जो काली पलटन नामक मन्दिर में विराजमान हैं, प्रणाम करना। वे जगदम्बा अपने मन्दस्मित से साधकों को सर्वदा मंगल प्रदान करती हैं।

उल्लंघ्यामुं जनपदमथो मित्र ! पूर्णं जलौघैः,
अन्नाद्यैश्च प्रचुरविभवैः संकुलं सर्वतो हि ।
अग्रे यात्वा सुरजनचितं गङ्गया क्षालितञ्च,
पश्य प्रेम्णा परमसुखदं श्रीहरिद्वारकं त्वम् ॥१४॥

मित्र ! इस नहरों, अन्न, एव प्रचुर वैभव से परिपूर्ण जनपद को लाँघकर अब तुम आगे देवताओं द्वारा सेवित, गंगा के द्वारा क्षालित परम सुखद श्री हरिद्वार नामक तीर्थ के प्रेम से दर्शन करो।

स्नात्वा स्नात्वा सुखदशिशिरे निर्मले गाङ्गपूरे,
चांचल्यं ते चलितमनसो दूरतां यास्यतीह ।
इत्थं भाति स्नपनविधिना यद्धि कालेयपापं,
सद्यो मुक्तं व्रजति तरसा शुद्धगङ्गाजले मे ॥१५॥

यहाँ पर सुखद एवं ठण्डे गंगा के स्वच्छ प्रवाह में स्नान करके तुम्हारे चंचल चित्त की चंचलता स्वतः दूर हो जायेगी। यहाँ नहाने से ऐसा लगता है मानों कलिजन्य पाप सद्यः मुक्त होकर शुद्ध गंगाजल में विलीन हो रहा हो।

गत्वा नत्वा शिखरमहितां रज्जुयानेन चोर्ध्वं,
पुण्यां शुभ्रामचलकरुणां श्रीमनोनामदेवीम् ।
गङ्गाकूले मुकुरजटितं पावनं धाम यायाः,
यत्राद्यापि स्फुरति मुदितो मानसो मे मयूरः ॥१६॥

यहाँ पर आप शिखर पर विराजमान पुण्या पर्वतकरुणारूपा श्री मनसा देवी के दर्शनार्थ रज्जुयान (उड़नखटोला) द्वारा जाना। तदनन्तर काच के टुकड़ों से निर्मित "पावनधाम" नामक अद्‌भुत मन्दिर के भी दर्शन करना जहाँ कि मेरा मन मयूर अभी भी स्फुरित हो रहा है।

अत्युत्तुंगे नयनसुखदे भारते मन्दिरे त्वम्,
ऊर्ध्वं गत्वा त्रिपथगमनाकूलदेशे स्थितं च ।
दृष्ट्वा दृष्ट्वा विविधभवनैर्भ्राजमानं समन्तात्,
आनन्दाख्यं नगरमधुना लप्स्यसे भूरि मोदम् ॥१७॥

इसके उपरान्त नेत्रों को सुखद भारतमाता के अत्यन्त ऊँचे मन्दिर में जाना। वहाँ से त्रिपथगा गंगा के तट पर स्थित अनेकानेक भवनों से सुशोभित आनन्द क्षेत्र हरिद्वार नगर के दर्शन से आपको महान् आनन्द प्राप्त होगा।

किञ्चित्पश्चाद् व्रज लघुतरं पश्चिमे दिग्विभागे,
यत्र स्फीतो वनपरिवृतो देहरादूनसंज्ञः ।
रम्यो देशो विलसतितरां सस्यगन्धाढ्यभूमिः,
तस्योत्सङ्गे विरम सुखतो हे सखे त्वं क्षणेषु ॥१८॥

यहाँ से कुछ पश्चिम दिशा की ओर चलें जहाँ एक विशाल नगर देहरादून है। यह अत्यन्त रमणीय है जहाँ वासमती चावल की गन्ध हरे खेतों से आती रहती है। उसकी गोद में कुछ क्षण रुक कर विश्राम अवश्य करें।

शीतं पेयं रुचिरमशनं तत्र जग्ध्वा पुनस्त्वं,
सर्पाकारैर्नयनसुखदैः रम्यमार्गैः प्रयाहि ।
यास्ते राज्ञी हिमनगपते सा मसूरीति नाम्नी,
तस्याः क्रोडेऽविकलविधिनानन्दपूरं लभस्व ॥१९॥

यहाँ शीतल पेय या इच्छित जलपान कर पुनः सर्पाकार एवं देखने में अत्यन्त सुन्दर मार्गों से प्रयाण करो। आगे हिमालय की रानी के नाम से प्रसिद्ध मसूरी नामक नगरी है जिसकी गोद में आप आनन्दसिन्धु में गोते लगाइये।

तुंगैः श्रृंगैः सघनवनकैर्मेघखण्डैरुपेताम्,
उच्चैर्नीचैर्ललितभवनैः शोभितां तां मसूरीम् ।
विद्युद्दीपैर्विलसिततनुं वीक्ष्य नूनं हि रात्रौ
स्वर्गानन्दं त्यजति सहसा भावना दर्शकस्य ॥२०॥

यहाँ उत्तुंग शिखरों, सघन वनों, मेघखण्डों एवं ऊँचे नीचे सुन्दर भवनों से सुशोभित सुन्दर मसूरी को, जो कि विद्युद्दीपों की आभा से झिलमिलाती रहती है देखकर रात्रि में यात्री एक क्षण को स्वर्ग के आनन्द को भी त्याग देता है।

पृष्ठेऽश्वानां विविधवसनैश्चित्रकैश्छन्नदेहाः,
आंग्लां वाणीं वचनचतुराः यत्र रम्या रमण्यः ।
शोभापूर्णेष्वमितविभवेष्वापणे पूर्णवासां—
सीह त्वं भो निजसहचरीं मण्डनार्थं लभस्व ॥२१॥

मित्र ! यहाँ घोड़ों की पीठ पर रंगबिरंगें परिधानों में सजी अंग्रेजी में कुशलतापूर्वक बोलती हुई सुन्दर रमणियाँ हैं। अमित वैभव वाले शोभापूर्ण बाजारों से आप अपनी सहचरी के लिए सुन्दर ऊनी वस्त्र अवश्य खरीदें।

रात्रौ नूनं रमणकुशलस्त्वं हि लब्ध्वात्र सौख्यम्,
प्रातःकाले सुखदपवने मुक्तनिद्रः प्रयाहि।
ईषद्गत्वा शिखरपतिते कैम्पटी-नाम्नि स्रोत—
स्यानन्दैस्त्वं स्नपनसुविधिं मित्र निर्वापयात्र ॥२२॥

मित्र ! आप रमणकुशल हैं। रात्रि में सुखपूर्वक निवास करके प्रातः काल जब सुखदायी पवन चल रहा हो निद्रा त्याग कर चल पड़िये। यहाँ से थोड़ी दूर पर कैम्पटी फाल नामक स्थान है। यहाँ आनन्द पूर्वक स्नान करिये।

तत्र स्नात्वा प्रचल सुखतः पर्वतोपत्यकायाम्,
अग्रे गत्वा हरितजलकैः क्लिन्नगात्रीं पवित्राम्।
दृष्ट्वा मोदं ललितयमुनां प्राप्स्यसे भूरि भूरि,
सेतुं तीर्त्वा द्रुततरगतौ याहि भो यामुनोत्रीम् ॥२३॥

यहाँ सुख से स्नान करके पर्वत के नीचे नीचे चलिये। आगे श्याम वर्ण जल वाली पवित्र यमुना नदी "यमुना ब्रिज" नामक स्थान पर मिलेगी। उसे देखकर आप को बड़ी प्रन्नता होगी। पुल पार कर आप तीव्र गति से यमुनोत्री को चलें।

अत्युच्चा वै विविधतरुभिः मण्डिता पर्वतालीः,
वामे भागे कलकलकरी सूर्यपुत्री पवित्रा।
मध्ये मध्ये श्रमविरचिताः कर्षकाणां कुटीरा,
सर्वं दृश्यं कविकुलमणे वर्तते काव्यपूर्णम् ॥२४॥

हे कवि कुलमणि ! यहाँ पर अत्यन्त ऊँचे विभिन्न वनस्पतियों से घिरे शैल शिखर हैं। आपके बाँयीं तरफ कलकल कर बहती यमुना होगी। साथ ही बीच-बीच में अत्यन्त श्रम से बनाये गये कृषकों के घर होंगे। यह सारा दृश्य काव्यपूर्ण है।

होरायुग्मं प्रचल सुकवे चोत्तरे दिग्विभागे,
द्रक्ष्यस्यग्रे पथिकबहुलं श्रीनवग्रामकं त्वम् ।
तत्र स्थित्वा कतिपयपलै रध्वखेदं नयेथाः,
भूयो गन्तुं दृढतरपदैर्निश्चयेनैव भूयाः ।।२५।।

"लगभग दो घण्टे चलने के बाद उत्तर दिशा की तरफ आगे चलने पर आपको तीर्थयात्रियों से भरा नौगाँव नामक स्थल मिलेगा। हे कविवर ! कुछ क्षणों तक वहाँ ठहर कर मार्ग की थकावट दूर करना । तत्पश्चात् पुनः दृढ़ पांवों से आगे की याँत्रा पर चलने का दृढ़ निश्चय करना ।

"बर्कोटाख्ये" विभवभरिते रम्यरम्ये पुरे त्वं,
सद्यो गत्वा सघनविटपच्छायया संवृतः स्याः ।
अन्तस्तापं दलति झटिति स्रोतसां तद्धिमाम्भः,
दूरीभूतो भवति सहसा मार्गखेदः समेषाम् ।।२६।।

आगे बड़कोट नामक वैभवपूर्ण सुन्दर नगर आपको मिलेगा वहाँ पर सघन वृक्षों की छाया में बैठकर तथा वहाँ बहती नदी यमुना का हिमशीतल जल तत्क्षण ही अन्तस्ताप को प्रशमित करता है । वहाँ बैठने से सभी का मार्ग में चलने का श्रम दूर हो जाता है।

मध्याह्ने भोः पवनसुतकृच्चट्टिकां प्राप्स्यसे त्वं,
शीतो वायुः स्पृशति वदनं हैमवत्खण्डतोऽत्र ।
त्यक्त्वा सर्वं नगरविभवं दण्डपाणिर्भवेः भोः,
पादातः सन् व्रज कविवर ! त्वं पुनस्तीर्थभूमिम् ।।२६।।

हे मित्र ! मध्याह्न में आप हनुमान चट्टी नामक स्थान पर पहुँच जायेंगे । यहाँ पर हिमालय से आती ठण्डी हवा सारे शरीर का सुखद स्पर्श करती है। यहाँ पर सभी नगर के वैभव को छोड़कर आप हाथ में लाठी लेकर पैदल यात्री के रूप में तीर्थभूमि यमुनोत्री के लिए प्रस्थान करें ।

कालिन्द्यास्त्वं विमलपुलिने यष्टिहस्तो यदा भोः,
यास्यस्युच्चावचपथगणे श्रीरमासंयुतश्च ।
गायन् मन्दं व्रजपतिगुणान्मित्र ! शोभा त्वदीया,
नूनं यास्यत्यमरमिथुनप्रेक्षणीया पवित्रा ।।२८।।

प्रिय मित्र ! आप जिस समय हाथ में लाठी लेकर यमुना के विमल तट पर ऊँचे नीचे रास्ते पर श्रीमती रमा देवी के साथ चलेंगे, भगवान् कृष्ण के गुणानुवाद गाते हुए आपकी शोभा निश्चय ही देवताओं के जोड़ों के द्वारा देखी जाने योग्य होगी ।

किञ्चिद्गत्वा स्फटिकविशदं स्रोतसां वारिपूरं,
पीत्वा पीत्वा मुदितहृदयो नारदीं चट्टिकां वै ।
सम्प्राप्य त्वं विरम सुकवे शैलखण्डे कुतश्चित्,
दर्शं दर्शं पुलिनसुषमां मुग्धतां यास्यसि त्वम् ।।२९।।

कुछ दूर पैदल चलने के पश्चाद् स्फटिक मणि के समान् स्वच्छ जल से पूर्ण झरनों का शीतल जल पीते-पीते प्रसन्न हृदय से आप नारद चट्टी पहुँच जायेंगे। यहाँ पर हे कविश्रेष्ठ ! किसी सुन्दर चट्टान पर आप विश्राम करें। आप यमुना की तटवर्तिनी सुषमा को देख देखकर मुग्ध हो जायेंगे ।

तत्र स्थित्वा कतिपयकलाः पान्थ याहि त्वमग्रे,
तत्र द्रक्ष्यस्युपलविषमे पुष्पचट्टीं सुरम्याम् ।
झिल्लीशब्दैर्मुखरितदिशां सीत्कृतैः शीतवायोः,
पूर्णा चेयं विकचकुसुमैः सार्थनामा सदास्ते ।।३०।।

वहाँ कुछ मिनट रुक कर हे पथिक ! आगे चलो। आगे चट्टानों के कारण ऊँची नीची भूमि पर अवस्थित फूल चट्टी देखोगें जहाँ झिल्ली के शब्द से दिशायें मुखरित हैं और जो ठण्डी वायु के सीत्कारों से प्रतिध्वनित होतो है तथा खिले हुए पुष्पों के कारण सदा सार्थक नाम वाली है ।

शोभां दृष्ट्वा तदनु पथिक ! त्वं व्रजेरग्रतो हि,
क्रोशं गत्वास्तमनसमये प्राप्स्यसे स्थानमेकम् ।
यज्जानक्या शुभगुणगणं वर्ण्यते तच्च चट्टी,
जानक्याख्या हिमगिरितटेऽवस्थिता काप्यपूर्वा ।।३१।।

हे पथिक ! उसकी शोभा देखकर तुम आगे चलो। लगभग एक कोस चलने पर सूर्यास्त के समय एक स्थान तुम्हें प्राप्त होगा जो श्री जानकी जी के शुभ गुणगणों के वर्णन के कारण जानकी चट्टी नाम से हिमगिरि के ठीक नीचे स्थित है। यह स्थान अपनी रमणीयता के कारण अपूर्व है।

यामा शुभ्रा श्रमितचरणेनात्र नेया त्वया भोः,
पत्न्याः सार्द्धं शिशिरसुखदे तूलवस्त्रे सुखेन ।
प्रत्यूषे त्वं प्रचल पथिक ! श्रीवरे तीर्थराजे,
मार्गं घोरं श्रमबहुलकं वर्तते कष्टपूर्णम् ॥३२॥

थके हुए पैरों वाले आप अपनी चाँदनी रात्रि अपनी पत्नी के साथ सुखपूर्वक यहीं रजाई में बिताइये। प्रातः काल होते ही हे पथिक ! आप श्रीसम्पन्न तीर्थंराज यमुनोत्री के लिये चल पड़ें। आगे का मार्ग अत्यन्त कठिन एवं श्रमसाध्य है।

पश्यन्बन्धो ! हिमगिरिशिखा मार्गकष्टं न ते स्यात्,
शम्भुं स्मृत्वा कथमपि सखे वक्रमार्गांश्च सद्यः ।
गत्वा प्रेयः परमसुखद यामुनोत्र्याश्च धाम,
दृष्ट्वा नूनं जननसुफलं लप्स्यसे मानवस्य ॥३३॥

हे बन्धु ! यहाँ हिमशिखरों को निहारने के कारण मार्गकष्ट आपको प्रतीत नहीं होगा। आप भगवान् शिव का स्मरण करते हुए बीस मोड़ों वाले टेड़ मेढ़े रास्ते को यथा कथंचित् पार कर अत्यन्त प्रिय, परम सुखद यमुनोत्री धाम में पहुँच जायेंगे। उसे देखकर आप को मानव योनि में जन्म लेने का सौभाग्य फलित होता हुआ लगेगा।

कल्लोलैर्या विनतवदना हेमकूटात्पतन्ती,
हैमाद्रौ सा पितरि सदने बाल्यभावं भजन्ती ।
क्रीडारामे मुखरमुखरा रोदसी पूरयन्ती,
कालिन्द्येषा कलिमलहरा वर्ततेऽद्यापि वन्द्या ॥३४॥

यहाँ पर कालिन्दी यमुना अपनी चंचल लहरों के साथ अधोमुखी होकर हिमगिरि से नीचे उतरती है। हिमालय उसका मायका है यहाँ वह किसी चंचल किशोरी की भाँति अपने क्रीडा उद्यान में शोर मचाकर आकाश पाताल को मानों एक करती हुई कलिकाल के पापों को दूर करती हुई वन्दनीय रूप से विराजमान है।

शैत्याधिक्यान्नहि मम गृहे कोऽपि भूयाज्ज्वरार्तः,
कालिन्दी सा कलितहृदया भावमित्थं दधाना।
उष्णां धारां विमलनिवहां सारयच्छैलखण्डात्,
उष्णे नीरे स्नपनविधिना नन्दितः स्यास्तदीये ॥३५॥

"मेरे गृह में ठण्ड से कोई ज्वर इत्यादि से पीड़ित नहीं हो जाये" मानो इसी भाव से यमुना ने एक जल की निर्मल धारा शैल शिखर से यहाँ प्रकट कर दी है जिसके गर्म जल में स्नान करते ही आप आनन्द मग्न हो जायेंगे।

तत्र स्थित्वा युगलघटिकामात्रमेवैहि बन्धो !,
सम्यग्रूपे रचय सुविधि पूजने यामुनोत्र्याः।
क्षिप्रं नीचैरवतरतु भोः शेषयात्रार्थमेव,
वर्षाकालो भवति दिवसस्यार्द्धभागे नगेषु ॥३६॥

हे बन्धु ! यहाँ आप दो घड़ी तक ठहरें। विधि पूर्वक भगवती यमुना की पूजा करें और फुर्ती से नीचे उतरने का यत्न करें क्योंकि यात्रा का अवशिष्ट भाग पूर्ण करना है और पहाड़ों में प्रायः मध्याह्न के बाद वर्षा होने लगती है।

मार्गे तीव्रा तव गतिरियं नूनमेवात्र भूयात्,
सन्नद्धस्त्वं प्रचल शनकैः कृच्छ्रमार्गे तदानीम्।
अत्युत्तुंगे शिखरिशिखरे ह्यत्र कष्टं प्रयाणम्,
प्रत्यावर्ते तदपि विपुलं कष्टजालं भवेद्धि ॥३७॥

उतरते समय मार्ग में आपकी गति तीव्र होगी ही; इसलिये आप सावधानी पूर्वक ही धीरे-धीरे इस कठिन मार्ग से उतरें क्योंकि अत्यन्त ऊँचे पर्वत शिखरों पर चढ़ने में जितना कष्ट होता है उनसे उतरने में उससे भी अधिक कष्ट होता है।

सम्प्राप्य त्वं पुनरपि शुभां मारुतेश्चट्टिकां वै,
स्वीये याने शिथिलचरणो हृष्टसर्वान्तरात्मा ।
नूनं नेत्रे मुकुलिततरे कल्पयसे तद्धि शोभां,
यस्याः दृश्यं सुकृतविधिना प्राप्यसे लोकमध्ये ॥३८॥

आप लौटकर पुनः हनुमान चट्टी तक आयें तथा अपने यात्रा से थकित चरणों से अपने वाहन में जब बैठेंगे तो आपकी आत्मा में बड़ा हर्ष होगा। निश्चय ही उस समय नेत्र मूँदकर आप उस हिमालय की शोभा को अपने कल्पना जगत् में निहारेंगे जिसका दर्शन किसी जन्मार्जित पुण्य के फल स्वरूप प्राप्त होता है।

सायंकालेऽपनय पदयोस्त्वं श्रमं कष्टपूर्णम्,
बर्कोटस्याप्रतिमसुखदे सार्वकारीयसौधे ।
श्रान्ते देहे परमरमणी स्याद्धि ते गाढनिद्रा,
यस्यां लीनस्तृणमिव जगन्मानवः संजहाति ॥३९॥

आप सायंकाल बड़कोट के भव्य एवं सुखद सरकारी भवन पर्यटक निवास में आकर अपने श्रमित चरणों का कष्ट विश्राम द्वारा दूर करिये - अत्यन्त थके होने से उस दिन आपको ऐसी गाढ़ निद्रा आयेगी जिसमें लीन हुआ आदमी सारे संसार को तिनके के समान छोड़ देता है।

प्रातःकाले मधुरमधुरो गन्धवाहः द्रुमाणां,
मन्दं मन्दं नदजलकणैर्युक्तनैजैः करैश्च ।
गात्रं सर्वं स्पृशति मृदुलो मोदकारी प्रियश्च,
तस्य स्पर्शं रुचिरसुखदं प्राप्य निद्रां विमुञ्च ॥४०॥

सवेरे अत्यन्त ही मधुर वृक्षों की सुगन्ध से भरपूर वायु धीरे-धीरे नदी के जल कणों से सम्पृक्त अत एव शीतल अपने करों से आप के समस्त शरीर का स्पर्श करते हुए आनन्द पूर्वक आपको जगायेगा। उसके सुखद स्पर्श को पाकर आप निद्रा को त्याग दीजिए।

युक्तो भूयाः झटिति गमने तीर्थके त्वं द्वितीये,
गंगोत्तर्याः परमरमणे दर्शनार्थं कवे हे ।
भागीरथ्याः कलिमलहरे दिव्यतीरे त्वदीया,
यात्रा पुण्या नयनरुचिरा साम्प्रतं भोः भवित्री ॥४१॥

हे कविजी, अब आप झटपट दूसरे तीर्थ की यात्रा के लिये तैय्यार हो जाइये, जिसका कि नाम गंगोत्तरी है। कलिकाल के पापों को हरने वाली भागीरथी गंगा के दिव्य तट पर नयन सुखदायी आपकी पवित्र यात्रा अब आरम्भ होगी।

बर्कोटातो द्रुततरगतौ याहि पूर्वां दिशं त्वं,
मध्येमार्गं सघनवनकैश्छन्नप्रान्ते हिमाद्रौ ।
अत्युत्तुंगैर्गगनतलगैः वृक्षकैः शृंगकैश्च,
रम्यं प्रान्तं मुदितमनसा द्रक्ष्यसीह क्षितौ त्वम् ॥४२॥

बर्कोट से तीव्र गति में आप पूर्व दिशा की ओर चलें। बीच में पड़ने वाला मार्ग सघन वनों से आच्छादित है तथा हिमालय के उत्तुंग शिखरों से वह प्रान्त अत्यन्त ही रमणीय है। आप मुदित मन से पृथ्वी के उस खण्ड को देखेंगे।

भूर्जं वृक्षं हरितहरितं देवदारुं महोच्चं,
बांजं फुल्लं सुललितरुचिं वीक्ष्य चित्तं कवे ते ।
काव्यं कर्तुं सरस ! भविता नूनमेवात्र बन्धो,
दृष्ट्वा फुल्लां प्रकृतिवनितां को न गातुं प्रसक्तः ॥४३॥

हरे-हरे भोजपत्र के वृक्ष, ऊँचे-ऊँचे देवदार, फूले हुये अत्यन्त ही सुन्दर लग रहे बांज वृक्षों को देखकर हे कविवर आपका चित्त अनायास ही कविता करने के लिये यहाँ होने लगेगा। आखिर प्रकृति नायिका के प्रफुल्लित रूप को देखकर कौन गाने नहीं लगता अर्थात् सभी गाने लगते हैं।

ग्रामं दृष्ट्वा सुलघुतनुभृत् ब्रह्मखालेति पुण्यं,
किञ्चित्पश्चादुपलबहुलं द्रक्ष्यसि त्वं धरासूम् ।
हैमाद्रेर्यस्सरसहरिते क्रोडमध्ये निविष्टो,
ग्रामो दिव्यो नयनरुचिरः संस्थितो गाङ्गतीरे ॥४४॥

इस मार्ग में थोड़ा चलने पर पवित्र ब्रह्मखाल नामक ग्राम है। उसके थोड़ा आगे चलने पर चट्टानों के कारण ऊँचा नीचा धरासू नामक ग्राम है। हिमालय की नयनाभिराम हरीतिमामय गोद में बसे इस दिव्य ग्राम को गंगा के तीर पर स्थित देखोगे।

अत्रागत्य प्रचल सुकवे ! पूर्वके दिग्विभागे,
भागीरथ्याः हरिततटके मुग्धभावेन शीघ्रम् ।
द्रक्ष्यस्यग्रे विशदविभवामुत्तरां काशिकां त्वं,
यस्यां गत्वा पुनरपि जनो वांछतीहैव जन्म ॥४५॥

हे सुकवि ! यहाँ आकर आप पूर्व दिशा की ओर चलें। भागीरथी के हरे भरे तट के किनारे मुग्ध भाव से देखते हुए आगे चलने पर आपके सम्मुख उत्तर काशी नामक नगर आयेगा जो विपुल वैभव से पूर्ण है और यहाँ जाकर मानव पुनः इस भूलोक में जन्म लेने की प्रार्थना करता है।

भागीरथ्यारुभयतटयोरुच्चकैर्या निवासैः,
यक्षं लोकं हसति मुदिता वैभवैः पूरिता च ।
तस्योत्सङ्गे विरम सुकवे भोजनादि प्रकल्प्य,
गंगोत्तर्याः परमरमणीं गच्छ भो तीर्थभूमिम् ॥४६॥

भागीरथी के दोनों तटों पर ऊँचे-ऊँचे सुन्दर भवनों के कारण वैभव से भरी पूरी यह उत्तर काशी मानों कुबेर की अलकापुरी का उपहास सा करती है। उसकी गोद में आप कुछ क्षण विश्राम करें। भोजनादि करके परम रमणीय गंगोत्तरी तीर्थ की भूमि के लिए स्थान करें।

सर्वा भूमिः प्रचुरवनकैर्भाति नेत्राभिरामा,
गंगादेव्याः सरसपयसा सेचिता देवभूमिः ।
मध्ये मध्ये हिमशिखरतः स्यन्दमानानि स्रोतां—
सि त्वं दृष्ट्वा कविवर भवेः क्षिप्रमेव प्रहृष्टः ॥४७॥

आगे की पूरी भूमि हरे भरे सघन वनों से ढकी होने के कारण नेत्राभिराम है। यह गंगा के सुस्वादु जल से सिंचित देवभूमि है। बीच बीच में हिमशिखरों से गलते हुये झरनों को यहाँ देखकर हे कविवर आप प्रसन्न हो जायेंगे।

सर्पाकारैः पथविचलनैर्ग्रामभूमीर्विलङ्घ्य,
मन्नेर्याख्यं कलकलयुतं चात्र भट्वाडिकां च ।
झालाग्रामं प्रलघुविभवं वीक्ष्य नूनं कवे ते,
चित्तारामे कलितकविताभावना सम्भवेद्धि ॥४८॥

सर्प की सी आकृति वाले रास्ते के मोड़ों को पारकर कुछ ग्रामों को लाँघने के बाद आप गंगा की कल कल से पूरित मनेरी बाँध को पार करेंगे । आगे भटवाड़ी तथा निर्धन झाला ग्राम है जिसे देखकर आपके चित्तरूपी उपवन में कविता कलिका प्रस्फुटित होने लगेगी ।

अत्रस्थस्त्वं शुभहिमगिरेः शुभ्रशृंगाणि नूनं,
दृष्ट्वा दृष्ट्वा चकितनयनैर्मोदभावे निमग्नः ।
गायन्नुच्चैः सरसकवितां भाति मे भारताख्यां,
दिव्यं हर्षं कविकुलमणे ! लप्स्यसे गायनस्य ॥४९॥

यहाँ पर तुम शुभ हिमालय के सफेद हिममण्डित शिखरों के दर्शन से वार वार चकितमन होकर प्रसन्नता में डूब जाओगे । इस समय अपनी 'भाति मे भारतम्' शीर्षक वाली मनोहर कविता को जोर से गाने पर हे कवि कुल मणि ! आपको गाने का दिव्य हर्ष प्राप्त होगा ।

झालाग्रामादवनतगतिस्त्वं यदा सेतुतीरे,
भागीरथ्याः प्रचुरसलिलं तर्तुकामो व्रजेः भोः ।
हर्षिल्लाख्यं सुरपुरगतं नन्दनं काननं वा,
स्वर्गारामं वचनविमुक्तो द्रक्ष्यसीहैव लोके ॥५०॥

झाला ग्राम से आपको घाटी में नीचे उतरना है । जब जल से लबा लब भरी भागीरथी के पुल पर नदी पार करने के लिये आप आयेंगे तो साक्षात् स्वर्ग की नगरी की भाँति हरसिल नामक स्थान मूक होकर इसी लोक में देखने को मिलेगा ।

घोरं शब्दं रचयति शुभा प्रस्तरैरुच्छलन्ती,
भागीरथ्याश्चपलगमना वारिधारा समन्तात् ।
पूर्वं जह्नोः सुखदसदनं प्लावितं चात्र बन्धो,
तेनैवेयं वहति पदवीं जाह्नवी नामिकां वै ॥५१॥

यहाँ पत्थरों पर उछलती चंचलगमना भागीरथी बड़े जोर का शब्द करती है। यहीं पर पूर्व काल में गंगा ने जह्नु ऋषि का सुन्दर आश्रम बहा दिया था। उसी समय से इस नदी का नाम जाह्नवी पड़ गया है।

उच्चं भग्नं दलितदलितं मार्गकं वर्ततेऽत्र,
शुभ्राकारैः स्फटिकनिवहैः निर्झरैःपूरितञ्च ।
येषां दृश्यं विशदनयनैः पीयमानाश्च पान्थाः,
मोदाब्धौ स्वे गलितहृदया सन्निमग्ना, भवन्ति ॥५२॥

यहाँ से आगे चढ़ाई का मार्ग है जो टूटा फूटा है परन्तु इसमें स्वच्छ जल वाले स्फटिकमणि के समान कान्तियुक्त झरनों का बाहुल्य है। अपनी बड़ी बड़ी आँखों से इनका सुन्दर दर्शन करने वाले यात्री विगलित हृदय होकर आनन्द समुद्र में लीन हो जाते हैं।

अग्रे गत्वातिसघनतरं वर्तते वायरण्यम्,
यस्मिँल्लीना सुभटबहुला साऽस्मदीया च लंका ।
रक्षाकारैर्विविधविधिभिर्गोप्यमाना समन्ताद्,
आस्ते दिव्या परमरमणी दर्शकाणां समेषाम् ॥५३॥

आगे चलने पर अत्यन्त सघनतर वन प्रान्त है जिससे घिरी हुई लंका नामक हमारी जगह है जहाँ हमारे सैनिक सुरक्षार्थ निवास करते हैं। अनेक विधियों से देश की रक्षा में लगे रहने वाले सैनिकों से रक्षित यह लंका निश्चय ही दर्शकों के लिए बड़ी सुन्दर है।

रम्यो मार्गो सुभटरचितो वर्ततेऽतोऽग्रतो हि,
घोराकारां सघनविटपाच्छादितां भैरवाख्याम् ।
घाटीं गत्वा सभयनयनैः कम्पते पान्थकोऽपि,
अग्रे यातो भवति नहि कः कम्पितो ज्येष्ठकानाम् ॥५४॥

इससे आगे सैनिकों द्वारा बनाया गया मार्ग बहुत सुन्दर है। थोड़ा आगे चलने पर भयानक आकृतिवाली घने वृक्षों से घिरी भैरों घाटी को देखकर पथिकों को कुछ कुछ भय की अनुभूति होती है। सच ही है अपने बड़ों को देखकर किसका हृदय कम्पित नहीं होता।

सायंकालेऽस्तमनसमये रक्तबिम्बे च भानौ,
रक्तीभूते हिमगिरिमुखे रंजिताशावधूट्याः ।
भक्त्यारक्तस्त्वमपि सुकवे लप्स्यसे देवभूमिम्,
गंगोत्तर्याः सकलशिवदां पुण्यभावैरुपेताम् ॥५५॥

सूर्यास्त के समय सायंकाल में जब सूर्यदेव रक्त बिम्ब होकर अस्त होने को होंगे, हिमालय की चोटियाँ भी रक्त वर्णा होंगी, दिशारूपी नायिका का मुखमंडल भी मानों रक्ताभ होगा उसी समय भक्ति में रंगे हुए आप भी हे कविश्रेष्ठ ! देवभूमि गंगोत्तरी को प्राप्त करेंगे जो समस्त कल्याणों को देने वाली तथा पवित्र भावों से युक्त है ।

ब्रह्म.नन्दाकुलितविभवा वेदघोषैरुपेता,
उत्सङ्गे या हिमगिरिगते वर्तते खण्डभूता ।
पुञ्जीभूता मुनिकुलयुता ब्रह्मलोकस्य पुण्या,
गंगोत्र्या वै मधुररचना भूतले काप्यपूर्वा ॥५६॥

ब्रह्मानन्द का वैभव जिसमें भरा हुआ है, वैदिक मंत्रों के घोष से जो युक्त है, हिमालय की गोद में बसी मुनिजनोंसे सेवित यह गंगोत्री साक्षात् ब्रह्मलोक की एक पवित्र खण्ड सी लगती है । इसकी सुन्दर रचना सम्पूर्ण पृथ्वी में अपूर्व ही है ।

प्रासादे सा वसति सरसा हेममूर्तौ च गङ्गा,
कालिन्द्यादिस्वजनसहिता नारदाद्यैर्युता च ।
घंटानादैः जयजयरवैः पूरयन्तो दिगन्तान्,
भक्ताः सर्वे त्रिपथगमनीं पूजयन्तीह नित्यम् ॥५७॥

वह गंगा अपने गंगोत्री मन्दिर में स्वर्णमयी मूर्ति के रूप में विराजमान हैं । साथ में यमुना इत्यादि स्वजनों की मूर्तियाँ भी हैं नारदादि भक्तों की प्रतिमायें भी हैं । यहाँ पर घंटानाद करते हुए जय जय के शब्द से दिग्भागों को गुंजायमान करते भक्त गणं त्रिपथगा गंगा की रोज ही पूजा करते हैं ।

सायंकाले त्वमपि सुकवे मातृनीराजने वै,
गत्वा स्तोत्रं सरसवचनैः प्रेमतो वाचयेः भोः ।
गीतं यच्चाप्रतिमविबुधैः श्रीजगन्नाथविप्रैः,
गङ्गादेव्याः महिमभरितं स्तोत्रकं तत्प्रशस्यम् ॥५८॥

हे कविवर ! सायं काल की माता गंगा की आरती में जाकर तुम भी अपनी मधुर वाणी में गंगा स्तोत्र का पाठ करना जो स्तोत्र अप्रतिम विद्वान् पण्डितराज जगन्नाथ ने गंगा की महिमा में गाया था । वह बड़ा ही प्रशंसनीय स्तोत्र है ।

तत्र दृष्ट्वा परमसुभगां तां शिलाञ्चापि बन्धो,
यत्र स्थित्वा सगरकुलजः साधयामास गङ्गाम् ।
यस्य प्रेम्णाऽमृतसुरधुनी ब्रह्मलोकं विहाया-
याता भूम्यां सकलफलदा पूजय त्वं शिलां ताम् ॥५९॥

वहाँ उस शिला के भी दर्शन करना जो अत्यन्त ही सुन्दर है तथा जिस पर बैठ कर भगीरथ ने गंगा की साधना की थी । उन्हीं के प्रेम से स्वर्ग में रहने वाली गंगा ब्रह्मलोक को छोड़कर समस्त फल देने के लिए इस लोक में उतरीं । आप उस दिव्य शिला की पूजा करना ।

शुभ्रं स्वच्छं नयनसुभगं मन्दिरं जह्नुजायाः,
लोके सृष्टं विमलमतिभिः शंकराचार्यपादैः ।
नत्वा तेषां रजतरचितां मूर्तिकां गर्भगेहे,
श्रद्धाभारात्पुलकिततनुः नूनमेवात्र भूयाः ॥६०॥

यहाँ का सफेद स्वच्छ नेत्रों को सुखदायी गंगा का मन्दिर विमल बुद्धि वाले आदि शंकराचार्य ने बनवाया था । उनकी भी चाँदी की प्रतिमा मन्दिर के गर्भ गृह में है । उस की वन्दना कर के श्रद्धा के भार से आप का शरीर निश्चय ही पुलकित हो उठेगा ।

रात्रौ तीर्थे कलकलरवैर्लालितस्त्वं शयीथाः,
गंगातीरे मुनिजनकृते त्वाश्रमे नन्दितात्मा ।
प्रात.काले पुनरपि नदी तीरदेशे व्रज त्वं,
स्नातुं शीते सुखदशुभदे स्वर्धुनीवारिपूरे ॥६१॥

रात में तुम भागीरथी के कलकल रव की लोरी सुनते हुए तीर्थ में सोना। गंगा के तट पर ऋषियों द्वारा बनाये गये आश्रम में विश्राम कर प्रातः काल में पुनः नदी तट पर पवित्र गंगा के शीतल, सुखदायक तथा पुण्यदायक जल में नहाने के लिए पहुंचना।

तत्र स्नात्वा पुनरपि कवे दर्शनं त्वं विधेहि,
गंगामातू रमणनिलये भक्तिभावेन नत्वा।
भूयो भूयो निजजनकृते तत्कृपां याचमानः,
इच्छारामं चपलचरितं मातुरग्रे वदस्व ॥६२॥

हे कवि ! वहाँ स्नान कर के तुम गंगा माता के विलासधाम में भक्तिपूर्वक दर्शन के लिए जाना। सभी अपने इष्ट मित्रों के लिए उनकी कृपा की याचना करना। और चंचल चित्तवृत्ति वाले इच्छाराम का भी निवेदन माँ गंगा से करना।

इच्छारामः प्रणमति शुभे पादपद्मे त्वदीये,
गेहे स्वीये कुशलसहितस्त्वत्कृपायाः प्रभावात्।
तेनोक्तं यत्परिकरयुतेनात्र मातस्तवाग्रे,
तेनाहं ते चरणशरणे प्रेषितो नौमि दूतः ॥६३॥

कहना कि हे शुभदात्री मां ! इच्छाराम ने आपके चरण कमलों में प्रणाम कहा है। वह अपने परिवार के साथ घर में आपकी कृपा से कुशल से है। उसने सपरिवार यहाँ आकर आपके सम्मुख जो प्रतिज्ञा की थी तदनुसार मैं उसके द्वारा भेजा गया दूत हो कर आपकी चरण में आया हूँ आप को प्रणाम करता हूँ।

नत्वा देवीं प्रचल झटिति त्व कवे शैवधाम्नि,
अग्रे बन्धो कुरु गमनकं पुण्यकेदारखण्डे।
यत्रास्ते सः परमशिवदो भूतभव्यान्तरात्मा,
भूतेशो वायजहरिनुतश्चन्द्रमौलिः शिवो नः ॥६४॥

देवी गंगा को प्रणाम कर कविवर ! आप भगवान् शिव के पवित्र केदारखण्ड की यात्रा के लिए शीघ्रता से गमन करें। जहाँ परमकल्याणकारी, समस्त प्राणियों के अन्तरात्मा, भूतेश, ब्रह्मा

तथा विष्णु से पूजित चन्द्रमौलीश्वर हमारे भगवान् शिव निवास करते हैं।

पूर्वं तावद्द्रुततरगतौ काशिकामुत्तरीयां,
यावद्गत्वा तदनु सुकवे लंघयित्वा च गंगाम् ।
वामात्तीराच्चलतु टिहरीं श्रीविशालां विशालां,
नद्याः बन्धः प्रचलति यतो नित्यलोकैर्निरुद्धः ॥६५॥

पहले तो द्रुतगति से उत्तर काशी तक लौटें। फिर यहा से गंगा को पार कर गंगा के बाँयें तट सेहोकर वैभवपूर्ण टिहरी नामक नगर में पहुँचें। जहाँ जनता के द्वारा रोज रोके जाने के वाद भी बांध बनाया जा रहा है।

शान्तो मार्गो लसति सुकवे टेहरीतस्तवाग्रे,
साय यावत् तव सुगमनं मित्र नूनं भवेद्धि ।
दृष्ट्वा पुरं प्रचुरजलकं श्रीपुरे रम्यदेशे,
हृष्टात्मा त्वं शुभ अलकनंदातटे याहि विप्र ॥६६॥

टेहरी से आगे का मार्ग अत्यन्त ही शान्त है। सायं काल से पूर्व ही आप जल से भरी अलकनंदा के किनारे बसे श्री नगर नामक रम्य नगर में पहुँचकर प्रसन्नता का अनुभव करेंगे।

दृष्ट्वात्र श्रीनगरमतुलं संकुलं तीर्थकृद्भिः,
उच्चैः सौधैः प्रचुरपणकैः स्मारयद्यद्धि दिल्लीम् ।
रात्र्यावासं कथमपि कवे लप्स्यसे त्वं महार्घ्यं,
प्रातःकाले व्रज पुनरथो रुद्रनाम्नि प्रयागे ॥६७॥

तीर्थयात्रियों से भरे श्री नगर को देखकर तथा अपने ऊँचे होटलों का ऊँचे किरायों से जो दिल्ली की याद करा देगा ऐसे नगर में किसी भी प्रकार से रात्रि में प्रभूत किराया देकर आवास प्राप्त करें तथा प्रातः काल रुद्रप्रयाग के लिये प्रस्थान करें।

मन्दाकिन्या विमलविमला वारिधारा पवित्रा,
नन्दानीरैर्मिलति मुदितेहैव रुद्रप्रयागे ।
शुभ्रश्यामे सलिलमिलने नित्यमेवात्र देशे
प्रातः सायं मिलनसुषमां को न साक्षात्करोति ? ॥६८॥

रुद्रप्रयाग में ही मन्दाकिनी नदी की विमल प्रवाह युक्त पवित्र जल धारा अलकनंदा के सुन्दर जल में मिलती है। मन्दाकिनी का नीला जल एवं अलकनंदा का श्वेत लज जब मिलता है तो यहाँ हर समय प्रातः सायं वेला के मिलन की शोभा का कौन नहीं साक्षात्कार करता ?

नन्दां तीर्त्वा हरितहरितो तीरदेशे सुरम्ये,
मन्दाकिन्याः कलकलयुते के शिवे मज्जनादिम् ।
कृत्वा नूनं निजतनुगतं मार्गखेदं विहाय,
केदाराख्यं त्रिभुवनगुरोर्धाम यायाः पवित्रम् ॥६९॥

यहाँ अलकनंदा को पारकर मन्दाकिनी के हरियाली से भरे किनारे पर कल कल करते जल में स्नानादि करके आप शरीर की सारी थकावट उतार कर केदारनाथ नामक त्रिलोकीपति शिव के धाम में जाना।

तिलवाराख्यं लघुनगरकं वर्तते यत्तवाग्रे,
जानेऽहं नो खलु तिलकुलं चास्ति नास्तीति बन्धो ।
गौरे गण्डे ललितललिते पर्वतस्त्रीकुलेषु,
पिप्लुं दृष्ट्वा मनसि विहितं यत्तिलान्यत्र सन्ति ॥७०॥

आगे जो ग्राम आयेगा वह तिलवाड़ा है। छोटा सा ग्राम है। मैं नहीं जानता कि यहाँ पर तिल की राशि होती है या नहीं। हाँ, पर्वतीय सुन्दरियों के गौरे गालों पर चमकते तिल देख कर मुझे लगा कि यहाँ तिल हैं।

अग्रे किञ्चिद् व्रज कुलपतेस्तामगस्त्यस्य भूमिं,
यस्यां स्थित्वा परमकठिनं तेन तप्तं तपस्तत् ।
गुप्ता काशी शिवगिरिजयोः संयुता वर्ततेऽग्रे,
तस्यां गत्वा नमनविधिना श्रीशिवं पूजय त्वम् ॥७१॥

कुछ आगे चल कर आप कुलपति अगस्त्य की भूमि में जायें। ऋषि अगस्त्य ने यहाँ पर कठिन तप किया था। इस से आगे शिव एवं पार्वती के सहित गुप्त काशी नामक स्थान है वहाँ जाकर नमनपूर्वक शिवजी को प्रणाम करना।

स्थानादस्माद्बहुलविटपाद् वीक्ष्य शैलान्हिमाद्रेः,
हैमाच्छन्नान् नयनसुखदान् संवृतान्वै वनौघैः ।
उत्कण्ठः सन् पथिकचरणास्तीव्रगत्या प्रयातुं,
केदारस्याप्रतिमभुवने दर्शनार्थं व्रजन्ति ।।७२।।

इस स्थान से जो कि घने वृक्षों से भरा हुआ है हिमालय के हिममण्डित शिखरों को देखकर नयनानन्द की प्राप्ति होगी। वे शिखर वनों से परिवृत हैं। यहाँ आकर पथिको के चरण केदारनाथ के दर्शन की उत्कण्ठा में तीव्र गति से चलने के लिए सन्नद्ध हो जाते हैं।

द्वित्रिक्रोशं परिमितपथं वीक्ष्य सोनप्रयागं,
मन्दाकिन्यास्तटपरिगतं शोभनं ग्रामकं त्वम् ।
उल्लंघ्यामुं सपदि च कवे शैलजायाः प्रयाहि,
गौरीकुण्डे सघनविटपाच्छादिते तप्तकुण्डे ।।७३।।

यहाँ से दो तीन कोश पर सोन प्रयाग है जो मन्दाकिनी के तट पर स्थित सुन्दर गाँव है। इसको पार कर हे कवि श्रेष्ठ ! तुम पार्वती के द्वारा अधिष्ठित घने वृक्षों से आच्छादित तथा गर्म जल के कुण्ड से युक्त गौरी कुण्ड पहुँचोगे।

यानात्स्वीयादवतर कवे दण्डपाणिः पुनः स्याः,
पादातिः सन्व्रज सहचरीसार्द्धमेवाग्रतो हि ।
वक्रे मार्गे शकलरचिते यष्टिकां वै गृहीत्वा,
मन्दं मन्दं समुपसर भोः शैवशैले पवित्रे ।।७४।।

यहाँ अपने वाहन से उतर कर पुनः दण्डपाणि हो जाओ। पैदल हो कर अपनी सहचरी के साथ टेड़े मेड़े रास्ते पर जो कि पत्थरों से बनाया गया है लाठी लेकर धीरे धीरे शिवजी के पवित्र पर्वत केदार की यात्रा करो।

झिल्लीशब्दः खगकुलरवो स्रोतसाञ्चापि घोषो,
वायोर्वेगो हिमगिरिगतो सर्व एवात्र बन्धो ।
हृत्तंत्रीं ते बलवदधुना झंकृतां कारयित्वा,
शंभोर्गीतं पठनमुखरं त्वां करिष्यन्ति नूनम् ।।७५।।

बंधु ! रास्ते में झिल्ली का शब्द, पक्षियों का कूजन, झरनों का विवाद, वायु का वेग जो कि हिमालय को छूकर आ रहा है यह सब चीजें तुम्हारी हृत्तंत्री को हठात् ही झंकृत कर डालेंगी और तुम अनायास ही शिव स्तोत्रों का पाठ करने लगोगे।

अर्द्धे मार्गे विरमपलकैः रामबाडाभिधाने,
ग्रामे नैजं जठरभरणं संविधेहि त्वमत्र ।
अग्रे यात्रा कठिनकठिना ते भवित्री सुरम्या,
यस्या अन्ते शिवपरिकरं लप्स्यसे हैमखण्डे ।।७६।।

कुछ पल के लिए रामबाड़ा नामक स्थान पर जो कि ठीक बीच में है रुक जाओ। यहाँ पर पेट पूजा करलो। आगे की यात्रा बड़ी कठिन पर रमणीय है जिसके अन्त में आप शिवजी के परिकर को हिमालय में प्राप्त करेंगे।

अत्युत्तुंगाः हिमगिरिशिलाः हैमवस्त्रं दधानाः,
स्रोतोव्याजैः प्रकृतिरमणी चीरकं दर्शयन्ती,
स्वीयारामे गिरिपतिसुता निर्गुणा क्रीडयन्ती,
केदारेऽस्मिञ्जलधरगणैर्नन्दिता नित्यमास्ते ।।७७।।

ऊँचे-ऊँचे हिमालय के शिखर बर्फ़ के कपड़े पहने हैं, प्रकृति रूपी नायिका झरने रूपी अपने दुपट्टे को दिखाती है, अपने पितृ गृह में निर्गुण निराकार रूप में मानों पार्वती ही इस केदार खण्ड में मेघों के साथ खेलती हुई नित्य निवास करती हैं।

मध्ये मध्ये विपुलशिखरान्हैमकाँस्त्वं पदातिः,
उल्लंघ्यात्र प्रचल तरसा दिव्यकेदारखण्डे ।
यात्रान्तेऽसौ नगपतिगृहे शुभ्रहैमाद्रिपीठे,
केदारः स्यान्नयनपथगस्तावकैः पूर्वपुण्यैः ।।७८।।

बीच-बीच में पैदल चलते हुए आप बड़े-बड़े हिमशिखरों को बर्फ पर चलकर पार करेंगे तब केदार खण्ड पहुँचेगे। यात्रा के अन्त में हिमालय के घर में हिमालय के बर्फीले पहाड़ के पीठ पर स्थित केदार तुम्हारे नयन पथ में आयेगा जो कि पूर्व जन्मार्जित पुण्यों का फल है।

हैमाच्छैलात्पतति गहने वारिधारातिशीता,
मन्दाकिन्याः न च जलकणैः कोऽपि शक्तोऽवगाहे ।
आचम्य त्वं सुविशदतमे प्राङ्गणे मन्दिरस्य,
केदारेशं जनिभयहरं दर्शनार्थं प्रयाहि ॥७९॥

हिमालय के बर्फ से ढके शिखर से अत्यन्त शीतल मन्दाकिनी की जल धारा गिरती है। उसमें कोई नहा नहीं सकता। तुम उसका आचमन करके मन्दिर के विशाल प्राङ्गण में जन्म (जाल) के भय से छुड़ाने वाले भगवान् केदारेश्वर के दर्शनार्थ जाओ।

प्रासादस्तु त्रिभुवनगुरोरस्ति दिव्यातिदिव्यो,
यस्मिन्सर्वे भरतकुलजाः पाण्डवाः संस्थिताः वै, ।
कृष्णो भीमोऽर्जुनकयमलौ धर्मराजोऽथ कुन्ती,
द्रौपद्याद्याः निजनिजगृहे वन्दनीयाः लसन्ति ॥८०॥

त्रिलोकी के गुरु शिवजी का यह मन्दिर दिव्यातिदिव्य है जिसमें सभी भरतवंशी पाण्डव स्थित हैं। कृष्ण, भीम, अर्जुन, नकुल, सहदेव धर्मराज, युधिष्ठिर, कुन्ती, द्रौपदी आदि अपने-अपने स्थान पर वन्दित होते हैं।

गर्भे गेहे विनतशिरसा याहि हे शुक्लबन्धो,
केदारेशो भुवनपशुपः स्थाणुमूर्ताविहास्ते ।
तच्छृंगारं नयनसुखदं वीक्ष्य तेऽप्यन्तरात्मा,
ब्रह्मानन्दे शिवमहिमनि क्षिप्रमेवाव्रजेद्धि ॥८१॥

हे शुक्लबन्धु ! आप विनतशिर होकर मन्दिर के गर्भगृह में जायें। यहाँ पर भगवान् केदारेश्वर जो कि समग्र संसार के जीवों के पालक हैं स्थाणु मूर्ति के रूप में विराजमान हैं। उनके नेत्राभिराम शृंगार को देखकर तुम्हारी अन्तरात्मा भी शिवमहिमा से पूरित ब्रह्मानन्द को प्राप्त करेगी।

घण्टाघोषैर्मुखरितदिशां रात्रिनीराजनां ताम्,
हस्तैर्नीत्वा जननसुफलं लप्स्यसे त्वं कवे हे ।
रात्रौ वंप्रे सुखदशयने चन्द्रिकापूरितायाम्,
तुंगं शैलं हिमवसनकैश्छन्नगात्रं प्रपश्य ॥८२॥

घण्टा के घोष से दिशाओं को परिपूरित करने वाली शयन आरती को अपने हाथों से ग्रहण कर हे कविराज ! तुम अपने मानव जन्म को सफल कर लोगे। रात्रि में किसी तीर्थ पुरोहित के सुखद-शयनागार में चाँदनी भरी रात में ऊँचे वर्फ से ढके पर्वत को निहारो।

कैलासोऽयं स्फुरति नयने वापि हासः शिवस्य,
शुक्लो वर्णः धवलहिमतो केन वा सम्प्रसूतः ।
शुक्लः शैलः सिततमशिवः शुक्लकस्त्वं कवे हे,
सर्वं शुक्लं सरस भविता तत्क्षणे कल्पयेऽहम् ।।८३।।

ऐसा लगेगा मानो क्या यह कैलाश पर्वत है जो नेत्रों में स्फुरित हो रहा है या फिर भगवान् शिव का कोमल हास है। बर्फ के कारण शुक्लवर्ण का यह पर्वत किसने बनाया है। शुक्ल पर्वत, श्वेततम भगवान् शिव और कविश्रेष्ठ तुम भी शुक्ल हो; उस क्षण में वहाँ सब कुछ शुक्ल ही शुक्ल होगा मैं ऐसी कल्पना करता हूँ।

रात्रिं नीत्वा धवलवसने तूलराशौ सुखेन,
प्रातः स्नानं रचय लघुकं चोष्णकेनैव केन ।
केदारेशं निगमविधिना चार्चय त्वं कवीश,
येनानन्दं निखिलकरणैर्लप्स्यसे नूनमेव ।।८४।।

श्वेत चादरों वाली शय्या पर रजाई में सुखपूर्वक शयन करने के बाद प्रातः गर्म जल से ही थोड़ा सा स्नान करना। फिर वेदोक्त विधि से भगवान् केदारेश्वर की समर्चना करना; इस से आपकी समस्त इन्द्रियाँ निश्चय ही प्रफुल्लित हो उठेंगी।

केदारेशं विधिवदधुना पूजयित्वाशु गच्छेः,
अस्तं यातो निगमहितकृद्यत्र सूर्यो मनस्वी, ।
निर्वाणे याऽभवदतिजडा तत्समाधौ च गत्वा,
श्रद्धापूर्णं रचय विधिना पुष्पदानं कवीश ।।८५।।

हे कवीश! यहाँ पर भगवान् केदारेशकी विधि पूर्वक पूजा करके जल्दी ही चलो उस स्थान पर जहां वेदों के हितकर्ता वेदान्त सूर्य

आदिशंकर की समाधि है। आदिशंकराचार्य के निर्वाण को देखकर मानो वह अत्यन्त जड हो गई है। ऐसी उसकी समाधि पर श्रद्धापूर्वक विधि से पुष्प दान करना।

क्षिप्रं नीचैः त्रिभुवनगुरोर्धामतो मोदमग्नः,
पद्भ्यामेवावतर सुकवे मन्दहासं वितन्वन् ।
मार्गे पान्थानुपशमय तान् ये व्रजन्त्यूर्ध्वमार्गे,
तेषां यात्रा सुगमविधिना येन सम्पत्स्यते वै ।।८६।।

अनन्तर त्रिलोकी पति शिव के धाम से शीघ्रता से प्रसन्न भाव से नीचे उतरना। पैरों से उतरते हुए मन्द हास बिखेरते हुए तुम रास्ते में ऊपर की ओर जाने वाले पथिकों को सान्त्वना देते हुए जाना जिससे उनकी यात्रा सुगम हो जायेगी।

गौरीकुण्डे स्नपनविधिना तप्तपूरे निजं त्वम्,
अध्वक्लेशं झटिति सुकवे मोक्ष्यसे नूनमेव ।
सायं काले पुनरपि सखे रुद्रके वै प्रयागे,
वासार्थं त्वं व्रज सहचरीसार्द्धमेवात्र बन्धो ।।८७।।

सुकवे, गौरीकुण्ड के गर्म जल में तुम स्नान करना जिससे मार्गका क्लेश तुरन्त ही वहीं छूट जायेगा। सांयकाल में पुनः रुद्रप्रयाग में अपनी सहचरी के साथ निवासार्थ आ जाना।

प्रातःकाले परमसुखदे मुक्तिकामः सखे त्वम्,
विश्वेशस्याप्रतिमभुवनं बद्रिकेशं प्रयाहि ।
दिव्यं यस्य त्रिभुवनपतेः प्राप्य किञ्चित्कटाक्षं,
जीवो मुक्तो भवति जननान्नूनमेवेति सत्यम् ।।८८।।

यहाँ से प्रातः काल के परम रमणीय समय में मुक्तिकाम होकर हे सखे! विश्वेश्वर भगवान् के अप्रतिम लोक बद्रीनाथ के लिए प्रयाण करो। जिन त्रिभुवनपति के किंचिन्मात्र कटाक्ष को प्राप्त करके ही जीव जन्म मरण के बन्धन से मुक्त हो जाता है।

क्षिप्रं क्षिप्रं प्रचल सुकवे पूर्वके दिग्विभागे,
गत्वा चाग्रे नयनरुचिरं पुण्यकर्णप्रयागम् ।
दृष्ट्वा मुग्धो ह्यलसनयनैर्द्रक्ष्यसि त्वं चमोलीं,
यस्या अग्रे सुलघुवसतिः पिप्पलीकोटिनाम्नी ।।८६।।

यहाँ से शीघ्रता पूर्वक पूर्व दिशा की ओर चलो। आगे चलकर नेत्र रमणीय कर्ण प्रयाग को तथा अलसाये हुये नेत्रों से चमोली को देखोगे जिसके थोड़ा ही आगे पीपलकोटी नाम लघु ग्राम है।

घोरैः शब्दैः प्रवहति शुभा घर्घरैः सा च नन्दा,
उल्लंघ्येमां विशदरचितेनात्र वै सेतुकेन ।
हेलंगाख्यं सुभटनगरं प्राप्स्यसे मित्र नूनम्,
ज्योतिष्पीठं लसति भुवने यस्य पार्श्वे पवित्रम् ।।६०।।

घोर शब्द करती अलकनन्दा यहाँ बह रही है इसे विशाल रूप से बनाये गये सेतु द्वारा पार कर सैनिकों द्वारा सेवित हेलंग नामक नगर को प्राप्त करोगे जिसके पास में ही जोशीमठ नामक पवित्र स्थान है।

तप्तं यत्राप्रतिमविधिना त्रोटकाचार्यकेण,
तस्मिन्पीठे कतिपयपलं मार्गकष्टं विहाय ।
नीचैर्गत्वा शिखरिशिखरात् त्वं व्रजेरूर्ध्वदेशं,
यस्मिन्गत्वा क्षितितलगतश्चास्ति विष्णुप्रयागः ।।६१।।

यहाँ पर अप्रतिम विधि से त्रोटकाचार्य ने तप किया था। मार्ग के कष्ट को भूलकर कुछ पलों के लिये उस पीठ पर जाना। पुनः शिखर से नीचे उतर कर नदी पार कर के एक दम सीधी ऊँची चढ़ाई को पार करना जहाँ पृथ्वीतल पर ही विष्णु प्रयाग स्थित है।

हैमाञ्छैलान् परमसुखदान् वीक्षमाणः समन्तात्,
गच्छन्नूर्ध्वं नयनरुचिरान् निर्झरान्द्रक्ष्यसि त्वम् ।
मध्ये मध्ये हिमगिरितले लुप्तधारां च नन्दां,
दृष्ट्वा मोदं सुरपुरभवं लप्स्यसे नूनमेव ।।६२।।

सुखदायी बर्फीली चोटियों को चारों ओर देखते हुए ऊपर की ओर चढ़ते हुए नेत्र सुख प्रदान करने वाले अनेकानेक झरनों को देखोगे। बीच-बीच में (बर्फ जम जाने कारण) हिमालय की घाटी में जिसकी धारा लुप्त हो गयी सी प्रतीत होती है ऐसी अलकनन्दा को देखकर स्वर्गीय आनन्द प्राप्त करोगे।

मार्गान्ते त्वं नगपतिगृहे रम्यभागे पवित्रे,
नन्दातीरे सुरपुरसमं बद्रिकेशस्य धाम।
दर्शं दर्शं चकितचकितो मुग्धभावेन बन्धो,
हृद्देशे त्वं सकलसुषमाटंकणं चात्र कुर्याः ॥६३॥

मार्गान्त में तुम पर्वतराज के गृह में पवित्र सुन्दर स्थान पर अलकनन्दा के किनारे स्वर्ग के समान स्थित बद्रीनारायण धाम के दर्शन करोगे। उसे नेत्रों से देखकर चकित होते हुए मुग्ध भाव से उसकी सम्पूर्ण सुषमा को अपने हृदय देश में अंकित करोगे।

बद्रीनाथे नयनरुचिरे मन्दिरे त्वं यदा स्याः,
तस्मिन्काले बहुलजननानां सुपुण्यं भवेत्ते।
नेहायातुं प्रभवति जनो घोरपापानुयायी,
बैकुण्ठे को विशति मनुजः पुण्यराशिं विहाय ॥६४॥

बद्रीनाथ के नेत्ररमणीय मन्दिर जब तुम पहुँचोगे उस समय तुम्हारे बहुत से जन्मों का पुण्योदय होगा। क्योंकि घोर पाप का अनुयायी व्यक्ति यहाँ नहीं आ सकता। पुण्य के विना क्या कोई मनुष्य बैकुण्ठ में जा सकता है ?

दूराद् दृष्ट्वाऽप्रतिमरुचिरं चित्रितं तोरणं वै,
मुग्धो मुग्धो भवति हृदयो नूनमेवास्य लक्ष्म्याः।
अस्मिन्क्षेत्रे नरतनुधरो यश्च नारायणोऽपि,
बद्रीशः सन्निवसति कवे लोककल्याणकामी ॥६५॥

दूर से ही अद्भुत रूप से सुन्दर तोरण द्वार को देखकर इसकी श्री से हृदय मुग्ध हो जाता है। इस क्षेत्र में नर का शरीर धारण करने वाले भगवान् नारायण बद्रीश के रूप में लोक कल्याण करने की कामना से निवास करते हैं।

कामो भीतो नरकृतसुखादत्र नीत्वोर्वशीं च,
यातो लोके तदनु सुकवे श्रीहरेर्भक्त एकः ।
अत्रायातः सरसफलभुक् चोद्धवाख्यो विपश्चित्,
आत्मारामो दशमपठनेनाप्तवानत्र मुक्तिम् ॥९६॥

भगवान् नारायण के द्वारा प्रस्तुत सपर्या से भयभीत हुआ कामदेव यहाँ से उर्वशी को लेकर स्वर्ग गया था, उसके बाद श्री हरि का एक भक्त उद्धव भी भागवतरूपी सरस फल का भोक्ता दशम स्कन्ध का पाठ करते हुए यहीं मुक्ति का अधिकारी वना था।

सायंकाले विमलहृदयेनात्र नीराजने त्वं,
रूपं पश्येर्नरतनुधरस्याद्भुतं श्रीमुरारेः ।
हृद्रोगश्चेत् कलिमलकृतो नङ्क्ष्यति क्षिप्रमेव,
कुण्ठाहीने भवपतिगृहे कुत्र वा रोगकुण्ठा ॥९७॥

सायंकाल के समय निष्पाप हृदय से रात्रि की आरती में नरतनुधारी श्रीहरि के अद्भुत रूप को देखना कलिमलजन्य कोई यदि हृदयरोग हुआ तो वह नष्ट हो जायेगा। सच है कुण्ठाहोन जगत्पति भगवान् के गृह में रोग की कुंठा कहाँ रह सकती है ?

सायंकाले निजगतधनाद्देहि मुद्रा सहस्रम्,
येन प्रातस्त्रिभुवनपतेः श्रीवरस्याभिषेके ।
अग्रे स्थानं परमसुखदं प्राप्स्यसे मित्र तत्र,
यत्र स्थित्वा नयनसुफलं लप्स्यसेऽत्राभिषेके ॥९८॥

सायंकाल को ही अपने उपार्जित द्रव्य में से तुम एक सहस्र मुद्रायें प्रदान करना जिससे प्रातः काल त्रिलोकीश श्री बद्रीनारायण के अग्र भाग में (महापूजा के समय) सुखद स्थान प्राप्त कर सको। वहाँ बैठ मित्र ! अभिषेक पूजा का दर्शन कर नेत्रों का परम निर्वाण प्राप्त होगा।

श्रौतान् मन्त्रान् स्वरकुशलकैर्विप्रवृन्दैः पठद्भिः,
श्रावं श्रावं कविकुलमणे त्वं विकुण्ठस्तदा स्याः ।
ईशं दृष्ट्वा नरमपि विभुं चोर्वशीमुद्धवञ्च,
पूतात्मा त्वं भवसि गरुडं नारदञ्चापि दृष्ट्वा ॥९९॥

स्वर प्रक्रिया से कुशल विप्रों के द्वारा वेदमंत्रों के उच्चारण को सुनकर हे कविकुलमणि ! तुम कुण्ठारहित हो जाओगे। वहाँ भगवान् बद्रीश, भगवान् नर, उर्वशी, उद्धव, गरुड तथा नारद की प्रतिमाओं का दर्शन करके तुम पवित्र हो जाओगे।

भोक्ष्यार्थन्ते मधुरमधुरं पद्मकिञ्जल्कयुक्तं,
उच्छिष्टं श्रीहरिवरमुखादोदनं मोदकञ्च ।
भुक्त्वा चेदं परमरुचिरं श्रीप्रसादं प्रसीद,
हृष्टात्मा सन् व्रज मम सखे शङ्कराचार्यपीठम् ॥१००॥

इसके बाद तुम्हें खाने के लिये अत्यन्त मधुर केशर एवं पराग से युक्त भगवान् हरि का प्रसादस्वरूप केसरिया भात तथा लड्डू प्राप्त होंगे। इस परम स्वादिष्ट प्रसाद को प्राप्त कर के तुम प्रसन्न होकर शंकराचार्य पीठ पर जाना।

शिष्यैः सार्द्धं वसति विमलोऽज्ञानदः शंकरोऽयं,
अस्यैवेयं सकलरचना बद्रिकेशस्य धाम्नि ।
पूर्णे देशेऽप्रतिमविधिना स्थापितं धर्मक्षेत्रम्,
को वा लोके स्तवनरचने वर्तते वै समर्थः ॥१०१॥

अज्ञान का खण्डन करने वाले विमल बुद्धि शंकराचार्य जी यहाँ शिष्यों के साथ विद्यमान हैं। इन्हीं की यह समस्त रचना है जो आज बद्रीनारायण मन्दिर में है। इन्होंने अप्रतिम कौशल से पूर्ण देश में धर्म क्षेत्रों की स्थापना की थी। इनकी स्तुति करने का सामर्थ्य भला किस में हो सकता है।

सौन्दर्यं त्वं विगतनिमिषैर्लोचनैर्वीक्ष्य बन्धो,
बद्रीक्षेत्रे पुलकिततनुर्जायसे तत्र नूनम् ।
यस्या शोभामतुलिततरां वीक्ष्य पूर्वं सुरेशो,
देवेन्द्रोऽपि प्रकृतिसुषमापाशमध्ये निबद्धः ॥१०२॥

अपलक दृष्टि से बद्रीनारायण तीर्थ का सौन्दर्य नेत्रों से निहार कर तुम निश्चय ही पुलकित हो उठोगे। इसकी अतुलित शोभा को देखकर प्राचीन काल में देवेन्द्र भी प्रकृति की सुषमा के पाश में बँध गया था।

बन्धो गत्वा त्रिभुवनपतेर्मन्दिरे त्वं प्रयाणे,
नम्रैश्शब्दैर्मम जडमतेर्वन्दनं वाचयेः भोः ।
इच्छारामो द्विजकुलगतो देव ते पादपद्मे,
यात्रावृत्त झटिति रचितं प्रैषयन्मित्रदूतम् ॥१०३॥

चलने के समय हे बन्धु ! तुम त्रिलोकीश बद्रीश के मन्दिर में जाकर नम्र शब्दों से मन्द बुद्धि वाले मेरा (इच्छाराम का) प्रणाम प्रभु को निवेदन करना । कहना द्विजकुल में उत्पन्न वह इच्छाराम हे देव ! तुम्हारे चरण कमलों में प्रणाम कह रहा है और उसी ने शीघ्रता में मित्रदूत भेजा है ।

आयातोऽसौ निजपरिकरैः संयुतो ह्यत्र पूर्वं,
देवेन्द्राद्यैः सुसखिसुषमासंवृतो दीपकैश्च ।
पत्न्याः सार्द्धं निजवनितया भक्तियुक्तः प्रभो हे,
देयं तस्मै चरणशरणं विप्रवंशांकुराय ॥१०४॥

मुझसे पहले वह सपरिवार यहाँ आया था । उसके साथ मित्र देवेन्द्र जी तथा सखी सुषमा एवं चिरंजीव पुत्र दीपक भी थे । उसकी पत्नी भी साथ थी । वह भक्तिपूर्वक आया था । हे देव उस ब्राह्मण पुत्र को अपनी शरण प्रदान करिये ।

तीर्थे क्षेत्रे स्खलतिविधिना यत्कृतं स्यान्ममापि,
सर्वं पापं शरणद विभो ! मे क्षमस्वाद्य सद्यः ।
लोके पुण्ये त्वगजगपते पुण्यहीनस्त्वदीये,
नैवायातुं प्रभवति जनो तर्हि शं मे विधेहि ॥१०५॥

मुझ से भी तीर्थ क्षेत्र में जो गलतियाँ हो गईं हों उस सब पाप को आप क्षमा करें क्योंकि आप शरण देने वाले हैं । हे स्थावर जंगम के स्वामी ! कोई पुण्य हीन तो आपके लोक में आ ही नहीं सकता इस लिए मेरे ऊपर कृपा कर मुझे शान्ति प्रदान करें ।

अस्मिन्काव्ये तव महिमनि स्याद्ध्रुवं दोषराशिः,
क्षन्तव्योऽहं विकलकरणो त्वं विभो सर्ववेत्ता ।
यद्वा वर्ण्यं प्रमदविधिना च्यावितं तद्धि सर्वम्
स्मेरालोके तव जगपते पूर्णतां यातु सद्यः ॥१०६॥

इस काव्य में तुम्हारी ताहमा के गान में निश्चय ही मुझ से कोई न कोई दोष रहे होंगे मैं विकल इन्द्रियों वाला प्राणी हूँ। प्रभो आप सर्ववेत्ता है मुझे क्षमा करें। प्रमादवशात् जो कुछ भी मुझ से वर्णन करने योग्य छूट गया हो वह आप के मन्दहास के प्रकाश में पूर्णता को प्राप्त हो।

मित्रे कृत्वा सुहृदि परमे दूतभावं मया वै,
हैमाद्रेस्तां शिखरसुषमां वीक्ष्य चापल्यभावाद् ।
बद्रीशार्थं विकलवचनैर्या स्तुतिः सन्निबद्धाः,
तद्वै काव्यं जनसुखकृते मित्रदूतं बभूव । १०७॥

अपने शुद्धचित्त परम मित्र में ही दूतभाव ती कल्पना करके मैंने हिमालय की चोटियों की सुषमा को देखकर चंचलतावशात् अपनी विफल असमर्थ वाणी से श्री बद्रीश नारायण की यह स्तुति रची है वही यह काव्य मित्रदूत नाम से बन गया है।

मित्रे दूते जयति महिमा जह्नुजायाः पवित्रा,
मित्र दूते जयति सुषमा कापि हैमाद्रिभूमेः ।
मित्रे दूते जयति सुकुलः श्रीरमाकान्तकोऽपि,
मित्रे दूते जयति सुकविः रामनामो द्विवेदः ।।१०८।।

इस मित्रदूत में भगवती जाह्नवी की पवित्र महिमा का जयगान है। इस मित्रदूत में हिमालय की भूमि की किसी अवर्णनीय सुषमा का जयगान है। इस मित्रदूत में शुक्लवंशोत्पन्न श्री रमाकान्त का जयगान है। इस मित्रदूत में सुकवि इच्छाराम नामधारी का जयगान है।

इच्छारामकृतं वृत्तं यत्र धामचतुष्टयम् ।
वर्णितं तस्य पाठेन, बद्रीशस्य कृपा भवेत् ।।१०९।।

इच्छाराम द्वारा रचित इस चारों धाम के वृत्तान्त को जो पढ़ता है उस पर भगान् बद्रीनारायण की कृपा होती है।

इति श्री मनपुरी वास्तव्येन द्विवेदकुलोद्भवेन प्रणवोपनाम्ना इच्छारामसुकविना विनिर्मितं मित्रदूतं नाम काव्यं सम्पूर्णम् ।

मैनपुरी निवासी द्विवेदी कुलोत्पन्न "प्रणव" उपनामधारी सुकवि इच्छाराम द्वारा विनिर्मित मित्रदूत नामक काव्य पूर्ण हुआ ।।

।। ॐ शान्तिः ।।

देववाणी-पषिद्वार्ता

डा० शशि तिवारी 'भारती' पुरस्कारेण सम्मानिता

देववाणी-परिषद आजीवनसदस्या किं च दिल्ली विश्वविद्यालयस्य मैत्रेयी कालेजे संस्कृत-विभागे वरिष्ठ-प्राध्यापिका डा० श्रीमती शशी तिवारी-महाभागा 'राजस्थान संस्कृत अकादम्या' १९८९-९० कृते 'भारती मिश्रा पुरस्कारेण' सम्मानिता। अयं पुरस्कार एतस्या 'ऋग्वेद आ प्री सूक्तम्' इति ग्रन्थमुपलक्ष्य अस्यै राजस्थान-सर्वकारशिक्षामन्त्रिणा श्रीहरिकुमारऔदीच्य-महाभागेन १३-७-१९९० तारिकायां समर्पितः।

स्मरणीयं विद्यते यद् डा० शशी तिवारी महाभागा 'मुण्डकोपनिषद्'- 'ईशावास्योपनिषद्' प्रभृतिग्रन्थानां परिशीलकत्वेन, भारतीयधर्मसंस्कृति-परकाणां त्रिंशदधिकानां शोधपत्राणां लेखकत्वेन, इटलीप्रभृतिषु देशेषु अभ्यागत-प्राध्यापिकात्वेन च विद्वज्जगति लब्धप्रतिष्ठा वर्तते। आकाशवाणी प्रसारितेषु संस्कृत-नाटकेष्वपीयं विविधा भूमिका अनुष्ठितवती।

देववाणी-परिषन्महासचिवेन डा० रमाकान्त शुक्लेनेयं सम्मान प्राप्त्यै परिषत्पक्षतः १४-७-९० तारिकायां अभिनन्दिता।

(रमा शुक्ला)

संस्कृत-जगद्वार्ता

भिवान्यां विराट् संस्कृत-सम्मेलनं सम्पन्नम्

संस्कृतस्य प्रचारप्रसारोद्देश्यमधिकृत्य ६.५.१९९० रविवारे स्थानीय श्रीकृष्णप्रणामि-संस्कृत-महाविद्यालयस्य प्रांगणे एकं विराट् संस्कृतसम्मेलन-मायोजितम्। सम्मेलने संस्कृतस्य बहवो विद्वांसः समभिलन्। अत्रोल्लेखनीयमस्ति यद् उक्तसम्मेलनं 'विश्वसंस्कृतप्रतिष्ठान-हरियाणाशाखायाः', 'हरियाणासंस्कृत-सम्मेलन भिवान्य'श्च संयुक्त तत्त्वावधाने समायोजितमासीत्। एतदत्र ज्ञातव्य-मस्ति यदस्मान्मंचात् इतः पूर्वं सप्तदश विद्वांसः पुरस्कृता अभवन्, येषु प्रो० गोपिका मोहन भट्टाचार्यः (कुरुक्षेत्र), पं०स्थाणुदत्तः शास्त्री (कुरुक्षेत्र) पं० वासुदेव द्विवेदी (वाराणसी), डा० रामगोपालः कुलपतिः (रोहतक) प्रमुखाः सन्ति।

अवसरेऽस्मिन् हरियाणा-प्रतिष्ठानस्य अध्यक्षः प्रो० सत्यदेव वर्माऽवदत् यद् संस्कृतं विश्वस्य सर्वासां भाषाणां जननी वर्तते, तज्जीवनाय अद्य समेषां जनानां पूर्णसहयोगस्य आवश्यकता वर्तते । स जनान् आह्वयद् यद् आगामि-जनगणनायां सर्वे संस्कृतज्ञाः संस्कृतप्रेमिणश्च स्वां भाषां संस्कृतं लिखयेयुः ।

संस्कृतविद् रौनकअली खाँ अकथयत् यद् वार्तालापे, अध्ययने, पूर्णरूपेण संस्कृतस्य प्रयोगो भवतु । निजबालकान् अन्यशिक्षया सह अतिरिक्त संस्कृत-भाषाया ज्ञानं सविशेषं कारयेयुः । सोऽवादीत् यद् यवन-समाजेषु अद्यापि संस्कृतं प्रति रुचिर्नाति । विशेषतो मेवात-क्षेत्रे संस्कृतस्य प्रचारः प्रसारश्च विधेयौ ।

विष्णुसहस्रनाम्न उपरि वैदिकभाष्यकरणात् एवमायुर्वेदस्य विलक्षण-ग्रन्थ 'नाडीतत्त्वदर्पण' रचनाच्चास्मिन्नवसरे वैद्य सत्यदेववासिष्ठः शालेन माल्येन सभाजितः कृतः । श्रीवासिष्ठोऽवोचत्, संस्कृतस्य संस्कृतेश्च अन्योऽन्याश्रयो घनिष्ठः सम्बन्धो वर्तते । एष एव च भारतस्याधारोऽस्ति । अन्ये चाप्येकादश विद्वांसः संस्कृतस्य विशिष्टसेवाहेतोः सम्मानिता अभूवन् । ब्रह्मचारी कृष्णमणिः शास्त्रिपरीक्षाणां स्वर्णपदक प्राप्तेः कारणात् सम्मानितः कृतः ।

डा० रामेश्वर दत्त शर्मा (भिवानी) अस्मिन्नवसरे दूरस्थक्षेत्रेभ्यः संगृहीता-नाम् आधुनिकसंस्कृतपुस्तकानां दर्शनीया प्रदर्शनीमायोजितवान् । पश्चात् तेन तानि सर्वाणि पुस्तकानि श्रीकृष्णप्रणामि-संस्कृतमहाविद्यालय-ट्रस्टाय निःशुल्कं समर्पितानि ।

महाविद्यालयस्य प्राचार्यो मुनीश्वरदत्तो व्यज्ञापयत् यत् ट्रस्टाधीनाः सम्प्रति महाविद्यालयः, महामति-प्राणनाथ-निकेतनविद्यालयः, साध्वीमहिलावासः, अनाथछात्रावासश्च चलन्ति ।

मंचसंचालनं डा० रामेश्वरदत्त शर्माऽकरोत् । सम्मेलनस्य सर्वोऽपि कार्य-क्रमः संस्कृतेऽचलत् ।

(डा० रामेश्वरदत्त शर्मा, भिवानी)

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

...यानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

...तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 250.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

...व्यय : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं ...ते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः ...त्। ग्राहकाः ग्राहकशुल्कं 'अर्वाचीनसंस्कृतम्' (Arvacheenasans-...tam/*Arvācīnasaṁskṛtam* इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M. ...) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते।

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)।

'देववाणी-परिषद, दिल्ली'-कृते डा रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, ...म नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-...हारः, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१२/३)-...नसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५.७.१९९०।

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१. श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री) रु० ५०.००
२. श्रीनेहरूवृत्तम् (आचार्य रमेशचन्द्र शुक्लः) रु० १५.००
३. श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्) रु० ४०.००
४. कूहा (काव्यम्) (डा० उमाकान्त शुक्लः) रु० २०.००
५. सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः) रु० १५.००
६. आभाणकमञ्जरी („ „) रु० १५.००
७. जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ३०.००
८. अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) („) रु० ३०.००
९. „ „ „ (द्वितीय खण्डः) („) रु० ४०.००
१०. राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः) रु० ४०.००
११. निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः) रु० २०.००
१२. अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः) रु० २०.००
१३. भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ४०.००
१४. संस्कृतसाहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित) रु० १५०.००
१५. दयानन्दसूक्तिसप्तशती (श्री शिव कुमार मिश्रः) रु० १५.००
१६. गान्धिसूक्तिशप्तशती („ „) रु० १५.००
१७. रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया) रु० ६०.००
१८. साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः) रु० ४०.००
१९. पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः) रु० २०.००
२०. स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी) रु० ३०.००
२१. रसदर्शनम् (डा० रमेशचन्द्र शुक्लः) रु० ५०.००
२२. श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः) रु० २०.००
२३. सुरश्मिकाश्मीरम् („) („) रु० २०.००
२४. पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० १०.००
२५. श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्) रु० १०.००
२६. पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः) रु० २०.००
२७. नियतिचक्रम् (ध्वनिनाटकम्) („ „) रु० २०.००
२८. श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्रः) रु० १२.००
२९. लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्) रु० २०.००
३०. अध्यात्म रामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल) रु० ४०.००
३१. भाति मौरीशसम् (डा० रमाकान्त शुक्लः) रु० ६.००
३२. सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः) रु० २०.००
३३. अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० २०.००
३४. ऋतम् (उपन्यासः) (डा० केशवचन्द्र दाशः) रु० २०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

द्वादशवर्षे चतुर्थोऽङ्कः

१५ अक्टूबर, १९९०

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली-११० ०५९

परामर्शदातृ-मण्डलम्

१. आचार्य डा० रमेशचन्द्र शुक्ल:
२. आचार्य श्री श्रीनिवास रथ:
३. डा० कृष्णकान्त शुक्ल:
४. डा० राजेन्द्र मिश्र:
५. डा० उमाकान्त शुक्ल:
६. डा० विष्णुकान्त शुक्ल:

अर्वाचीनसंस्कृतम् (१२/४)

विषय-सूचि:

	विषय:	लेखक:	पृष्ठांक:
१.	सम्पादकीयम्		१८७
२.	वदत नेतारो मनाक्	डा० रमाकान्त शुक्ल:	१८९
३.	नेतृकथा	डा० भगवतीलाल राजपुरोहित:	१९३
४.	नेतृशतनामावलि:	डा० इच्छाराम द्विवेदी	१९५
५.	ग्रीष्मसौरभम्	डा० केदारनारायण जोशी	१९७
६.	वर्षाश्री:	,, ,,	२००
७.	ययातिशर्मिष्ठीयम्	डा० रामकिशोर मिश्र:	२०३
८.	व्रजदर्शनम्	डा० श्री बटोही झा	२१०
९.	अपण्डितोऽहम्	श्री प्रभाचार्य: (डा०पी.बी. आचार्य:)	२११
१०.	आह्वानम्	,, ,,	२१२
११.	धन्या धरायां कलमालिनीयम्	डा० कैलाशनाथ द्विवेदी	२१३
१२.	संस्कृतज्ञा मृता: सन्ति न मृतं संस्कृतं तथा	डा० रामेश्वरदत्त शर्मा	२१५
१३.	सत्यभक्त-दोहावली	श्री शान्तप्रकाश: सत्यदास:	२१७
१४.	अभिनवमोहमुद्गरम्	श्री श्रीसुन्दरराज:	२२३
१५.	देववाणी-परिषद्वार्ता	रमा शुक्ला	२२७
१६.	संस्कृत-जगद्वार्ता	आनन्दवर्धन शुक्ल:	२२८

अर्वाचीनसस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली।

२. प्रकाशनकालावधि:—त्रैमासिकम्।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्ल:, भारतीय:, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहार:, नयी दिल्ली-११००५९।

४. पत्राधिकारिणां नाम्ना सह सङ्केत:—देववाणी-परिषद्, दिल्ली, ६, वाणी-विहार:, नयी दिल्ली-११००५९।

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतो सत्यमस्ति।

—डा० रमाकान्त शुक्ल:

प्रकाशक:, सम्पादक:

७-११-१९९०

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य द्वादशवर्षीये चतुर्थेऽस्मिन्नङ्के द्वादश पद्यरचना एकञ्च एकाङ्करूपकं देववाणी-परिषद्वार्ता संस्कृत-जगद्वार्ता च प्रकाश्यन्ते ।

'वदत नेतारो मनाक्'—इतीयं रचना मया २९.१०.१९९० ई० तारिकायां दिल्ली-उज्जयिनीमार्गे रेलयाने कृता । विगतमासत्रये अस्माकं नेतृभिः मण्डल - आयोगप्रसङ्गेन, रामजन्मभूमि-विवाद-प्रोद्दीपन - प्रसङ्गेन अन्यैश्च कपटकृत्यैः देशोऽयं यां दुर्दशां प्रापितस्तदर्थमस्मादृशैर्निरीहैस्ते कथं क्षन्तव्याः स्युः ! रेलयानानां निरसनैर्निरागसां निग्रहैः, पदे-पदे विभेदस्थापनैः, ग्रामीणानां नागरिकानां च चेतस्सु वैमनस्योद्दीपनैः, दूरदर्शने च स्वभाषणैः राष्ट्रस्य अखण्डतायाः खण्डनैरद्यतननेतृभिः जनादेशदातारो यथा वञ्च्यन्ते तदर्थमेवास्यां रचनायामेते नेतारोऽधिक्षिप्यन्ते । अस्या रचनायाः प्रथमः पाठ उज्जयिन्यां विगतसप्ताहे त्रयस्त्रिंशत्तमकालिदाससमारोहावसरे समायोजिते संस्कृतकविसमवाये २.११.१९९० तारिकायामजायत । दीर्घेयं रचना न काञ्चिद्विशिष्टां व्यञ्जनां निदधाति, अभिधयैव प्रायः सर्वमत्र पृच्छ्यते दिश्यते च । यद्यस्माकं नेतारोऽभिधामपि अवगच्छेयुस्तदाप्यस्या रचनायाः साफल्यं स्यात् । आशास्यते, यत्कोऽपि न कोऽपि जनोऽवश्यमेवैतस्या अनुवादं विधाय नेतृणां कर्णकुहरेषु पातयिष्यति । कालो ह्ययं निरवधिर्विपुला च पृथ्वीः यद्यपीदमपि सत्यम्-स्वभावो दुरतिक्रमः इति । अस्माभिः स्थानानुरोधात्केवलं पृष्ठचतुष्टये एवेयं रचना प्रकाश्यते यद्यप्यनेकानि पद्यान्यन्यान्यप्यवशिष्यन्ते; यथा—

आत्मादाहान् वीक्ष्य धरणी कम्पते शोकाकुला ।
किन्तु करुणा नो स्पृशति रे कौटिकाः युष्मान् ! मनाक् ।।

डा० भगवतीलाल राजपुरोहितस्य 'नेतृकथा' अपि उज्जयिन्यां प्रास्तूयत अत्रापि नेतृणां महिमा एव गीयते । 'नेतृशतनामावल्यां' डा० इच्छारामद्विवेदः नेतृणां नामशतकं गायति । डा० केदारनारायणजोशी 'ग्रीष्मसौरभम्' इत्यत्र ग्रीष्मर्तोः 'वर्षाश्रीः' इत्यत्र च वर्षर्तोः सुषमां वर्णयति । एतद्रचनाद्वयम् आकाशवाण्या इन्दौरकेन्द्रात् प्रसारितं जातम् । 'व्रजदर्शनम्' इत्यत्र श्री बटोही झा व्रजभूमेर्दर्शनीयानि स्थलान्यवलम्ब्य वक्ति । उज्जयिन्यामेवास्माकं परिचयः

'प्रभाचार्या' परनाम्ना डा० पी. बी. आचार्येण सञ्जातः। अयं हि महानुभावः आंग्लसाहित्ये निष्णातः, सेवानिवृत्तप्राचार्योऽद्यत्वे 'बी-२९-५, श्रीकृष्णनगरम् गुण्टूर (आं०प्र०)-५२२००६' इत्यत्र निवसति। अयं महानुभावः आंग्ल-कवीनां वर्ड्सवर्थप्रभृतीनां विचारैरत्यन्तं प्रभावितः। पुनश्च कालिदास-भव-भूत्यादीनामपि कवितया भृशमावर्जितः। अस्य 'अपण्डितोऽहम्' 'आह्वानम्' इति कविताद्वये प्रकृतिप्रेम व्यज्यते। अर्वाचीनसंस्कृतस्य पाठकेभ्यः परिचित-चरेण डा० कैलाशनाथद्विवेदिना 'धन्या धरायां कलमालिनीयम्' इत्यत्र मालिन्या शोभा वर्णिता। यद्यपि मालिन्याः अप्यद्यत्वे सैव दशा यादृशी शिप्राया यमुनाया गोमत्या अन्यासां च तासां तासां नदीनाम् तथापि सर्वत्र रमणीयतायाः समुत्पादने कवेरधिकारं कश्चच्छेमत्तुर्हति ? अत एवात्र सहृदयै-र्मालिन्या अतीतशोभा साक्षात्कर्तुं शक्यते। डा० रामेश्वर शर्मा स्वविशिष्ट-भङ्ग्या 'संस्कृतज्ञा मृताः सन्ति न मृतं संस्कृतं तथा' इत्यत्र संस्कृतज्ञेषूत्साहं सञ्चारयितुमिच्छति। 'सत्यभक्त-दोहावली' इत्यत्र श्रीशान्तप्रकाशसत्यदासः स्वामिसत्यभक्तकृतहिन्दीदोहावृत्तानां संस्कृतदोहावृत्तेष्वेव पद्यानुवादं प्रस्तौति। 'अभिनवमोहमुद्गरम्' इत्यत्र अधिकारी कविः श्री श्रीसुन्दरराजः प्रकृति-संरक्षणार्थं जनान् प्रेरयति। 'ययातिशर्मिष्ठीयम्' इत्यस्मिन्नेकाङ्करूपके डा० रामकिशोरमिश्रेण पौराणिकाख्यानमाध्यमेन स्वजातेः संरक्षणस्य महत्त्वं संकेत्यते।

देववाणी-परिषद्वार्तायां संस्कृतजगद्वार्तया च संस्कृतसम्बन्धिन्यो वार्ताः प्रदीयन्ते।

अद्यत्वे मुद्रणमत्यन्तं महर्घं संवृत्तम् तथाप्यस्माभिः प्रयत्यते यत्पुरातन-मूल्येनैव अर्वाचीनसंस्कृतं पाठकानां कृते सुलभं भवेत्।

अनेनाङ्केन 'अर्वाचीनसंस्कृतं' द्वादश वर्षाणि पूरयते। अस्याङ्कस्य प्रकाशने कश्चिद्विलम्बः सञ्जातः। पाठकाः क्षन्तुमर्हन्ति। सावधानतायामपि-क्वचिज्जातान् मुद्रणदोषान् संशोधयितुमपि ते प्रार्थ्यन्ते।

७-११-१९९०
आर ६ वाणी-विहारः
नयी दिल्ली-११००५९

(डा० रमाकान्त शुक्लः)
प्रधानसम्पादकः

वदत नेतारो मनाक् !

(डा० रमाकान्त शुक्लः, आर ६ वाणी-विहारः, नयी दिल्ली-११००५९)

किं कुरुथ किं वा करिष्यथ वदत नेतारो मनाक् ।
किं मनसि वो वर्तते भो भणत नेतारो मनाक् ॥१॥ध्रु०॥
'अद्य युष्माकं प्रयासैर्देशगौरवमेधते ।'
कश्चिदपि वक्तुं किमिच्छति चिन्तयध्वं रे मनाक् ॥२॥
धर्मजातिग्रामभाषावर्णभेदोद्दीपनैः ।
कीदृशीं कृशरां पचध्वे वदत नेतारो मनाक् ॥३॥
जनमनस्सु द्वेषवह्निर्वः प्रयासैर्ज्वालितः ।
किमुचितं भवदीयकृत्यं वदत नेतारो मनाक् ॥४॥
छिन्नमुद्यानं भवद्भिः पुष्पगन्धाढ्यं महत् ।
दूयते न च मानसं वो हन्त ! नेतारो मनाक् ॥५॥
नाशितं जनजीवनं पितृसद्मतां नीताः पुरः ।
कारिताः शालाश्च काराः किं न लज्जध्वे मनाक् ॥६॥
रेलयानानां निरसनैर्निग्रहैश्च निरागसाम् ।
किं भवति किं वा भविष्यति ? वदत नेतारो मनाक् ॥७॥
यैर्न दीपाली व्यलोकि स्वादितं न च यौवनम् ।
वैशसात् तेषां न शंकध्वे कथं क्रूरा मनाक् ॥८॥
यौवनं प्रज्वाल्यते, प्रतिभा सतामवहेल्यते ।
जनमतं समुपेक्ष्यते, भद्रा बिभिथ चेतसि मनाक् ॥९॥
नैव काशी नैव मथुरा नाप्ययोध्या नो पुरी ।
नैव चोज्जयिनी विधत्ते वो भयं चेतसि मनाक् ॥१०॥
नृषु नृषु च विद्वेषभावो रोपितो निजभाषणैः ।
येऽप्यवाच्या भवदुदन्ता नोद्गिरति तान् कापि वाक् ॥११॥
सौमनस्याधारभूतां भरतवसुधां नित्यशः ।
कालकूटमयीं कुरुध्वे, किं न शंकध्वे मनाक् ॥१२॥
नित्यमेव क्रूरतानृतछद्मभेदाराधकाः ।
कां गतिं यूयं गमिष्यथ वदत नेतारो मनाक् ॥१३॥

'स्फोटयथ शासथ'—नियमतः खण्डयथ राष्ट्रैकताम् ।
व्रजथ कुह, कुह वा व्रजिष्यथ ? वदत नेतारो मनाक् ॥१४॥
यद्यदाचरथ स्वदेशीये जनेऽत्र प्रत्यहम् ।
किं तदाचरितं कदाचिद् आंग्लकुटिलैरपि मनाक् ॥१५॥
देशसेवां कर्तुमागच्छथ कुरुथ यादृच्छिकम् ।
व्यवहृतिः केयं स्फुरति वश्चिन्तयध्वं रे मनाक् ॥१६॥
निर्धना निर्धनतरास्तैस्तैरभावैः क्लेशिताः ।
आढ्यता नवनूतना वो वन्दनीया किं मनाक् ॥१७॥
क्लिश्यते दुष्यति च शुष्यति भिक्षते रोदिति जनः ।
अत्थ पिबथ स्वपिथ हृष्यथ ! किं न लज्जध्वे मनाक ॥१८॥
वीक्ष्य देशे कुव्यवस्थां वृत्तिकष्टं हिंसनम् ।
निस्त्रपाः क्रन्दथ हसथ वा ? वदत नेतारो मनाक् ॥१९॥
वस्त्राराहित्यं कुपोषणमत्र वापि महार्घता ।
नित्यमग्रे किमिति धावति ? वदत नेतारो मनाक् ॥२०॥
नो कृषध्वे किन्तु कृषकाणां भवन्तोः नायका ।
वीक्ष्य युष्मान् किं प्रसीदति कोऽपि सन्ना भुवि मनाक् ॥२१॥
अर्थयन्तारोऽपि यूयं धर्मगुरुगुरवस्तथा !
काममोक्षविचारका अपि ! बिभिथ रे चेतसि मनाक् ॥२२॥
उपचिताः खलु यैर्भवन्तस्ते भवद्भिर्लुण्ठिताः ।
रे प्रजातन्त्रस्य हन्तारो बिभिथ लोकान्मनाक् ॥२३॥
लुञ्चिता न्यायालया जनता वराकी लुञ्चिता ।
किमपरं भो लुञ्चयिष्यथ वदत नेतारो मनाक् ॥२४॥
अहह ! सज्जनता भवद्भिर्लुण्ठिता व्यापादिता !
लोकयथ भो लोकयथ कीर्तिं स्व नेतारो मनाक् ॥२५॥
देशसेवा लुण्ठनापर्यायभूता वो मते ।
किं न पश्यथ नैजचरितं ? वदत नेतारो मनाक् ॥२६॥
विश्ववन्द्यं शान्तिदूतं चैकनीडं यत्सताम् ।
भारतं तत्कथं लुञ्चथ, वदत नेतारो मनाक् ॥२७॥

भङ्क्थ चित्तं भङ्क्थ वित्तं भङ्क्थ विश्वासं नृणाम् ।
किं न नैजं भङ्क्थ गर्द्धं वदत नेतारो मनाक् ॥२८॥
चोरयथ जनसौमनस्यं चोरयथ जनजीवनम् ।
चोरयिष्यध्वे स्वकीयं भ्रष्टकृत्यं किं मनाक् ? ॥२९॥
किन्तु परवञ्चनविधिज्ञा मातृभूपरितापकाः ।
नरकरचनापाटवं वो नो दुनोति मनो मनाक् ? ॥३०॥
यत्र यत्रालोक्यते शान्तिर्भवद्भी रक्षिता ।
उप्यते कलहस्य बीजं तत्र, जिह्लीथ न मनाक् ॥३१॥
गिरथ कोषं गिरथ पदवीं गिरथ सर्वं सुविधया ।
किं स्वतृष्णामपि गरिष्यथ ? वदत नेतारो मनाक् ॥३२॥
तनुथ देशे सङ्कटं कलहं तथातङ्कं स्वतः ।
किं न तनुथ स्वीयचेतसि राष्ट्रभक्ति रे मनाक् ॥३३॥
चिन्तयथ नित्यं स्वकीयं हितमपरिमितमेव रे !
चिन्तयध्वं देशहितमपि लोलुपा यूयं मनाक् ॥३४॥
युष्मदीयैर्नित्यकृत्यै राष्ट्रदेवी लज्जिता ।
निस्त्रपा जीवथ न मज्जथ चुलुकवारिणि रे मनाक् ॥३५॥
हिंसया अनृतेन पैशुन्येन भवतां जीविका ।
कोऽपि सम्बन्धोऽस्ति किं सत्यश्रमाभ्यां वो मनाक् ?॥३६॥
सन्ति ये लालाटिका आस्थाननलिनीका बकाः ।
कुत्र युष्मान् पातयेयुश्चिन्तयध्वं रे मनाक् ॥३७॥
पादयोः प्रणिपत्य घोणाघर्षणं कृत्वा मुहुः ।
याचितं यन्मे मतं तस्यादरं रक्षत मनाक् ॥३८॥
दूरदर्शनतन्त्रतो लब्ध्वा विभुत्वं प्रत्यहम् ।
भाष्यते यदनर्गलं रे वित्थ तस्यार्थं मनाक् ॥३९॥
मनसि वचसि च कर्मणि प्रविरुद्ध्यते यैः प्रतिपलम् ।
सन्ति सन्तो वै कियन्तो वोऽतिरिच्य वदत मनाक् ॥४०॥
नैककविभिर्नवपुराणैर्यस्य महिमा गीयते ।
भारतं तत्किं न रक्षथ, वदत नेतारो मनाक् ॥४१॥
यस्य रक्षार्थं भटा उत्साहिनः खे भुवि जले ।
यूयमपि तद्देशरक्षार्थं कुरुत यत्नान् मनाक् ॥४२॥

येऽप्यपश्यन्नैकतायामेकतां भारतभुवि ।
भवत तेष्वपि भो कृपालव आत्मपूर्वजनृषु मनाक् ॥४३॥
'यातु देशो ह्यन्धकूपे रक्षितं स्यान्मे मतम् ।'
इति विचारपरम्परां स्वां त्यजत नेतारो मनाक् ॥४४॥
चिनुथ यूयं पूर्वजानां दुर्गुणानेव, क्षणम् ।
सद्‌गुणानपि किन्तु तेषां चिनुत नेतारो मनाक् ॥४५॥
किं तुदध्वे राष्ट्रदेवं किं तुदथ देशावनिम् ।
संस्कृतिं नः किं तुदध्वे वदत नेतारो मनाक् ॥४६॥
किं कृतघ्नैर्लप्स्यते कीर्तिर्यशो वा निस्त्रपैः ।
मनसि चिन्तयथ क्वचिद् एकान्त आसीना मनाक् ॥४७॥
शासनासन्दीमवाप्य व्रजत नो गर्वं क्षणम् ।
आगते विपरीतकाले कोऽपि रक्षति किं मनाक् ॥४८॥
ये समागच्छन्ति भङ्क्तुं वोऽभिमानं द्वारि वः ।
किं नु शक्ष्यथ रोद्धुमेतान् ? वदत नेतारो मनाक् ॥४९॥
किरथ जनसम्मर्दं निरागसमात्मनोऽहङ्कारतः ।
किमित तच्छक्ति करिष्यथ वदत नेतारो मनाक् ॥५०॥
ध्वसितुं मे भारतं यूयं स्थिता यदि तत्पराः ।
निश्चितं यूयं विनंक्ष्यथ, सावधाना रे मनाक् ॥५१॥
प्राक्तना नेतार आसंस्त्यागशीलाः प्रायशः ।
अद्यतनेतार आध्वे तत्सदृक्षाः किं मनाक् ? ॥५२॥
ते मृता अपि पूजनीया यैर्हि देशः सेवितः ।
जीविता अपि किन्तु यूयं पूजनीयाः किं मनाक् ॥५३॥
भारभूता मातृभूमेर्यूयमेतन्मे मतम् ।
अत्र किं ब्रूते मनो वो वदत नेतारो मनाक् ॥५४॥
अद्य युष्माकं सुकृत्यैर्नित्यनूतनशोभनैः !
लोक्यते यद्दिग्दिगन्तं तद्यशः पश्यत मनाक् ॥५५॥
ये कविम्मन्या यशो वो दूषयन्ति धिगस्तु तान् !
न्याय्यमार्गान्न स्वकीयात् प्रविचलत धीरा मनाक् ॥५६॥
उपकृतं बहु तत्र किं कथ्येत जीवत रे चिरम् ।
कुत्र वो दिव्यं यशः स्वल्पाक्षरा क्व च मेऽत्र वाक् ॥५७॥

★

नेतृकथा

(डा० भगवतीलाल राजपुरोहित: बिलोटीपुरा, उज्जैन)

एकदा भारते वर्षे निर्वाचने समागते ।
मतदातारमेवन्तु प्रजगाद प्रबोधक: ॥१॥

अस्मिन्निर्वाचने काले मञ्चा: क्रोशन्ति सर्वदा ।
परस्परं विपक्षास्ते नित्यं कुर्वन्ति गर्हणाम् ॥२॥

परनिन्दानदीष्णा ये निजशंसापरास्तथा ।
छलशक्तिप्रचण्डा ये तेषां निर्वाचने गति: ॥३॥

केन दलेन सम्बद्ध: पताकाभिश्च चीयते ।
प्रयाति जनसम्मर्द: प्रचाराय दिवानिशम् ॥४॥

येन दलेन ये चापि सम्बद्धा मानवास्तथा ।
ते कुर्वन्ति सदा तस्य मनोवाक्कर्मभि: कथा: ॥५॥

वाहनेषु च वीथ्यां च राजमार्गे गृहेषु च ।
वाक्यानि च चिह्नानि चोत्कुर्वन्ति पदे पदे ॥६॥

केचिन्निर्वाचने सत्यं वित्तहस्ता विशन्ति च ।
उत्तिष्ठन्ति च तिष्ठन्ति केचिदुपविशन्ति च ॥७॥

आश्वासनप्रगल्भा ये ये धृतप्रतिशीर्षका: ।
मकराश्रुमनोज्ञा ये ताञ्जानन्ति न के जना: ॥८॥

विज्ञापनप्रलोभैर्ये समाचारप्रचारका: ।
निन्दास्तुतिमिषेणेमे स्वार्थसिद्धिपरायणा: ॥९॥

इमे कणादा वित्तेषा भूत्वा सिंहासनादृता: ।
विपक्षा: कपिलायन्ते जनादेशेन सत्वरम् ॥१०॥

उत्कोचाञ्चितवित्तेशाश्चमसप्रार्थनापराः ।
स्थानान्तरप्रसिद्धाश्च कूर्मचर्मधृतस्तथा ॥११॥

आश्वासनमहाप्रज्ञाः क्रकचाः कण्ठकर्तने ।
द्विजिह्वा जिह्मगा नित्यं मधुरास्या विषाञ्चिता ।१२।

सरलो जिह्मतां याति मनोज्ञोऽपि विषांञ्चितः ।
सुपुष्टोऽपि च यो दुष्टः क्षपानाथः क्षणोत्तमः ॥१३॥

आयान्ति ते विलम्बेन कण्ठमालाश्च तुन्दिलाः ।
पदवित्तमदामत्तास्तेषां कासायते जगत् ॥१४॥

उपेक्षन्ते जनान् सर्वान् समयं न स्मरन्ति ते ।
विस्मरन्ति न किं किं ते स्वार्थान् स्मरन्ति सर्वदा ॥१५॥

यः कुलीनोऽकुलीनोऽपि योऽपंडितोऽपि पंडितः ।
अविद्योऽपि सुविद्योऽयमधार्मिकोऽपि धार्मिकः ॥१६॥

उद्घाटनपरो नित्यं शिलान्यासविशारद ।
विदेशेषु च देशेऽपि यः प्रयाति पुनः पुनः ॥१७॥

विदेशांश्च स्वदेशं च विमानादेव पश्यति ।
विस्मरति पृथिव्याश्च गन्धं सर्वार्थसाधकम् ॥१८॥

वारिप्लवं विनाशञ्च विमानादेव पश्यति ।
स स्पृशति न तान् देशान् स्पर्शदोषभयादिव ॥१९॥

महाकविः कवीनां यो विद्यावृक्षकुठारकः ।
अमन्त्रज्ञोऽपि मञ्चस्थो व्याख्याननिरतो भवेत् ॥२०॥

दलाधारोऽपि निश्चिन्तः वातस्पर्शेन पत्यते ।
अश्रुबिन्दुर्यथा नेत्रे मुखरेखां करोति वै ॥२१॥

इमां नेतृकथां नित्यं ये पठन्ति दिवानिशम् ।
तेषां मनोव्यथा सर्वा दूरीभवति नेतृजा ॥२२॥

नेतृशतनामावलिः

(डा० इच्छाराम द्विवेदी, १२/१६७, पंजाबी कालोनी,
मैनपुरी, उ० प्र०)

शुभ्रवस्त्रान्वितं नित्यं कृष्णकर्मरतं सदा ।
विघ्नबाधादिकर्तारं नेतृवर्गं समाश्रये ॥१॥
भूतप्रेतवदाभासैः खलैर्युक्तं सदाशिवम् ।
भक्ष्यामक्ष्यसमं चित्ते नेतारं प्रार्थयाम्यहम् ॥२॥
सर्वकारालयेऽगाधे सर्पन्तं निर्भयं सदा ।
महाधिकारिभिः पूज्यं नेतारं प्रणमाम्यहम् ॥३॥
देशेऽस्मिन् कार्यव्यग्राणां जनानामार्तचेतसाम् ।
कार्यनिष्पादनायैव नेतृस्तोत्रं कृतं मया ॥४॥

—अथ ध्यानम्—

घोराकारं हसितवदनं शुभवस्त्रं वसानम्;
मायालिप्तं परमरसिकं निर्गुणं ब्रह्मभूतम् ।
ताम्बूलाक्तद्विजगणयुतं निग्रहानुग्रहाब्धिम्,
वन्दे नित्यं विकटचरितं नेतृवन्दं विचित्रम् ॥५॥

—अथ नामावलिः—

ॐ अहितोऽधर्मसहितश्चापावनो दुर्गमो महान् ।
न्यायहीनः सदादीनः स्वार्थान्धोऽपाकशासनः ॥६॥
कृष्णकर्मानुकारी च कृष्णलीलारतोत्सुकः ।
कृष्णनामा कृष्णधामा कृष्णवार्ताप्रियः खलः ॥७॥
कार्यकर्ता कार्यहर्ता कार्यविघ्नविनाशकृत् ।
अधिकारिनमस्कर्ता कार्यालयविनाशनः ॥८॥
छिद्रान्वेषी सदा द्वेषी कार्याकार्याविचारकः ।
राजनीतिकृमिः भ्रष्टोऽमानुषः सर्वभक्षकः ॥९॥
चपलश्चाटुकारश्च भाषणशास्त्रपण्डितः ।
आश्वासनप्रदो नित्यं वंचको जनसेवकः ॥१०॥
सत्ताराधको धीमान् क्षुद्रबुद्धि प्रदूषकः ।
विप्लवी खण्डकर्ता च धनहर्ताऽशुचिः सदा ॥११॥

दुष्टः पुष्टोऽशुभो हृष्टः राष्ट्रभोक्ता स्मितानन: ।
कितवः कामकीटश्च नीतिशून्यो गतव्यथः ॥१२॥
दंगी भंगी सदानङ्गी क्रूरसंगी महाखलः ।
सेविताखिलतन्वङ्गी सुरापो च विनष्टधीः ॥१३॥
देशवार्तारतः पापी देशद्रोहरतोऽशिवः ।
देशवित्ताशनो देशविखण्डनपरायणः ॥१४॥
जनतानन्दहर्ता च जनतादुःखकारकः ।
जनतासेवको जनतापापनोदनभाषकः ॥१५॥
ध्वजग्राही दलध्वंसी षड्यन्त्रप्रियः सदा ।
मृदुभाषो विषदंष्ट्रश्च फणाटोपी भुजङ्गमः ॥१६॥
रमणीजनसंसक्तः कामिन्युद्धारकारकः ।
शास्त्रविद्वेषकर्ता च स्वच्छन्दोऽकाण्डताण्डवः ॥१७॥
क्रोधी लोभी महादम्भी प्रशंसनपरायणः ।
आन्दोलनपुरोधा च छात्रसंघसमर्थकः ॥१८॥
गुण्डातत्त्वसमायुक्तः गुण्डातत्त्वहिते रतः ।
गुण्डाक्षेत्रे महागुण्डा नम्रेष्वपि च शीलवान् ॥१९॥
हिताहितसमो लोके आत्मनो हितसाधकः ।
मन्त्री विधायको नेता सांसदो कथ्यते बुधैः ॥२०॥
अर्थकामसमाहर्ता कारकः सर्वकर्मणाम् ।
कारयानविहर्त्ता च भर्ता स्वस्यैव नित्यशः ॥२१॥

—अथ फलश्रुतिः—

नेतृनामशतं यस्तु पठेत्प्रातः प्रहर्षितः ।
नेतृदेवप्रसादेन कार्यसिद्धिं लभेन्नरः ॥२२॥
लोके संसिद्ध्यते सर्वं परलोकं च विनश्यति ।
मनः पापं समाप्नोति नेतृस्मरणे कृते ॥२३॥
श्रद्धया यस्तु कुरुतेऽहर्निशं नामकीर्तनम् ।
राजनीतौ स नेता स्यात् नेतृजनकृपावशात् ॥२४॥

इति श्रीभारतीयनेतृकुलकलंकमहापुराणान्तर्गतं कलिनेतृ-शतनामस्तोत्रं सम्पूर्णम् ॥

ग्रीष्म-सौरभम्

(जोशी डा०केदारनारायण:, उज्जयिन्या:)

रविं दृष्ट्वाऽकाशे प्रखरकिरणादृश्यवपुषं
दिशो धूलीपृक्ता: शिशुहरिणयूथैरनुसृता: ।
समीरैस्तप्ताङ्गैर्व्यथितवपुषं पुष्पलतिकाम्
लताकुञ्जोत्पाती वदति पवन: स्मेरनयन: ।।१।।
कपोले कान्तानामरुणकिरणै: पाटलरुचौ
समुद्भूतस्वेदोदकबहलमुक्ताश्च निदधत् ।
जनान् धारागेहैर्मलयनिलयाभैश्च सुखयन्
प्रिये, प्राप्तो ग्रीष्मो युवजनविनोदाम्बुधिरयम् ।।२।।
जना: शीघ्रं भुक्त्वा मसृणितकरे भामिनि रवौ
वसाना वासोऽच्छं मदिरनयनाभिश्च सहिता:
उशीरोदोत्सिक्त-व्यजनचलहस्ता गृहतलम्
रमन्ते पुष्पौघै: सुरभितपय:पायिन इमे ।।३।।
युवान: कान्ताभिर्विमलमृदुवासोभिरधुना
चला मन्दं प्रोद्यत्पुलकमुकुलाभिश्च सहिता: ।
मुहुर्दूरासक्तिव्यथितवलनाभि: प्रियतमे
निकुञ्जान् सेवन्ते दलशमिततीव्रोष्मरजस: ।।४।।
बहिर्देशे स्थातुं प्रखररविसन्तापितभुवा-
वशक्त: कुञ्जेऽस्मिन् झटिति मदनोऽलीयत प्रिये !
कथं वाऽगत्याऽस्मिन् शमितपरितापाश्च तरुणा:
भजन्ते वामाभी रुचिरसुरतं पश्य सुमुखि ।।५।।
प्रिये सन्तप्ताङ्गा: परभृतमुखा: पक्षिण इमे
रुवन्त्यत्रामन्दं श्रवणमधुरं शान्तवपुष: ।
भवेत्साहित्यं मे कुसुमसमय: शान्तिमगमत्
रतेरित्थं चिन्ता कथय कथमद्यास्ति तव सा ।।६।।

हरिण्यस्तप्ताङ्घ्र्य: श्रमविवृतमुख्य: शिशुयुता:
पिपासार्तिव्यग्रा: कथमपि शनै: प्राप्य सलिलम्।
चिरं स्थाने पीत्वाऽत्र खलु निवसन्ति प्रियतमे
महान् लाभोऽयं त्वन्नयनसमवस्त्वीक्षणमपि ॥७॥
पिको मित्रस्यायं नवविरहदु:खी सखिमधो:
सकृद्दु:खं यायादिति न खलु सन्तापयति तम्।
प्रभास्तीर्णे शैले सुखयति च संस्थाप्य पवनै:
दयालूनां चित्तं कुसुममृदुलं दु:खिनि जने ॥८॥
प्रिये, तप्ता: सर्वे गहनपशव: शीतसलिले
स्थले वृक्षाकीर्णेऽद्य सुखमयि तिष्ठन्ति सुखत:।
मृगेन्द्राद्या हिंस्रा: प्रखररवितेजोहतदृश:
गुहासु क्लिन्नासु प्रकटतिमिरासूज्झितगता: ॥९॥
वराहाणां यूथं प्रखररवितापाकुलतनु:
परं क्रुश्यद्दु:खात् शिशुसहितमुन्मुक्तगहनम्।
सरो लब्ध्वा धावन्मृदुलतरपङ्कं कथमपि
प्रिये, तस्याधस्तात् कृतसलिलपानं वसति च ॥१०॥
प्रिये नक्रग्राहप्रमुखजलजीवा अतिबला:
रवेस्तापं तीक्ष्णं नवमसहमाना विकलिता:।
तडागस्याऽधस्तात् कुसुम मृदुपङ्काश्रितमुखा:
श्वसन्तो वर्तन्ते कथमपि समं मत्स्यनिवहै: ॥११॥
लुलायानां वृन्दं विकटपृथुश्रृङ्गोच्चयशिर:
विधुन्वत्कान्ताराद् द्रुमसलिलशून्याद्रविकरै:।
प्रतप्तं स्व स्त्रीभि: सहितमति धावत्पथि सर:
प्रिये लब्ध्वा सान्द्रं मुदितमधुना जाग्रत इदम् ॥१२॥
क्वणत्कान्ताश्रोणीकनकरशना: शिञ्जितरवा:
विलासाङ्घ्रिक्षेपा मृदुलतनवो रक्तचरणा:।
उषीरादायान्तो रविकिरणतप्ताश्च सरसीम्
प्रिये निन्दन्त्यार्ता: सुमुखि, सविलासां गतिमिमाम् ॥१३॥

समायाताः कल्ये सह च मृगयालुब्धपुरुषैः
प्रिये श्वानो दीर्घाः शशशहरिणभक्ष्याः शशमृगान् ।
परं भुक्त्वा तृप्ताः प्रसृतचलजिह्वं तरुतले
श्वसन्तस्तिष्ठन्ति स्वजननिवहैः सार्धमधुना ॥१४॥

प्रिये मध्याह्नेऽस्मिन् प्रखररविसन्तापितवनात्
द्रुतं धावन्दीनो कथमपि शनैः पादपमगात् ।
परं दृष्ट्वा तत्र श्वगणमतिघोराकृतिमिमं
शिवावृन्दं त्रासादपरशिखिनं धावति पुनः ॥१५॥

नलिन्या व्याकोशाब्जपुटमधु पीत्वाऽद्य नितरां
सुगन्ध्यर्कः कामं सुतनु मधुमत्तः स्वकिरणैः ।
जपापुष्पारक्तैर्दहति रुचिरं सर्वभुवनं
मदोन्मत्तानां किं रुचिरमथवाऽसुन्दरमिह ॥१६॥

प्रभातादारभ्यारुणकिरणसन्तापितमिदं
जगत्कान्ताकान्तस्तनयुगकपोलान्स्वकिरणैः ।
सुधास्नुद्भिः शीतैर्व्यथितजनकं शीतयति वा
परस्यार्तिं सन्तः सपदि च हरन्त्येव विमलाः ॥१७॥

निशम्येमा वाणीरमृतमयगात्रैर्विधुकरैः
स्फुटैर्जातीपुष्पैर्नलदसलिलैः फुल्लकमलैः
शिलाभिः शीतांशोः शमितरविसन्तापवपुषं
पतिं धृत्वा कण्ठे किसलयशयेऽशेत रमणी ॥१८॥

प्रियः सोऽपि प्रेम्णा किसलयकरेणैव परितः
स्पृशंस्तस्या गण्डे नवकुचयुगे पाटलरुचौ ।
विचुम्बन्बिम्बौष्ठं सदयमखिलं दीप्तमदनः
विचित्रं चिक्रीड प्रथमवयसोऽन्यत् किमु फलम् ॥१९॥

❀

वर्षा-श्रीः

(जोशी डा० केदारनारायणः, उज्जयिन्याः)

विद्युत्घाटकहारभूषिततनूमंभोदपंक्ति चलाम्
दृष्ट्वा वारितुषारशीतमरुतः स्पृष्ट्वा च कुञ्जे वने ।
क्रीडद्गोपवधूरतिश्रमनुदं वेणुं प्रियं वादयन्
राधां मन्मथकातरां वच इदं प्रोवाच तुष्टो हरिः ॥१॥

राधे पश्य पयोधरा धृतिमुषो यूनां स्मरोत्तेजकाः
जीवद्धार-पयोमुचश्च-चपला सौवर्णहाराङ्किताः ।
एते यद्यपि ते पयोधरसमा अन्यैः गुणैः प्रेयसि !
कार्श्यं केवलमेकमेव तनुतेऽधस्तादिमानुत्तमान् ॥२॥

मूर्च्छंत्यः पथिकाङ्गना घनरवं श्रुत्वा स्मरोद्बोधकम्
शापालीं ददति प्रिये तत इमे मेघा नु कृष्णाङ्ककाः ।
एते तेऽपि पयोधराः प्रतिदिनं विध्यन्ति चेतांसि नः
यूनां पूर्ववदेव सुन्दरतरा आश्चर्यमेतन्ननु ॥३॥

राधारम्यकुचैः समा वयमपि श्रेष्ठैर्गुणैर्यद्यपि
अस्मांस्तुल्यरुचो विहाय विरुचः प्रेम्णा तु तानिच्छति ।
जम्बू-मेचकरोचिरेष भगवान् कृष्णस्तथापि प्रिये
इत्यालोच्य रुदन्ति वारिपतन-व्याजेन मेघा अमी ॥४॥

वीक्ष्येयं भगिनीधरा प्रियसुतान् बीजाङ्कुरान् कोमलान्
राधे तापितभूतले रविकरैः शुष्कीकृतान् लुण्ठतः ।
मात्रोत्सङ्गतले दयालुहृदया द्यौः कामिनी मुञ्चति
कामं स्वीयपयोधरैर्मधुपयः शश्वत् पयःपूरितैः ॥५॥

प्रादुर्भूतहरित्-तृणालि-वसन - प्रच्छादिताङ्गीमिमाम्
राजत्-पङ्कज-कोरकस्तनतटीं पुष्पोच्चयालङ्कृताम् ।
दृष्ट्वा भू-युवतिं नु कामुक इवाकाशप्रियो मुष्टिना
वर्षाबिन्दुमिषेण मौक्तिकचयं राधे क्षिपत्यातुरः ॥६॥

वर्षाघर्मजलाविलाङ्गलतिकां निर्निद्रपद्मस्तनीम्
वक्रीभूत-पलाश-कोरक-नखश्रेणीलसद्गण्डकाम् ।
बद्धश्वाससमीरणां च धरणीमाशंक्य भामामिव
मेघस्ताडयति प्रियेव कारका क्षेपच्छलेनाधुना ॥७॥

राधे श्यामतनूनमूञ्जलधरान् संवीक्ष्य यन्मानसे
वात्याभिः परिचालितांश्च सहसा शङ्काद्य सञ्जायते ।
आदायोदयवारिधेर्हि सलिलं नाकं प्रति प्रस्थिताः
नागानां किमु पंक्तयो निगडिताः सौवर्णदाम्ना परम् ॥८॥

ग्रीष्मादित्य-मयूखतस्करगणा एकाकिनीं मेदिनीम्
दृष्ट्वा फुल्ललतादिभूषणगणं सम्पीड्य निन्युर्बलात् ।
क्लिष्टां वीक्ष्य विषुष्कगात्रवदनां मेघाः स्वसारं गृहे
मुञ्चन्तोऽश्रुजलं हि मञ्जुलरवेणाश्वासयन्तीव ताम् ॥९॥

यस्या या नवमल्लिकाकुसुमवच्चैत्राम्रपर्णोपमम्
प्रातर्भिन्नसरोजमध्यमृदुलं राधेऽस्ति पादाम्बुजम् ।
सा राधा परियाति कुञ्जगहने श्रुत्वा प्रिये क्रीडितुम्
मेघैर्वारि निषिच्य धूलिमृदुलः पङ्कः समुत्पादितः ॥१०॥

मेघानां समये प्रबुद्धमदने द्यौः कामिनी भामिनि
रात्रौ प्रोषितभास्करोत्तमधवाम्लानाननाराधिके ।
अप्राप्तेन्दु-विटा पयोधरयुगार्त्या पीडिता रोदिति
स्त्रीणां प्रोषितकामिनां नियमतः कामज्वरो वर्धते ॥११॥

एष त्वन्मुखशीतरश्मिमधुना पत्रावली-भूषितम्
श्रोत्रोल्लोलमणिं सुधाविरचितोष्ठालङ्कृतं सुन्दरम् ।
भिन्नेन्दीवरलोचनं कटकुचे दृष्ट्वा कलङ्की परम्
लज्जाव्याप्तमनाः पयोदपटलेऽन्तर्याति राधे जवात् ॥१२॥

श्रावं श्रावमिदं मुकुन्दवचनं शृङ्गारपूर्णं तथा
दर्शं दर्शमिदं पयोदपटलच्छन्नं नभः सर्वतः ।
स्पर्शं स्पर्शमिमं तुषारसहितं वायुं स्मरोत्पीडिता
घ्रायं घ्रायमिमं परागमथ सा कण्ठेऽपतच्छ्रीहरेः ॥१३॥

रम्यस्त्रीगणवेष्टितोऽपि भगवान् क्रीतो गुणैः राधया
भक्तानां परिपालको झटिति तामङ्के निधाय स्वयम् ।
नानाकेलिगणैस्तुतोष युवतीं प्रद्युम्नतातो हरिः
सोऽयं तोषयतु प्रियं हि सकलं कुर्वन्सदा वो बुधान् ॥१४॥

ययातिशर्मिष्ठीयम्

[रचयिता—डा० रामकिशोर मिश्रः, संस्कृतविभागाध्यक्षः, महामना-मालवीय महाविद्यालयः, खेकड़ा-२०११०१, मेरठ (उ०प्र०)]

मथ्नाति रतये नित्यं जगत्प्राणिमनांसि यः।
पातु सर्वस्य दाम्पत्यं पञ्चबाणैः स मन्मथः॥

[नान्द्यन्ते]

सूत्रधारः : आर्यः विद्वत्परिषदियं केन दर्शनीयेन रूपकेनानुरञ्जनीया ?

उपसूत्र० : श्रीमन् ! किं स्मृतिरपि नास्ति ? अधुना भवता समाज्ञप्तोऽहं श्रीमता विद्यावाचस्पतिना विविधरूपक-कर्त्राऽऽचार्यरामकिशोरमिश्रेण प्रणीतं ययातिशर्मिष्ठीयं नामैकाङ्करूपकमभिनाययितुं सुपात्रैः।

सूत्रधारः : आमेवं स्मृतम्, तत्त्वया सम्यक्कारितः पात्राणामभिन-याभ्यासः ?

उपसूत्र० : आं श्रीमन् ! तत्सर्वं सुसम्पन्नम्।

सूत्रधारः : पुनरयं को विलम्बो भद्र !

उपसूत्र० : तद्रूपकं प्रदर्शयितुं भवदादेशोऽपेक्ष्यते मान्यवर्यं !

सूत्रधारः : तद्भद्र ! प्रारभ्यताम्, नैव किञ्चिद् विलम्ब्यताम्।

उपसूत्र० : पश्य, पश्य श्रीमन् ! तत्र कश्चिद् आलाप इव श्रूयते।

[स्थानम्—खाण्डवप्रस्थशासकस्य राज्ञो ययातेः प्रतिष्ठानपुर-प्रासादः। विवाहं कृत्वा समानीतया दैत्यगुरुशुक्राचार्यस्य पुत्र्या देवयान्या सह दासीरूपेण समागता दैत्यराजवृषपर्वणः सुता शर्मिष्ठा ययातेरुपपत्नीत्वं गता तस्य शयनकक्षमलङ्करोति।]

(ततः सर्वे पश्यन्ति। पट उत्सरति।)

[ततः प्रविशतो ययातिः शर्मिष्ठा च।]

ययातिः : प्रिये शर्मिष्ठे ! मम पार्श्वमागच्छ। देव्या देवयान्या सहाऽऽगता त्वं ममोपपत्नी भवसि। पुनस्ते किं भयम् ? यत्त्वं

मम समीपं नाऽऽयासि । [कामभावनया तां स्वपार्श्वे समाह्वयति ।]

शर्मिष्ठा : महाराज ! यदा भवानाह्वास्यति माम्, तदाऽहं भवतः समीपं कथन्नाऽऽयास्यामि ? परमत्र देव ! देवयानीभयं भवत्सकाशं गन्तुं मां बाधते ।

ययातिः : मा भैषीः । देवयानीभयं स्वहृदयाद् दूरीकुरु देवि ! सा तु साधारणब्राह्मणपुत्री वर्तते, परं त्वमसि राजपुत्री, पुनश्चाऽहमस्मि राजा । आवयोर्द्वयोस्तव मम च दाम्पत्यं सुखदायि भविष्यति । आगच्छ देवि ! भयं त्यज । [इति कथयन् शर्मिष्ठायाः पाणिं गृहीत्वा शयनकक्षं प्रविशति ।] प्रिये ! त्वन्तु दैत्यराजवृषपर्वणः सुताऽसि, देवयानी च साधारणब्राह्मणपुत्री विद्यते, पुनस्त्वयाऽस्याः सेविकात्वं कथमङ्गीकृतम् ? कथय देवि !

शर्मिष्ठा : राजन् ! भवतैका साधारणविप्रात्मजा कथं स्वराज्ञी कृता ? एतद्विधाने यत्कारणं भवत्समक्षमासीत् तादृशमेव कारणं मदीयपितृचरणगतिबाधकमभवत्, येन मयाऽस्याः सेविकात्वं स्वीकृतम् ।

ययातिः : सुभगे ! तत्कतमं कारणमासीत् ? येन वशीभूता त्वं राजसुताऽपि तस्याः सेविकाकार्यमूरीकृतवती । अहमपि तत् कारणं श्रोतुमिच्छामि । कथय प्रिये ! कथय ।

शर्मिष्ठा : श्रूयतामार्यपुत्र ! भवताऽहं पत्नी कृता । मह्यं राज्ञीमानो दत्तः । तदहं तत्कारणमवश्यमेव भवन्तं श्रावयिष्यामि । श्रूयताम्-"एकस्मिन्दिनेऽहं सा चाऽऽवां सरः स्नातुमगच्छाव । तत्राऽहं सरस्तटे स्वराजकीयपरिधानमुत्तार्य न्यक्षिपम् । देवयानी स्नात्वा मे वस्त्राणि परिधृतवती ।"

ययातिः : पुनस्तत्र किमभूत् ? कथय देवि !

शर्मिष्ठा : महाराज ! पुनरावयोरित्थं वाग्युद्धमभवत् ।

ययातिः : कथङ्कारं देवि ?

शर्मिष्ठा : श्रूयतामित्थम्—
"देवयानि ! त्वया मे वस्त्राणि कथं परिधृतानि ?"

देवयानी : "शर्मिष्ठे ! त्वदीयं परिधानं धारयित्वाऽहं स्वशरीराऽऽभां पश्यामि। राजकीयपरिधानावृताऽहं कीदृशी भवामीति।"

शर्मिष्ठा : "अधुनाऽहं किं परिधास्ये देवयानि !"

देवयानी : "आगच्छ सखि ! सरोवराद् बहिर्भूय मम वसनानि परिधत्स्व। पश्यामि, मम वस्त्रपरिवृता त्वं कीदृशी भवसि ? आगच्छ सखि ! मम वसनानि धारय।"

शर्मिष्ठा : "देवयानि ! त्वं कथनेनापि न लज्जसे, यदहं राजपुत्री तव साधारणवस्त्राणि धारयानि ? यदि त्वं राजकीयपरिधानमेव धारयितुमिच्छसि, तत्त्वया भिक्षुकब्राह्मणवंशे कथं जन्म गृहीतम् ?"

देवयानी : "शर्मिष्ठे ! त्वं मे पितरं भिक्षुकं कथयसि ?"

शर्मिष्ठा : "कथय, तव पिता भिक्षुकादन्यः कोऽस्ति ?"

देवयानी : "यदि मे पिता भिक्षुकोऽस्ति, तत्तव पिता दैत्यराजस्तस्य चरणकमले कथं स्पृशति ? त्वया मम पितुरवज्ञा कृता। अस्याऽपमानस्य दण्डं प्राप्स्यसि।"

शर्मिष्ठा : "त्वं काऽसि दण्डदात्री ? दण्डस्तु मम पित्रा प्रदीयते। किं तव पिता राजा ? राजा तु मे पिता वर्तते। तव पिता तु मम पितुर्याचकोऽस्ति। मम गृहात्पितुः पार्श्वाच्च धनधान्यादिवस्तूनि स गृह्णाति। तव पिता वस्तूनि याचितुं मम जनकसमीपमायाति। मम पिता तु तव पितुः समीपं न याति। कथय देवयानि ! को महान् ? मम पिता तव पिता वा ?"

देवयानी : "शर्मिष्ठे ! महांस्तु मम पितैव। मम पिता सञ्जीवनविद्यां जानाति। तव पितुः सैनिकान् मृतानपि स पुनर्जीवयति। तव पिता मे पितरं प्रणमति पादौ च तस्य स्पृशति। कथय, को महान्मम पिता तव पिता वेति।"

शर्मिष्ठा : "मम पिता राजाऽस्ति देवयानि ! त्वं मम राज्ये वससि। पुनरपि त्वं स्वां महतीं मन्यसे ? कथमेवम् ?

दवयानी : "फलनैव ज्ञास्यसि शर्मिष्ठे ! को महान् ? तव पिता मम पिता वा। तव वस्त्राणि तटे पतितानि सन्ति। अहं तु गच्छामि, तव परीवादं स्वपितरं कथयिष्ये। पुनस्त्वं ज्ञास्यसि, त्वमसि महती पुनरहं वा।"

शर्मिष्ठा : गच्छ, गच्छ, यच्चिकीर्षसि तत्कुरु। अहमपि तव परीवादं स्वपितरं कथयिष्यामि। पश्यामि, कस्या विजयो भवति ? तव मम वेति।

ययातिः : पुनस्तस्या एव विजयोऽभवत्। याऽऽसीद् राजसुता, सा तु सेविकाऽभूत्। या याचकदुहिताऽऽसीत्, सा प्रतिष्ठानपुरस्य महाराज्ञी कथ्यते शर्मिष्ठे !

शर्मिष्ठा : आं राजन् ! इत्थमेव भूतम्। मया स्वपितुर्वचनं परिपालितं महाराज !

ययातिः : किं तव पित्रा कथितं यत्त्वं देवयान्याः सेविका भवेः ?

शर्मिष्ठा : आमेवं महाराज !

ययातिः : प्रिये ! चिन्तां मा कार्षीः। त्वामहमत्र प्रतिष्ठाने राज्ञीं विधास्यामि।

[इति वदन् स तां स्वबाहुपाशेन बध्नाति।]

शर्मिष्ठा : महाराज ! त्यज माम्, त्यज माम्। देवयानी यद्यावां द्रक्ष्यति, तत्सा कुपिता भूत्वाऽऽवयोरनिष्टं करिष्यति।

ययातिः : अतः परं सा किमनिष्टं करिष्यति प्रिये ! यदकरणीयमासीत्तदपि तया स्वसख्याः कृतम्। यस्या राज्ञीत्वमासीत् सा तया सेविका कृता देवि ! तव पिता त्वामस्या देवयान्याः सेविकां कथमकरोत् ? तत्सर्वमपि प्रिये ! मां श्रावय।

शर्मिष्ठा : श्रूयतां तदपि राजन् ! तस्याः पिता शुक्राचार्यो मे पितरमाहूतवान् कथितवांश्च-"तव पुत्र्या शर्मिष्ठया मे पुत्र्या

देवयान्या अपमानः कृतः। अतोऽहं तव राज्यं विहाय क्वाप्यन्यत्र गच्छामि स्वपुत्र्या देवयान्या सह।"

ययातिः : तदा तव पिता किमकथयत्सुभगे ?

शर्मिष्ठा : देव ! मम पिता शुक्राचार्यमवदत्—"गुरुदेव ! ते द्वे अपि बालिके स्तः। बालवचनानि प्रति क्रोधो न कार्यो भवता। यदि भवानितो गमिष्यति, तद्दैत्यरक्षां कः करिष्यति ?"

ययातिः : तत्किं शुक्राचार्यो दैत्यान् रक्षति ? स तु राजपुरोहितोऽस्ति। दैत्यराजस्तु तव पिता वृषपर्वा वर्तते। दैत्यरक्षा तु दैत्यराजेन कर्त्तव्या। पुनः सः राजपुरोहितस्तान् कथं रक्षति ?

शर्मिष्ठा : स शुक्राचार्यो मृतसञ्जीवनीं जानाति राजन्। ये दैत्या देवैर्हन्यन्ते, तान् स तया विद्यया पुनरुज्जीवयति। इत्थं स दैत्यरक्षां करोति।

ययातिः : पुनस्तदानीं शुक्राचार्येण किमुत्तरितं प्रिये !

शर्मिष्ठा : तदानीं शुक्राचार्येणोक्तम्—"यदि भवतो दैत्यरक्षा प्रिया दैत्यराज ! तत्त्वया मम पुत्री देवयानी प्रसन्ना कार्या। तामनुनय। तदिच्छानुसारमेवाऽहमाचरिष्यामि।" तस्य वचनं श्रुत्वा प्रासादमागत्य मम जनको रुदन्मामुक्तवान्—"पुत्रि ! त्वया देवयान्याः कथमवमानः कृतः ? सा ब्राह्मणपुत्री बह्वभिमानिनी वर्तते।"

ततो मयोक्तम्—"तया मे परिधानं कथं धारितम् ? अस्माकं राज्ये सा वसति। भवानत्र राजा राजपुत्री चाऽहम्। तया भवतोऽपमानः कृतः। किमहं भवदपमानं श्रोतुं शक्नोमि पितः !" पुनरावयोरित्थमालापोऽभूत्।

वृषपर्वा : तया किम्वुक्तम् ? मम कोऽपमानस्तया कृतः पुत्रि !

शर्मिष्ठा : देवयान्या कथितम्—'तव पिता मे पितुश्चरणौ स्पृशति।"

वृषपर्वा : अत्र मे कोऽपमानो दुहितः। सोऽस्माकं गुरुः। तच्चरणस्पर्शनमस्माकं कर्तव्यमस्ति। त्वत्कृतावमानेन यदि स मे राज्यं विहाय गच्छति, तदिह दैत्यानां नाशो भविष्यति।

किं त्वं स्वजातिविनाशं वाञ्छसि ? कथय पुत्रि ! कथय, किमिच्छसि त्वम् ?

शर्मिष्ठा : स्वजातिविनाशं नेच्छामि पितः !

वृषपर्वा : यदि त्वं जातिनाशं नेच्छसि, तत्त्वया मे वचनं पालनीयम् ।

शर्मिष्ठा : "तत्ते किं वचनं पितः ?" इति मया पृष्टम् ।

ययातिः : पुनस्तव पिता किमुत्तरितवान् ?

शर्मिष्ठा : मम पिता देवयानीमाहूतवान् विनम्रं च निवेदितवान्— "पुत्रि देवयानि ! शर्मिष्ठां कृपया क्षमस्व ।" परं सा हठिनी नाऽमन्यत । सा मे पितरं कथितवती—'यदि भवानिच्छति यन्मे पिता सञ्जीवनविद्यापारङ्गत आचार्यस्तव राज्ये स्वं निवासं करोतु, सञ्जीवन्या च देवनिहतान् दैत्यानपि जीवयतु, तद्राजन् ! शर्मिष्ठा त्वया मम सेविका कार्या, सा च मे विवाहानन्तरं मया सह मम श्वशुरालयं प्रेषणीया भविष्यति । यदि भवान्मम वचनं पालयिष्यति, तदहं स्वपितरमत्र वासाय कथयिष्यामि, विपरीताचरणे कृते सति तव राज्यं परित्यज्याऽऽवां क्वाप्यन्यत्र गमिष्याव :।"

ययातिः : ततस्तव पिता तद्वचनमङ्गीकृतवानिति स्पष्टमेव भद्रे !

शर्मिष्ठा : तत्पितृवचनपालनानुसारमेवाऽहमत्र देवयान्या सह तस्याः सेविकात्वमङ्गीकृत्य भवत्सेवायामागताऽस्मि राजन्! इतोऽग्रे भवान् समर्थोऽस्ति मामत्र राज्ञीं विधातुं महाराज ! यद्यहमपि देवयानीव हठमकरिष्यं तन्मे जातेरहितमभविष्यत् । अतो मया पितुर्वचनं पालितम् ।"

ययातिः : सुभगे ! त्वया चिन्ता न कर्तव्या । अहं त्वामत्र महाराज्ञीं करिष्ये । आगच्छ प्रिये ! मया सार्धम्, तत्र भवने शयनमावां करिष्यावः । [शर्मिष्ठया सह शयनकक्षं प्रविश्य] प्रिये ! देवयान्या वचनं श्रुत्वा प्रासादमागत्य तव पिता दैत्यराजोऽत्र श्रीमान् वृषपर्वा तदानीं त्वां किमकथयत् ?

शर्मिष्ठा : "यदि त्वं जातिनाशं नेच्छसि, तत्त्वया देवयान्याः सेविकात्वं स्वीकार्यं पुत्रि !" इति पित्रा निगदितं महाराज !

ययातिः : पुनस्त्वया किं निगदितं शर्मिष्ठे ! वार्तालापं श्रावय ।

शर्मिष्ठा : "यद्यहं पितः ! तस्याः सेविकात्वं न स्वीकरिष्यामि, तत्किं भविष्यति पितः ?" इति मयोक्तेन पित्रोत्तरितम्—

वृषपर्वा : तत्पुत्रि ! जातिविनाशो भविष्यति । देवा दैत्यानां वधं करिष्यन्ति । सञ्जीवनी विद्या शुक्राचार्यसमीपे विद्यते । आचार्यो यदा राज्यं विहाय गमिष्यति, तदा सञ्जीवन-विद्यां विना मृतदैत्यान् कः पुनर्जीवितान् करिष्यति ? अतो यदि त्वं देवयान्याः सेविकात्वं स्वीकरोषि, तद्दैत्य-सुरक्षा भविष्यति । कथय पुत्रि ! किं कथयसि ?

शर्मिष्ठा : यदि पितः ! शुक्राचार्यगमनेन जातिनाशो भवति तदहं देवयान्याः सेविकात्वं स्वीकरोमि, येन जातिसुरक्षा स्यात् । जातिहितं सर्वोपरि सदा विद्यते ।

वृषपर्वा : पुत्रि ! त्वया सेविकात्वं स्वीकृत्य स्वजातिर्विनाशाद्रक्षिता । अधुना शुक्राचार्यो न गमिष्यति मे राज्यं त्यक्त्वा, सञ्जीवनविद्यया च देवहता दैत्याः पुनर्जीविता भविष्यन्ति । तवाऽनेन सेवास्वीकारेण दुहितस्तव दैत्यजातिः सदर्णयुक्ता भविष्यति ।

ययातिः : देवि ! त्वया देवयानीसेवया सह स्वजातेर्मम च हितं कृतम् ।

[इत्थं वार्तामालपन्तौ तौ दाम्पत्यसुखमनुभवन्तौ शयाते ।]

[पटीक्षेपः । निष्क्रान्तौ तौ ।]

★

व्रजदर्शनम्

(श्री बटोही झा, के० सं० वि० लखनऊ)

हरिर्हि नित्यं मथुरानिवासकः स्वजन्मभूमिर्मधुरा न कस्य वै ।
ददाति मोक्षं वसुदेवदेवकीयुगस्य पुत्रो नगरी च रागिणाम् ॥१॥
गवां कुले तिष्ठति नन्दपुत्रकस्ततो हि दिव्यं ललितञ्च गोकुलम् ।
सदा यशोदा सुतके हि कीर्तिदा ममेव भाग्यात्सुततां गतो हरिः ॥२॥
प्रशस्तवात्सल्यरसेन वस्तुतश्चलो मुकुन्दो जननन्दपौरुषे ।
यशोदवात्सल्यसुवृत्तिलुब्धको गतः शिशुत्वं तपसा च धन्यताम् ॥३॥
विहाय गोलोकनिवाससौख्यकं धरारसास्वादविमोहितो हृदा ।
सुसख्यवात्सल्यरसाकुलो हरिर्बभौ सखाग्रामयुतो हि नन्दजः ॥४॥
गिरिः स गोवर्धनधेनुरक्षको गवाञ्च गोप्ता पुरुषो हि चेतनः ।
व्रजं चरस्थावरलोकवृत्तकं स्थितो व्रजे कृष्णसमो नमस्कृतः ॥५॥
सुलोचनीयो बलरामदाउजी यतः प्रतीतोऽनुजरागरक्तिमा ।
स दास्यसख्ये मधुरो हि वत्सलः सदात्मरामो विविधं प्रकाशते ॥६॥
कथं निरूप्या वृषभानुपुत्रिका मुकुन्दलीलारससारराधिका ।
स्वयं हि कृष्णो भजते च यां सदा विमूर्च्छते यद्व्यपदेशने शुभम् ॥७॥
व्रजे हि वृन्दाविपिनं ह्यलौकिकं विहाय वृन्दां नहि याति माधवः ।
निकुञ्जमध्ये मधुराश्च गोपिकाः मुकुन्दरासस्य हि मुख्यभूमिकाः ॥८॥
वनानि सख्ये भवनं हि वत्सले तथा हि कुंजा मधुरे निरूपिताः ।
विभाति दास्यं निजसौख्यरूपकं सदात्मभावो व्रजलोकसंगतिः ॥९॥
व्रजप्रकाशस्तमसा तिरोहितस्तमश्च देहात्ममतिर्हि लौकिकी ।
मतिश्च लोके विमला कथं भवेद्यदा हि जीवे व्रजराजदर्शनम् ॥१०॥

★

अपण्डितोऽहम्

(श्री प्रभाचार्यः[1])

अपण्डितोऽहं सततं न मे मनः कृतावधानं विदुषां प्रवृत्तिषु ।
न पुस्तकन्यस्तमतिर्निरन्तरं न चाऽक्षिणी मेऽध्ययने क्षतप्रथे ॥१॥
स एव विद्वान् किल यः कृशोदरः प्रयाति नम्रश्च धृतोपलोचनः ।
व्ययं गतं तस्य शरीरसौष्ठवं दृशश्च शोभाऽध्ययनक्रमे क्षता ॥२॥
कृशोदरोऽहं हि वपुर्न मे कृशं कृशं न चेतो न कृशा दृगाऽऽत्मनः ।
परिश्रमप्राप्तशरीरसौष्ठवः प्रफुल्लचेताः प्रकृतेः सुसङ्गतौ ॥३॥
न मे व्यथा नाऽहमिहैति पण्डितस्तृणोपमं मे दृशि तस्य लाञ्छनम् ।
मम स्पृहाऽन्या वयसा विवर्धिता यया प्रपद्ये विपुलीकृतां मुदम् ॥४॥
प्रिया सखी मे प्रकृतिर्मनोहरा लये सुखं व्यग्रमनास्तदग्रतः ।
सुशिक्षको च व्यवहाररीतिषु प्रयामि यस्याः करणेषु शिक्षणम् ॥५॥
अवैमि तस्याः परिवर्तनेषु मे भवार्थसन्दोहविपर्ययक्रमम् ।
ऋतुक्रमो लब्धगतिः समन्ततो ममाऽपि देहात्ममनःप्रवृत्तिषु ॥६॥
प्रवातधूतद्रुमराजदुर्दशा विषाददा यद्यपि सुप्रयोजना ।
व्यनक्ति धैर्यं क्रियतामिति क्षतैर्विपत्तिकाले विधिना प्रकल्पिते ॥७॥
तनोति राकेन्दुविभूषिता निशा मनस्यवेद्यं पुलकाङ्कितं सुखम् ।
परं तु मे शिष्टगुणा तमस्विनी वितन्वती धातृकृतेरनन्तताम् ॥८॥
गभीरमौनं प्रकृतेर्निशान्तरे वनेषु वा पर्वततुङ्गसानुषु ।
प्रशान्तरीत्या प्रकटीकरोति मे निरूह्यमर्माङ्कितसृष्टिवैभवम् ॥९॥
अतः सदा पर्यटनोत्सुकं मनः कृतोद्यमं मे प्रकृतेर्निरीक्षणे ।
न पुस्तकेषु प्रतिपन्नमुत्तमं सुशिक्षणं तत् प्रकृतेः समार्जितम् ॥१०॥

---

१. डा० पी० बी० आचार्यः, बी-२९-५, श्रीकृष्णनगरम्, गुण्टूरः (आं०प्र०)-५२२००६

आह्वानम्

(श्री प्रभाचार्य:)

वदुष्यं किं विषयशकलज्ञानलब्धावलेप:,
किं वा शास्त्रप्रणिहितमना: प्राप्तसर्वोन्नतार्य: ।
पूर्वंग्रन्थाध्ययनविधिना वर्धते किं मनीषा
वाचालत्वे प्रकटितरसा किं नु सा वादशीलै: ॥१॥

किं वा विद्वान् विकसितमति: पुस्तकप्राप्तविद्यो
ज्ञानं किं वा प्रभवति विना वीक्षणं सृष्टिभाजाम् ।
मन्ये श्रेयानिति बहुविधै: शास्त्रविज्ञानवेत्तु:
सृष्टेर्द्रष्टा प्रकृतिविषयप्रेषितामोघदृष्टि: ॥२॥

एहि प्रात: प्रकृतिसुषमयां पुस्तकग्रस्तदृष्टे
पश्याऽम्भोधेरुदयति रवि: कान्तिमग्नं नगाग्रम् ।
सृष्टि: सर्वा विकचहृदया मोदते वीतचिन्ता
यस्यामेकस्त्वमिह भवसि व्यस्तचित्तो नितान्तम् ॥३॥

नित्यं ग्रन्थाध्ययनविधिना श्रान्तचित्तोऽभवस्त्वं
वीक्षस्व त्वाऽऽह्वयति मधुरा दिव्यशोभा प्रकृत्या: ।
अन्त:खेदं विसृज समुदं स्वीकुरुष्व प्रपञ्चे
कोणे कोणे प्रकटितरुचिं सृष्टिहर्षानुभूतिम् ॥४॥

पाण्डित्यं ते महदपि न तत् ते प्रमोदं ददाति
त्वं ग्रन्थेषु प्रणिहितमति: सृष्टिशोभामपैषि ।
जानीहि त्वां जगति विदुरं भूरिविज्ञानवन्तं
कर्तुं दक्षा प्रकृतिरिति न ग्रन्थसम्पाद्यविद्या ॥५॥

धन्या धराया कलमालिनीयम्

(डा० कैलाशनाथ द्विवेदी, डी०लिट्०, अजीतमल (इटावा) उ०प्र०)

भात्युत्तरस्यां दिशि भारतात्मा,
हिमालयो नाम गिरीन्द्रवर्यः ।
अत्युच्चशृंगैर्हिममण्डितो यः,
विभाति राष्ट्रस्य किरीटतुल्यः ॥१॥

नानानदीनिर्झरनादपूर्णो,
नेत्रोत्सवो यो नवनागराणाम् ।
अस्यैव रम्या नगराजकन्या,
धन्या धारायां कलमालिनीयम् ॥२॥

कल्लोलिनी कान्तकलेव काम्या, कण्वाश्रमं धर्मवनं बभार ।
रराज नैसर्गिकशोभयैव, दुकूलराशाविव चित्रमाल्यम् ॥३॥

तपस्विकन्याः स्वयवोऽनुरूपैः, रेजुर्घटैरम्यपयोधरास्ताः ।
उद्यानशोभा जलदानकार्यात् वृद्धिंगता यौवनशोभयेव ॥४॥

कदाचिदेको मृगयाविहारी, रथेन यः कृष्णमृगाऽनुयातः ।
सः पौरवाणामधिपः प्रसिद्धः दुष्यन्तनामाऽनुतटं तटिन्याः ॥५॥

ददर्श दृश्यं नयनाभिरामं, वनश्रिया काम्यतरा नदीयम् ।
वानीरकुञ्जेषु सुशीतलेषु, सशीकरो वायुरिहाऽस्ति सेव्यः ॥६॥

हंसास्तु लीनास्सिकतासु यस्याः, खगाः गदन्तः सलिलं निपीय ।
मृगीमृगाः प्रेमयुतास्तटेषु कण्डूयमानाः सनिमीलनेत्राः ॥७॥

तरंगमाला सलिलस्य रम्या भ्रान्तिर्न चित्ते भवभीतिजन्या ।
तथापि तेजस्विनरेन्द्रवर्यः तपोवनं भीतिमयं चकार ॥८॥

प्रकम्पितेयं तटिनी तरंगैर्निवारयामास नृशंसकार्यात् ।
प्रेमोपहारं विमलं समर्प्य, स्नातां सखीभिः सह कण्ठकन्या ॥९॥

तटीयकुंजेषु रहो विवाह्य, गान्धर्वरीत्या वसुधाधिपः सः ।
सुसाक्षिणीयं सरिता बभूव, विश्वासप्रेम्णोश्च मनःप्रतीतेः ॥१०॥
पादाङ्किता सैकतधूलिरस्याः विहारकाले जलसेचने वा ।
सार्धं सखीभिः सलिलावगाहः, सन्तापहारी भवतीव तासाम् ।११।
तपोधनाः प्राप्य जलं त्वदीयम्,
धर्माभिषेकेण सदा प्रसन्नः ।
जलाञ्जलिं श्राद्धपराः प्रदाय,
नीवारराशिं वलयेऽलभन्त ॥१२॥
आतंकहीनं श्रुतिज्ञानकेन्द्रं तपोवनं या जलधारया च ।
पुपोष प्रीत्या जननीव लोके, धन्याऽतिधन्या सरिता वरेण्या ।१३।
सुधर्ममूलाभयदानदक्षा, सुसंस्कृतेरक्षयवारिधारा ।
गौरीव गेया गुरुज्ञानदात्री, प्रेमस्मृतिश्चापि शकुन्तलायाः ॥१४॥
प्रियम्वदा यत्र प्रियानसूया, शकुन्तला स्नेहिलगौतमी च ।
कण्वः सशिष्यो रमते तपस्वी, तपोवनेऽस्याः सुतटे यतात्मा ॥१५॥
इयं सुवन्द्या सरितासु रम्या, प्रेष्ठाऽस्ति धर्मस्य च प्राणदात्री ।
गर्वोन्नताः संस्कृतिमातृरूपे, त्वया वयं मालिनि धन्यभागाः ।१६।
वहेत् सुधारा विमला प्रतीतेः,
प्रीतेश्च वृद्धिः सततं भवेत्तु ।
आतंकशून्याः जनभारतीयाः,
भवन्तु शान्ताः सरितः समीपे ॥१७॥
गौरवशालिनी भूमौ, मालिनी ह्लादिनी सदा ।
सुखशान्तिप्रदात्री च, धात्रीव धर्मपोषिका ॥१८॥

*

संस्कृतज्ञा मृताः सन्ति न मृतं संस्कृतं तथा

(डा० रामेश्वरदत्त शर्मा, ३, विकासनगर, भिवानी-१२५०२१)

संस्कृतस्याधिकग्रन्थान् नियतकालिपत्रिकाः ।
मूल्यं दत्वाधिगृह्णन्ति कति संस्कृतपण्डिताः ॥१॥
अद्य न तादृशी क्षीणा वित्तीया विदुषां दशा ।
परं पणकनिष्कासे मरणं तत्र जायते ॥२॥
अधीत्य वेदशास्त्राणि जनोपकारिवृत्तकम् ।
अन्विष्य च तेभ्योऽथ कियद्भिर्दर्शितं तथा ॥३॥
वैज्ञानिका कियन्तो ये आयुर्वेदं च ज्यौतिषम् ।
आलोड्य मथितेतैस्ते दिव्यं तत्त्वं प्रकाशितम् ॥४॥
कियन्तः सन्ति विद्वांसः देववाण्यां वदन्ति ये ।
सकलव्यवहारार्थं संस्कृतं च प्रयुञ्जते ॥५॥
भाषाशुद्धि समादाय भाययन्ति तदेषिणः ।
लिंगवचनशब्दानां चक्रे यातं च तद्व्ययः ॥६॥
कूपमण्डूकता तेषु बुद्धिविश्लेषिका न वा ।
स्वात्मानमेव मन्यन्ते धुरन्धरा विचक्षणाः ॥७॥
मोदकानां च नाम्नैव मुखं मिष्टं न जायते ।
देवभाषाप्रलापेन संस्कृतं नोद्धरिष्यति ॥८॥
यावत् संस्कृतवेत्तारो निष्क्रिया संस्कृतोन्नतौ ।
ईश्वरोऽपि क्षमो नास्ति संस्कृतनिधिरक्षणे ॥९॥
न जाने कीदृशी तन्द्रा हीनग्रन्थिर्मृतात्मिता ।
लभ्यते संस्कृतज्ञेषु नोद्यमो न च साहसः ॥१०॥

प्राचीना यावती भाषा तज्ज्ञास्ततः पुरातनाः ।
सहस्रवर्षसंस्कारा अद्यापि च सुरक्षिताः ॥११॥
अहमप्यस्मि तत्पीडया वृत्तिः सैव मृतोपमा ।
सैव प्रकृतिराकूतिः कार्यशैली च तादृशी ॥१२॥
मामुद्दिश्यैव निर्दिष्टा दुर्गुणा आत्मघातिनः ।
मादृशस्यापि वृत्तिश्चेद् वर्षैः संस्कृतजीविनः ॥१३॥
ईदृशी निष्क्रिया दीना कृपणा हीनभावना ।
संस्कृतारब्धशिक्षाणां सामान्यानान्तु का कथा ॥१४॥
नास्ति भद्रतरं वृत्तं यूनां संस्कृतसेविनाम् ।
अभिरुचिर्न साहित्ये तलस्पर्शीययोग्यता ॥१५॥
सत्यमेतच्च जानामि यथार्थं कटु जायते ।
बहु दृष्ट्वा बहु श्रुत्वा मयानुभूतमुदीरितम् ॥१६॥
उपायस्तादृशश्चिन्त्यो 'होशजोश'[1]-समन्वितः ।
तेनैव संस्कृतं रक्ष्यं निश्चितं भविष्यति ॥१७॥

---

१. ज्ञानोत्साह

सत्यभक्त–दोहावली

रचयिता—स्वामी सत्यभक्त, सत्याश्रम, वर्धा
संस्कृतानुवादक:—शान्तप्रकाश: सत्यदास:, सी-५/एवीसी लाइन,
बिरलाग्राम:, नागदा जं० ४५६३३१

[मूलम्/अनूदितम्]

इधर उधर कुछ बदल कर दे दी अपनी छाप ।
नामचोर शैतान वह सब चोरों का बाप ।।
किञ्चित्परिवर्त्तितकृतिम् स्वीयामभिव्यनक्ति ।
यशोहरं तं दुर्जनम् जनता चौरं वक्ति ।।
एक झूठ सौ झूठ को करती है उत्पन्न ।
लदा झूठ के बोझ से मन क्या रहे प्रसन्न ।।
एकस्मिन्नुक्तेऽनृतेऽनृतशतमत्रोच्येत ।
भारवता किं चेतसा प्रसन्नता लभ्येत ।।
करो सदा उत्साह से जीवन के सब काम ।
जी न चुराओ काम से यह सच्चा व्यायाम ।।
करोतु सोत्साहं सदा जीवनस्य कार्याणि ।
कार्येभ्यो न पलायताम् व्यायाम एव तानि ।।
क्रोध बड़ा भारी नशा पागलपन है क्रोध ।
क्रोधी पा सकता नहीं कर्त्तव्यों का बोध ।।
उन्मादसमा वर्ण्यते मादकता क्रोधस्य ।
क्रुद्धैर्नाप्तुं पार्यते बोध: कर्त्तव्यस्य ।।
गाय भैंस का दूध तो पीते लगे न देर ।
मानवजल से हो घृणा यह कैसा अन्धेर !
छागं गव्यं माहिषम् पीयत आशु पयोऽपि ।
कथमिदमुचितं स्याद् घृणा नरस्पृष्टजलतोऽपि ?

गाँड न कर सकता कभी पाप किसी के माफ़।
माफ़ी देना पाप की पक्षपात है साफ़ ॥
अर्हति क्षन्तुं न प्रभुर्दुष्कृत्यं कस्यापि ।
पक्षे पातः कथ्यते क्षमा तु पापस्यापि ॥
चबा चबा कर लो सदा आये पूरा स्वाद।
स्वास्थ्य बढ़े, धन भी बचे हो न अन्न बर्बाद॥
अदन्तु कृत्वा चर्वणम् पूर्णं येन स्वदेत ।
धन-भोजन-रक्षा भवेदारोग्यं वर्धेत ॥
जब तक मन में झूठ है तब तक चिन्ता भार ।
जब तक मल है पेट में तब तक जन बीमार॥
अनृतं यावन्मानसे चिन्ता तावच्चैव ।
मलमुदरे यावद्वसेत् तावत्तत्र रुजैव ॥
जिससे जितना बन सके वह उतना दे जाय।
जिसको जितना चाहिए वह उतना ले जाय॥
यावद्दातुं शक्यते तावत्सः प्रददातु ।
यस्मै यच्चावश्यकम् तदितः स आददातु ॥
जीवन रखने के लिए कुछ लेना अनिवार्य।
तब कुछ देने के लिए करो सदा श्रमकार्य॥
जीवनार्थमावश्यकम् भवति समादानन्तु ।
दातुमतः किञ्चित्सदा श्रमकार्यं कुर्वन्तु ॥
जीवन साधक शोक में कभी न फँसने पाय ।
उसकी संगति प्राप्त कर रोता भी हँस जाय॥
विहसति जीवनसाधकः शोकं मनसि समाप्य ।
रुदन्नपि प्रीणाति ना तस्य सङ्गतिं प्राप्य ॥
जो कुछ होता जगत में उसे सत्य मत मान।
जो कुछ होना चाहिए उसे 'सत्य' पहिचान॥
यत्किञ्चिद् भुवि दृश्यते नो संज्ञा सत्यस्य ।
भवनीयं भवतीह यत् 'सत्यं' संज्ञा तस्य ॥

जंगल में जाओ भले पर मंगल के अर्थ।
जग का यदि मंगल न हो जंगल जाना व्यर्थ॥
स्याज्जगतश्चेन्मङ्गलं जङ्गलगमनं वल्गु।
जगन्मङ्गलं स्यान्न चेज्जङ्गलगमनं फल्गु॥
झूठा यह संसार हो मगर न झूठा पेट।
इसी पेट ही के लिए है निशि दिन आखेट॥
अस्तु जगन्मिथ्या तथाप्युदरं मिथ्या नास्ति।
उदरपूरणार्थं सदा सर्वेषां मृगयास्ति॥
तन का तो आसन जमा मनके कटे न पाँख।
वगुला तो ध्यानी बना पर मछली पर आँख॥
कायस्य स्थिरमासनम् उड्डयते चित्तन्तु।
बको ध्यानमग्नो यथा मत्स्ये नेत्रयुगन्तु॥
दुनिया की उन्नति करो, करो न हृदय निराश।
जहाँ निराशा है वहाँ चलती फिरती लाश॥
नित्यं जगदुन्नीयतामस्तु निराशा मैव।
यत्र निराशा विद्यते शवश्चलंस्तत्रैव॥
धर्म में न झगड़े करो, करो नहीं अन्याय।
यदि जल भी जलने लगे जग को कौन बुझाय?
धर्मे मा कुरु विग्रहम् मा भूश्चान्यायोऽपि।
जलमपि जगतीं दहति चेन्निर्वापयिता कोऽपि॥
परिचर्या में कर रही माता जीवनदान।
इसीलिए क्या हो गई माता शूद्र-समान॥
स्वीयं ददाति जीवनम् सेवायामत एव।
माता शिशवे भवति किम् अस्पृश्या शूद्रेव॥
पेट हमारा हो भरा खूब भरा भण्डार।
तब ही आता याद है झूठा यह संसार॥
उदरं परिपूर्णं तथा पूर्णो निधिर्यदेव।
मिथ्या जगदिति कथ्यते लोकैरत्र तदैव॥

फूल फूल सब बीन लो छोड़ो सबके शूल।
फूल और फल है वही जो जगहित-अनुकूल॥
पुष्पदलं चिन्वन्तु भोः शूलदलं प्रविहाय।
पुष्पदलं तच्चास्ति यत् प्रभवेज्जगद्धिताय॥
बाँट-बाँट खा डालिये जो कुछ आये हाथ।
सभी पड़ा रह जायगा कुछ न जायगा साथ॥
यल्लब्धं स्यात्तद्धनम् अत्तु विभज्य विभज्य।
स्थास्यति सर्वं किञ्चिदपि नागन्ता सङ्गत्य॥
भिक्षा लेते मुफ्त में करें न कुछ उपकार।
कितने भी दुर्बल रहें वे पृथ्वी के भार॥
अन्यान् ये भिक्षाशिनो न किञ्चिदुपकुर्वन्ति।
कामं स्युः कृशविग्रहाः भुवि भारास्ते सन्ति॥
माल मुफ्त का मिल गया पर न मुफ्त का पेट।
स्वादलोलुपी ने किया अपना ही आखेट॥
लभतेऽमूल्यं भोजनम् परमुदरं नाप्नोति।
मूर्खस्तु स्वीयं वधम् रसलोलुपः करोति॥
मोह उलटता है सदा बन जाता है वैर।
प्रेम सदा आनन्दमय सदा स्वर्ग की सैर॥
विपरीते मोहे भवेद् वैरं चेतस्यत्र।
प्रेम परन्त्वनुभूयते सानन्दं सर्वत्र॥
मोह स्वार्थ के संग है प्रेम न्याय के संग।
मोह उछलता खून है प्रेम वसन्ती रंग॥
मोहोऽस्ति स्वार्थेन सह किन्तु प्रेम न्यायेन।
रक्तेन स उपमीयते तत्पाटलकुसुमेन॥
मोही मन क्या कर सके सत्यासत्य-विचार!
यदि विद्वत्ता भी मिले तो दिमाग का भार॥
मोहि मनोऽर्हति चिन्तने किं सत्यासत्यस्य?
विद्वत्तापि लभेत चेद् भारो मस्तिष्कस्य॥

यत्न करो भरपूर तुम भाग्य मिलेगा आप।
भाग्य यत्न से ही बना यत्न भाग्य का बाप ॥

श्रमं करोतु निरन्तरम् भविताऽऽप्तिर्भाग्यस्य ।
भाग्यं श्रमाद्धि निर्मितम् श्रमः पिता भाग्यस्य ॥

यदि आया कुछ हाथ में कर दो उसका दान।
जग का धन जग को दिया इसमें क्या अभिमान ?

लब्धञ्चेत्किञ्चिद्धनम् करोतु दानं तस्य ।
जगते जगतो दीयते कार्यं किं गर्वस्य ?

यह जीवन की साधना कभी न मन अवसन्न।
ख़ुद भी सदा प्रसन्न हो जग को रखें प्रसन्न ॥

एषा जीवनसाधना हृद्यविषीदन्नेव ।
प्रसादयेज्जनतां सदा स्वयं प्रसीदन्नेव ॥

यह जीवन की साधना हो घर-घर में मित्र ।
थोड़ी पूंजी से बने सुन्दर जीवनचित्र ॥

एषा जीवनसाधना गृहे गृहे मित्राणि ।
स्वल्पधनेन भवन्तु भोः शुभजीवनचित्राणि ॥

वचनों के अनुसार जब दिख न सकेगा काम ।
सभी तुम्हें कर जायँगे ब्याजसहित बदनाम ॥

वचनैरनुकूलन्न चेत् कार्यं ते द्रक्ष्यन्ति ।
कुख्यातान् युष्मान् जनाः तत्कालं त्यक्ष्यन्ति ॥

सिंह शिकार न सिंह का क्योंकि जाति है एक।
मानव कितना मूर्ख है इतना भी न विवेक ॥

सिंहो सिंहं हन्ति नो यतो जातिरेकास्ति ।
किन्तु जडे मनुजे त्वयम् न विवेकोऽपि चकास्ति ॥

सेवा हो ईमान हो और हृदय में प्यार।
कोई भी मानव रहे समझो रिश्तेदार ॥

प्रामाणिकता श्रमिकता यस्य हृदि स्नेहोऽपि ।
स्वजनं तमेव मन्यताम् मानवोऽस्तु सः कोऽपि ॥

स्वादलोलुपी मूर्ख को इतना नहीं विचार ।
भोजन मिले उधार, पर पेट न मिले उधार ॥
विवेकस्तु रसलोलुपे मूर्खेऽस्मिन्न चकास्ति ।
परान्नप्राप्तिः सम्भवा परोदराप्तिर्नास्ति ॥
हाथ किसी का भी रहे इससे जाति न जाय ।
मानव तो मानव रहे दूध पिलाती गाय ॥
लगेत्करः कस्यापि नो जातिर्नश्यत्येव ।
नरो नरोऽस्ति तमत्र गौः पयः पाययत्येव ॥
ज्ञान नहीं, संयम नहीं और न पर-उपकार ।
वे कुसाधु गुरुवेष में हैं पृथ्वी के भार ॥
संयम-सेवा-बोधतः शून्या ये तु भवन्ति ।
गुरुवेषिणः कुसाधवो भुवि भारास्ते सन्ति ॥

*

अभिनवमोहमुद्गरम्

(श्री श्रीसुन्दरराजः, आइ०ए०एस०, उन्नयन आयुक्तः, उडीसा सर्वकारः, भुवनेश्वरम्)

MODERN MOHAMUDGRAM

(Shri S. Sundararajan I.A.S., Special Relief Commissioner, Govt. of Orissa, BHUBANESWAR)

या तव मातरमप्यतिशेते सुखसन्तोषसमृद्धिविधाने ।
संरक्ष्यायाः प्रकृतेस्तस्याः मा कुरु मानव मा कुरु नाशम् ॥१॥

NATURE excels your mother in providing you with comfort, happiness and prosperity. She needs, therefore, to be protected.

Oh ! Man, do not, therefore, destroy her.

पुष्यति कुर्वन्नेत्रानन्दं फलति स्वादुफलानि परार्थे ।
छायां दत्वा सुखयति पान्थं सोऽयं वृक्षस्तं मा च्छिन्धि ॥२॥

The TREE over there flowers and provides a feast to the eyes. It bears tasty fruits for others. It provides a comfortable shade for the traveller.

Do not, therefore, cut and fell it.

निर्मलतोये सरसि सरोजं पश्य मनोज्ञं विकसितमेतत् ।
मा विश तोयं मा कलुषीकुरु भूत्वा म्लानं मा कुरु पद्मम् ॥३॥

Look at the LOTUS flower that has blosomed in the pond with crystal clear water.

Do not enter the water, make it turbid and pluck & wither the Lotus.

दर्भग्रासं कुर्वन् हरिणः विस्रब्धोऽयं विचरति विपिने ।
मा जहि चर्मणि मांसे लोभान्निर्दय ! तं भो ! निर्लज्जस्त्वम् ।।४।।

The STAG is freely moving in the forests and nibbling at the grass.

Oh ! Merciless Man, do not become shameless and kill it for the greed of its hide and meat.

पिच्छं नानावर्णमनोज्ञं केकी नृत्यति दर्शयमानः ।
काननभूमौ दृष्ट्वा हृष्य मा तं मूढ ! निबन्धय जाले ।।५।।

Be happy looking at the PEACOCK which dances in the forest, showing its colourful and beautiful plume.

Do not try to capture it by a net.

पतगान् विविधान् पश्य वसन्ते वृक्षाणां विटपेषु निविष्टान् ।
कूजितमुन्मत्तान् कुर्वाणान् मा तान् भीषय मा विद्रावय ।।६।।

Look, how various kinds of birds are perching on the branches of trees and chirping wildly in the spring season.

Do not scare and scatter them away.

अवनेरवनं निजमप्यवनम् इच्छन् मा कुर्ववनीमवनीम् ।
अवनी सवनी यदि सा सवनी नूनं वर्षाक्रुविसरयानाम् ।।७।।

(In Sanskrit, the word 'AVANI' or 'AVANEE' means Mother Earth. The word AVANA means conservation or protection. VANI means Forest. AVANI can be construed to mean a place without

forest. Similarly SAVANI could be construed to mean a place with forest. Also SAVANI would mean a productive person in the feminine gender. The poet has used these words in Slesha Alankar to convey tha message of conservaiion of forest.)

If you want AVANA i. e. protection for Mother Earth and for yourself, then do not make AVANI (Mother Earth) AVANI (Forestless). If AVANI (Mother Earth) is SAVANI (with forest) then she would be SAVANI (productive) of rain, agriculture & crops.

खनिजपदार्थप्राप्तेर्लोभात् खनसि धरित्रीमत्र च तत्र ।
तेन वनानां भूमिधराणां नाशो येन तवापि विनाश: ॥८॥

For the greed of getting some mineral products, you are digging up Mother Earth here and there, Because of this, forests and mountains are destroyed and this will lead to your own destruction.

प्राणिषि शुद्धश्वसनेन त्वं वायौ मलिने व्याप्स्यति रोग: ।
तथापि धूमोद्गिरणै: शिल्पै: वायुं नित्यं दूषयसि त्वम् ॥९॥

You exist by inhaling clean air. If air is polluted, you get air-borne diseases by inhaling it. Inspite of this, you are polluting the air by establishing Industries that throw up heavy smoke.

कीटाणूनामप्रभवेन तोयं भूयात् पानीयं ते ।
नो चेत् पीत्वा प्राप्स्यसि रोगं तथापि तोयं कलुषीकुरुषे ॥१०॥

If water is free of bacteria, than it would be potable. Otherwise by drinking polluted water, you will get diseases. Inspite of this, you are polluting water.

प्रकृतेर्दूषणहेतोर्नित्यं प्राणी म्रियते बहुसंख्याकः ।
पश्य ततस्त्वं प्रकृतेरेवं मा कुरु मानव ! मा कुरु नाशम् ॥११॥

By polluting the environment, countless people die every day as you see.

Oh ! Man, do not, therefore, destroy Nature, like this.

सुन्दरतायाः प्रकृतेर्दासः सुन्दरतां तां रक्ष नरेति ।
सुन्दरराजः सुरभारत्यां सुन्दरमेतत् सुषुवे काव्यम् ॥१२॥

Sundararajan, an admirer of the beauty of Nature has composed this beautiful poem in Sanskrit requesting Man to protect the beauty of Nature.

★

देववाणी-परिषद्वार्ता

देववाणी-परिषदः पञ्चदशः सङ्कल्पना-दिवसः

२१.८.१८९० ई० तारिकायाम् 'आर-६ वाणी-विहार, नयी दिल्ली-११००५९' इत्यत्र देववाणी-परिषदः पञ्चदशः संकल्पना-दिवसः सम्मानितोऽभूत्। अस्मिन्नवसरे परिषदुपाध्यक्षेण डा० विष्णुकान्तशुक्लमहाभागेन परिषन्महासचिवस्य डा०रमाकान्तशुक्लस्य स्वरेंऽकिता सम्पूर्णरघुवंशस्य ध्वनिपट्टिका समुन्मीलिता।

तृतीयः पण्डितराज-महोत्सवः

४.१०.१९९० ई० तारिकायां शरत्पूर्णिमावसरे देववाणी-परिषदा तृतीयः 'पण्डितराजमहोत्सवः' सम्मानितः। मुख्यातिथिना आचार्य श्रीनिवासरथ-महाभागेन डा० रमाकान्त शुक्लस्य स्वरे पडितराजजगन्नाथप्रणीतगङ्गालहर्याः ध्वन्यंकिता ध्वनिपट्टिका (कैसेट) समुन्मीलिता।

(रमा शुक्ला)

संस्कृत-जगद्वार्ता

उज्जयिन्यां कालिदास-समारोहः सम्पन्नः

उज्जयिन्यां कालिदास-अकादमी-परिसरे ३०-१०-१९९०—५-११-१९९० ई० तारिकासु त्रयस्त्रिशत्तमः 'कालिदास-समारोहः' निर्विघ्नं सम्पूर्णतां यातः। अस्योद्घाटनं भारतस्य महामहिमराष्ट्रपतिना श्रीरामस्वामी वेंकटरामन-महाभागेन कृतम्। म० प्र० मुख्यमन्त्रिणा श्रीसुन्दरलालपटवामहाभागेन, राज्यपालेन कुँवर-महमूदअलीमहाभागेन, सारस्वतातिथिना डा० रामकरणशर्म महाभागेन, कालिदास-समिति-सचिवेन आचार्यश्रीनिवासरथमहाभागेनाभिभाषितम्। महाकालस्य कृपया, कालिदासस्य महिम्ना प्रशासनस्य जनतायाश्च सहयोगेन अशान्तेऽपि देशे प्रदेशे च शोधपत्रगोष्ठ्यः, चित्रमूर्तिप्रदर्शनी, वाद-विवाद-श्लोकपाठादिप्रतियोगिताः, सांस्कृतिककार्यक्रमाश्च यथाकालं सम्पन्नाः। दिल्लीस्था 'सुरभारती' संस्था विक्रमोर्वशीयस्य प्रयोगं चकार। २-११-९० तारिकायां ५-११-९० तारिकायां च 'संस्कृतकविसमवायः'

समायोज्यत यस्याध्यक्ष्यं डा० रामकरणशर्ममहाभागेन सञ्चालकत्वं च डा० भास्कराचार्यत्रिपाठिमहाभागेन सम्यक् निर्व्यूढम् । डा० पुष्पादीक्षित-डा० बच्चूलाल अवस्थि-डा० उमाकान्त शुक्ल-आचार्य श्रीनिवासरथ-पं० शैलेन्द्रनाथ पाठक-डा० पी०बी० आचार्य-श्री एम०एस० शर्म-डा० रुद्रदेव त्रिपाठि-डा० केदारनारायण जोशि-डा० रमाकान्त शुक्ल-डा० रश्मिकान्त व्यास-डा० भगवतीलाल राजपुरोहित-डा० सत्यपाल नारंग-प्रभृतिभिः कविभिः स्वरचनाः प्रस्तुताः । ५-११-१९९० ई० तारिकायां समापनसत्रस्य अध्यक्षेण मध्यप्रदेश-संस्कृतिमन्त्रिणा श्रीकैलाशचावलामहाभागेन पुरस्कारवितरणं कृतम् । प्रतिनिधीनां पक्षतः सांगलीतः प्राप्तेन प्रो० वी० बी० इनामदारमहाभागेन कृतज्ञता ज्ञापिता ।

पं० वसन्तगाडगीलाभिनन्दनार्थं संस्कृतस्वर्णिमोत्सवः

पुण्य (पुणें) नगरे ९-११.११.१९९० तारिकासु 'शारदा'काराणां पं० वसन्तगाडगीलमहाभागानां वयसः षष्टिपूर्ति, 'शारदा'संस्कृतपत्रिका-सम्पादकत्वस्यैकत्रिंशद्वर्षपूर्ति, संस्कृतमात्रनिष्ठाप्रतिज्ञाव्रतस्य चत्वारिंशद्वर्षपूर्ति संस्कृतस्वाध्यायस्य चार्धशतीमालक्ष्य '**संस्कृत स्वर्णिमोत्सवः**' सम्मानितो भवति । अस्मिन्नवसरे नैकानि सारस्वतानुष्ठानानि समायोज्यन्ते । दिल्ल्याः देववाणी-परिषन्महासचिवेन किञ्च 'अर्वाचीनसंस्कृत'स्य सम्पादकेन डा० रमाकान्त शुक्लेनास्मिन्नवसरे सम्प्रेषिते सन्देशे श्रीगाडगीलान् प्रति स्व मङ्गलकामना एषु शब्देषु व्यक्ता :—"दिल्ल्यां देववाणी-परिषदः समायोजनेसु, आकाशवाण्याः कविसम्मेलनेषु, फिलाडेल्फियादिस्थानेष्वायोजितेषु विश्वसंस्कृतसम्मेलनेषु, नागपुरे आधुनिकसंस्कृत-सहित्यसंगोष्ठ्यां, तेषु तेषु नगरेषु चायोजितेषु अ०भा० प्राच्यविद्यासम्मेलनेषु, अन्येषु चानेकेषु आयोजनेषु प्रसृता भवतां वाणी संस्कृत-सेवाहेवाकिनां चेतस्सु स्फूर्तिमुत्साहञ्च सञ्चार्य समेषां वन्दनीयास्ते । 'शारदा' पत्रिकायाः नियमतः प्रकाशनेन संस्कृत-पत्रकारिता-जगति भवद्भिर्यः कीर्ति-स्तम्भः संस्थापितस्तस्यैतिहासिकं महत्त्वं विद्यते । ··· मदीया शुभाः कामनाः सादरं समर्प्यन्ते ।'

प० वसन्त गाडगीलस्य कार्यतत्परता, अनलसता, बलिष्ठता, निर्भीकता, ओजःसम्पत्प्रभविष्णुता च नित्यमभिवर्धन्ताम् !

(आनन्दवर्धन शुक्लः)

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

संस्थानां कृते वार्षिकं (भारते) रु० 40.00

वार्षिकं (विदेशेषु) यू० एस० डालराः 10

आजीवनं (भारते) रु० 300.00

आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00

वार्षिकं (विदेशेषु) यू० एस० डालराः 10

आजीवनं (भारते) रु० 250.00

आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्यय : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]

भारते : रु० 20.00

विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं **'अर्वाचीनसंस्कृतम्'** (Arvacheenasanskritam/*rvācīnasaṁskṛtam*) इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते।

सम्पादकः

अर्वाचीनसंस्कृतम्

देववाणी-परिषद्, दिल्ली

आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)।

'देववाणी-परिषद, दिल्ली'-कृते डा रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहारः, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१२/४)-प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः ७.११.१९९०

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु० ५०.००
२.	श्रीनेहरूवृत्तम् (आचार्य रमेशचन्द्र शुक्लः)	रु० १५.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी („ „)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) („)	रु० ३०.००
९.	„ „ „ (द्वितीय खण्डः) („)	रु० ४०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृतसाहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१५.	दयानन्दसूक्तिसप्तशती (श्री शिव कुमार मिश्र)	रु० १५.००
१६.	गान्धिसूक्तिशप्तशती („ „)	रु० १५.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् („) („)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) („ „)	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्रः)	रु० १२.००
२९.	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००
३१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
३२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३३.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
३४.	ऋतम् (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.